# MudgalapurAna Khanda 4 Gajananacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૪ ગજાનનચરિતમ્

## Document Information


Text title : Mudgala Purana Khanda 4 Gajananacharitam

File name : mudgalapurANam4.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 18, 2023

*sanskritdocuments.org*

# મુદ્ગલપુરાણં ખણ્ડઃ ૪ ગજાનનચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૪॥

॥ અથ શ્રીમુદ્ગલપુરાણે ચતુર્થઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૪ અ. ૧ પાન ૧)

## ૪.૧ ચતુર્થીતપોવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ત્વયા સૂત મહાપ્રાજ્ઞ મહોદરચરિત્રકમ્ ।
કથિતં શાન્તિદં મોહનાશકં સંશ્રુતં મયા ॥ ૧॥

તથા તૃપ્તિં ન યામ્યેવ પાયં પાયં સુધામિવ ।
નાનેન સદૃશં કિઞ્ચિચ્છાન્તિદં વિદ્યતે દ્વિજ ॥ ૨॥

અતો ગજાનનસ્યાપિ ચરિત્રં વદ વિસ્તરાત્ ।
સર્વજ્ઞસ્ત્વં મહાભાગ મતોઽસ્માભિર્ન સંશયઃ ॥ ૩॥

મુદ્ગલસ્ય ચ દક્ષસ્ય સંવાદં વદ માનદ ।
કિં પૃષ્ટં બ્રહ્મપુત્રેણ દક્ષેણાગ્રે સુબુદ્ધિના ॥ ૪॥

સૂત ઉવાચ ।
શૃણુ ભાર્ગવ વિપ્રેન્દ્ર મહાજ્ઞાનકરં પ્રભો ।
ગજાનનસ્ય માહાત્મ્યં કથયામિ યથા શ્રુતમ્ ॥ ૫॥

શ્રુત્વા મહોદરાખ્યાનં નાનાખ્યાનસમન્વિતમ્ ।
મોહનાશકરં દક્ષો હર્ષિતો હ્યભવન્ મુને ॥ ૬॥

મુદ્ગલં પુનરપ્યાહ યોગીન્દ્રં વેદપારગમ્ ।
વિનયેન સમાયુક્તો ગણેશજ્ઞાનલાલસઃ ॥ ૭॥

દક્ષ ઉવાચ ।
મહોદરસ્ય માહાત્મ્યં શ્રુતં ભક્તિયુતેન ભોઃ ।
તેનાऽऽનન્દસમાયુક્તઃ કૃતોऽહં યોગિના ત્વયા ॥ ૮॥

અધુના વદ વિપ્રેશ ગજાનનચરિત્રકમ્ ।
કીદૃશોऽવતરદ્દેવઃ કીદૃશં બ્રહ્મ તત્ર ચ ॥ ૯॥

કિમર્થં દેહધારી સ બભૂવ મુનિસત્તમ ।
કિં કર્મા કિં ગુણજ્ઞશ્ચ વદ સર્વં મહામતે ॥ ૧૦॥

પૂર્વપુણ્યપ્રભાવેણ સઙ્ગતિસ્તે પ્રજાયતે ।
ધન્યોऽહં સર્વભાવેન શ‍ૃણોમિ ચ કથાં શુભામ્ ॥ ૧૧॥

સૂત ઉવાચ ।
દક્ષેણૈવં મહાયોગી સ પૃષ્ટો બુદ્ધિશાલિના ।
તં પ્રત્યુવાચ ભાવજ્ઞો ગાણપત્યપરાયણઃ ॥ ૧૨॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ મહાભાગ ધન્યોऽસ્યત્ર ન સંશયઃ ।
કથાં વર્ધયસિ પ્રાજ્ઞ ગાણેશીં યોગદાં પરામ્ ॥ ૧૩॥

તવ ભાવેન સન્તુષ્ટો વદામિ સકલં પ્રભો ।
ગજાનનસ્ય માહાત્મ્યં યોગશાન્તિપદપ્રદમ્ ॥ ૧૪॥

સાઙ્ખ્યં બ્રહ્મ વિદેહાખ્યં કથિતં યોગિભિઃ પરમ્ ।
તદેવ ગજવક્ત્રં વૈ જાનીહિ ત્વં પ્રજાપતે ॥ ૧૫॥

બિન્દુબ્રહ્માત્મકો દેહઃ સોऽહં વક્ત્રં પ્રકીર્તિતમ્ ।
તયોરભેદકો બોધો બભાવેવ સ દેહવાન્ ॥ ૧૬॥

ત્રિવિધેષુ સ્થિતો દેવો તથાપિ તદ્વિવર્જિતઃ ।
વિદેહો ગજવક્ત્રશ્ચ શોભત સાઙ્ખ્યધારકઃ ॥ ૧૭॥

બોધત્યાગે મહાભાગ કઃ સઙ્ખ્યાં કુરુતે વદ ।
બ્રહ્મણાં તેન સાઙ્ખ્યં તદ્બ્રહ્મ વેદે પ્રકાશિતમ્ ॥ ૧૮॥

લોભાસુરવિનાશાય પ્રકટોऽભૂદ્ગજાનનઃ ।
દેવૈર્વિપ્રૈઃ પ્રજાનાથ પ્રાર્થિતો ભક્તિલાલસઃ ॥ ૧૯॥

ચતુર્થ્યાં મધ્યગે ભાનૌ દેહધારી સમાગતઃ ।

સા તિથિઃ પરમા તસ્ય પ્રીતિદા સમ્બભૂવ વૈ ॥ ૨૦॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચો રમ્યં દક્ષો હૃષ્ટમના મુને ।
જગાદ મુદ્ગલં વિપ્રં ચતુર્થીજ્ઞાનસિદ્ધયે ॥ ૨૧॥

દક્ષ ઉવાચ ।
કા ચતુર્થી તિથિઃ પ્રોક્તા શુક્લા કૃષ્ણા વદ પ્રભો ।
ગણનાથપ્રિયાઽત્યન્તં બભૂવ કથમેવ સા ॥ ૨૨॥

પુનઃ પુનસ્ત્વયા બ્રહ્મન્ કથિતં તદ્ વ્રતં શુભમ્ ।
અતો બ્રૂહિ ચતુર્થ્યાસ્ત્વં માહાત્મ્યં સકલં પરમ્ ॥ ૨૩॥

દક્ષસ્ય વચનં શ્રુત્વા હર્ષયુક્તો મહામુનિઃ ।
મુદ્ગલસ્તમથોવાચ ચતુર્થીસમ્ભવાં કથામ્ ॥ ૨૪॥

(Page ખં. ૪ અ. ૧ પાન ૨)
મુદ્ગલ ઉવાચ ।
સઙ્ક્ષેપેણ પ્રવક્ષ્યામિ ચતુર્થ્યાશ્ચ ચરિત્રકમ્ ।
ગણનાથપ્રિયં પૂર્ણં જ્ઞાસ્યસિ ત્વં પ્રજાપતે ॥ ૨૫॥

પુરા સૃષ્ટિં સ સૃષ્ટ્વા વૈ બ્રહ્મા લોકપિતામહઃ ।
સ્થિતાનાં તત્ર જન્તૂનાં કાલાર્થં સ દધે મનઃ ॥ ૨૬॥

નાનાકાર્યપ્રસિદ્ધ્યર્થં સઞ્ચિન્ત્ય ગણપં હૃદિ ।
અભવદ્ધ્યાનમાસ્થાય સંસ્થિતશ્ચિન્તયાન્વિતઃ ॥ ૨૭॥

તતસ્તસ્ય શરીરાદ્વૈ નિઃસૃતા પ્રકૃતિઃ પરા ।
મહામાયા તિથીનાં સા જનની કામરૂપિણી ॥ ૨૮॥

ચતુષ્પદાં તથા દક્ષ ચતુર્હસ્તાં સુશોભનામ્ ।
ચતુર્મુખયુતાં વીક્ષ્ય હર્ષિતોઽભૂત્ પ્રજાપતિઃ ॥ ૨૯॥

તતઃ સા તં નમસ્કૃત્ય તુષ્ટાવ જગદીશ્વરમ્ ।
નાનાસ્તોત્રૈઃ પ્રસાદ્યૈનમુવાચ ઘનનિઃસ્વના ॥ ૩૦॥

પ્રકૃતિરુવાચ ।
તવાઙ્ગનિઃસૃતાં માં ત્વં વિદ્ધિ બ્રહ્માણ્ડનાયક ।
આજ્ઞાં કુરુ પિતર્માં ચ કુર્વેઽહં ભાવયન્ત્રિતા ॥ ૩૧॥

સ્થાનં દેહિ તથા ભક્ષ્યં નાનાભોગાદિકં પ્રભો ।
મહ્યં દેવ દયાસિન્ધો નમસ્તે પરમેશ્વર ॥ ૩૨॥

તસ્યાસ્તદ્વચનં શ્રુત્વા તાં જગાદ પ્રજાપતિઃ ।
સૃષ્ટિં ગણેશં સઞ્ચિન્ત્ય વિચિત્રાં કુરુ માનદે ॥ ૩૩॥

સ તસ્યૈ ગણનાથસ્ય દદૌ મન્ત્રં ષડક્ષરમ્ ।
સવિધિં સા નમસ્કૃત્ય યયૌ તં વનમાદરાત્ ॥ ૩૪॥

તતાપ તપ ઉગ્રં સા નાસાગ્રનયના સતી ।
ગણેશં હૃદિ સન્ધ્યાય જજાપ મન્ત્રમુત્તમમ્ ॥ ૩૫॥

પ્રજાપતે ગતે વર્ષસહસ્રે તુ ગજાનનઃ ।
આયયૌ તાં મહાભાગામગદદ્ભક્તવત્સલઃ ॥ ૩૬॥

ગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગે બહૂન્ મનસિ વાઞ્છિતાન્ ।
નિરાહારેણ સન્તુષ્ટો દદામિ તપસા ચ તે ॥ ૩૭॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષિતા પ્રણનામ તમ્ ।
ગજાનનં પ્રસમ્પૂજ્ય તુષ્ટાવ ચ કૃતાઞ્જલિઃ ॥ ૩૮॥

પ્રકૃતિરુવાચ ।
નમસ્તે વિઘ્નનાથાય ગણેશાય પરાત્મને ।
અનાથાય વિશેષેણ સર્વનાથાય તે નમઃ ॥ ૩૯॥

નમો મૂષકવાહાય મૂષકધ્વજિને નમઃ ।
સ્વાનન્દપતયે તુભ્યં ગણાનાં પતયે નમઃ ॥ ૪૦॥

સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવિહારિણે ।
યોગેશાય સદા શાન્તિપ્રદાત્રે યોગિને નમઃ ॥ ૪૧॥

સર્વાદયે સદા સર્વપૂજ્યાય ભક્તપાલકા ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પતયે તે નમો નમઃ ॥ ૪૨॥

બ્રહ્મણે બ્રહ્મદાત્રે વૈ બ્રહ્મણાં પતયે નમઃ ।
સિદ્ધેશ્વરાય દેવાનાં દૈત્યાનાં પતયે નમઃ ॥ ૪૩॥

ચતુર્ભુજાય હેરમ્બ પરશોર્ધારકાય તે ।
અઙ્કુશન્ધારિણે તુભ્યં નિરઙ્કુશ નમો નમઃ ॥ ૪૪॥

રજસા સૃષ્ટિકર્ત્રે તે પાલને સાત્ત્વિકાય તે ।
તામસાય મહાહન્ત્રે ગુણેશાય નમો નમઃ ॥ ૪૫॥

સ્થાવરાય ચરાયૈવ ચરાચરમયાય તે ।
ચરાચરવિહીનાય બોધાય ચ નમો નમઃ ॥ ૪૬॥

ચતુર્વિધસ્વરૂપાય ચતુર્વિધસુખપ્રદ ।
ચતુઃસુખસ્વરૂપાય સ્વસંવેદ્યાય તે નમઃ ॥ ૪૭॥

વિનાયકાય સર્વેષાં નાયકાય નમો નમઃ ।
ગજાનનાય દેવાય દેવદેવેશ તે નમઃ ॥ ૪૮॥

કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ બ્રહ્મણસ્પતિરૂપિણમ્ ।
યં સ્તોતું ન સમર્થાશ્ચ યોગિનો વેદમુખ્યકાઃ ॥ ૪૯॥

તવદર્શનબોધેન તથાપિ સંસ્તુતો મયા ।
તેન તુષ્ટો ભવ સ્વામિન્ ભક્તિં દેહિ દૃઢાં ત્વયિ ॥ ૫૦॥

ઇતિ સ્તુત્વા ગણેશાનં દણ્ડવત્ પ્રણનામ તમ્ ।
તામુત્થાપ્ય ગણાધીશ ઉવાચ વ્રતમાતરમ્ ॥ ૫૧॥

(Page ખં. ૪ અ. ૨ પાન ૩)
ગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગે યં યમિચ્છસિ શોભને ।
તં તં દાસ્યામિ સુપ્રીતો ભક્ત્યા સ્તોત્રેણ તોષિતઃ ॥ ૫૨॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
યઃ પઠેચ્છૃણુયાદ્દેવિ ઈપ્સિતં લભતે નરઃ ॥ ૫૩॥

એકકાલં દ્વિકાલં વા ત્રિકાલં લભતે સદા ।
અવ્રતી વ્રતસાફલ્યં પઠનાન્નાત્ર સંશયઃ ॥ ૫૪॥

બ્રુવન્તં ગણનાથં સોવાચ ગમ્ભીરનિઃસ્વના ।
દેવી પ્રણમ્ય ભાવેન સાશ્રુનેત્રા પ્રજાપતે ॥ ૫૫॥

દેવ્યુવાચ ।
વરદોઽસિ ગણાધીશ તદા દેહિ ત્વયિ સ્થિરામ્ ।
ભક્તિં મે ચ તથા કાર્યે સામર્થ્યં કરુણાનિધે ॥ ૫૬॥

સૃષ્ટિસર્જનસામર્થ્યં દેહિ નાથ નમોઽસ્તુ તે ।

સદા તવ પ્રિયત્વં મે વિયોગો ન ચ તે ભવેત્ ॥ ૫૭॥

ઓમિત્યુક્ત્વા ગણાધીશો જગાદ વદતાં વરઃ ।
ચતુર્વિધપ્રદા દેવિ પ્રિયા મમ ભવિષ્યસિ ॥ ૫૮॥

તિથીનાં માતૃભાવેન ચતુર્થી સંજ્ઞિતા ભવ ।
વામભાગે સદા કૃષ્ણા શુક્લા દક્ષિણભાગકે ॥ ૫૯॥

મમ જન્મતિથિસ્ત્વં વૈ ભવિષ્યસિ ન સંશયઃ ।
સદા તવ વ્રતે સંસ્થાન્ પાલયામિ વિશેષતઃ ॥ ૬૦॥

મદીયવ્રતજા પુણ્યા તિથિસ્ત્વં ચ ભવિષ્યસિ ।
વ્રતેષુ ત્વત્સમં નૈવ દાયકં કુત્ર વર્તતે ॥ ૬૧॥

એવમુક્ત્વા ગણેશાનોઽતર્ધાનં પ્રચકાર હ ।
વ્રતમાતા પ્રજાનાથાઽભવત્તત્રૈવ સંસ્થિતા ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચતુર્થીતપોવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૪.૧

## ૪.૨ શુક્લકૃષ્ણચતુર્થીવરદાનવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો દેવી ગણાધ્યક્ષં સ્મૃત્વા સ્રષ્ટું મનો દધે ।
તતોઽકસ્માદ્ દ્વિધા સાઽભૂદ્વામદક્ષિણભાગતઃ ॥ ૧॥

વામભાગં કૃષ્ણવર્ણં દક્ષિણાઙ્ગં તથા બભૌ ।
શુક્લવર્ણં મહાભાગ તતઃ સા વિસ્મિતાઽભવત્ ॥ ૨॥

પુનર્ગણપતિં ધ્યાત્વા સ્રષ્ટું તત્રોપચક્રમે ।
તતસ્તસ્યા મુખામ્ભોજાત્ પ્રતિપન્નિઃસૃતા તિથિઃ ॥ ૩॥

નાસિકાયાં દ્વિતીયા વૈ વક્ષસશ્ચ તૃતીયિકા ।
અઙ્ગુલીભ્યસ્તથા દક્ષ પઞ્ચમી ચાભવત્તિથિઃ ॥ ૪॥

ઉત્પન્ના હૃદયાત્ ષષ્ઠી ચક્ષુષોઃ સપ્તમી બભૌ ।
અષ્ટમી બાહુદેશાચ્ચ સમુત્પન્ના મહાતિથિઃ ॥ ૫॥

નવમી તિથિરુત્પન્ના ઉદરાચ્ચ પ્રજાપતે ।

દશમી કર્ણદેશાદ્વૈ કણ્ઠાચ્ચૈકાદશી મતા ॥ ૬॥

દ્વાદશી પાદયોસ્તસ્યાઃ સમુત્પન્ના તથા વિભો ।
સ્તનાત્ ત્રયોદશી તસ્યા અહઙ્કારાચ્ચતુર્દશી ॥ ૭॥

મનસઃ પૂર્ણિમા જાતા અમાવાસ્યા તથાઽભવત્ ।
જિહ્વાયાઃ સર્વભાવેન તિથયો ભિન્નતાં દધુઃ ॥ ૮॥

કૃષ્ણા ચતુર્થી પ્રોક્તા યા તસ્યાઃ કૃષ્ણાઃ પ્રકીર્તિતાઃ ।
તિથયોઃ દશપઞ્ચાખ્યા જ્ઞાતવ્યા વિબુધૈઃ કિલ ॥ ૯॥

શુક્લાઃ શુક્લચતુર્થી દેહાચ્ચતુર્દશ વૈ મતાઃ ।
તિથયો વિધિવત્ સર્વા બભુઃ સ્વસ્વગુણાન્વિતાઃ ॥ ૧૦॥

દિનાંશાઃ પુરુષા જાતા રાત્રયઃ સ્ત્રીસ્વરૂપકાઃ ।
સ્વસ્વભાવવિહારજ્ઞા બભૂવુશ્ચ હિતે રતાઃ ॥ ૧૧॥

(Page ખં. ૪ અ. ૨ પાન ૪)
તિથિભિઃ સહિતા દેવી ચતુર્થી તપસિ સ્થિતા ।
ગણેશમભજન્નિત્યં મન્ત્રધ્યાનપરાયણા ॥ ૧૨॥

વર્ષેણૈકેન વિઘ્નેશસ્તાં યયૌ ભક્તવત્સલઃ ।
શુક્લાં મધ્યાહ્નસમયે કૃષ્ણાં ચન્દ્રોદયે તથા ॥ ૧૩॥

વરં બ્રૂહિ ગણેશાનસ્તામુવાચ વિશેષતઃ ।
પ્રણમ્ય વિઘ્નપં પૂજયિત્વા સ્તુત્વા જગાદ સા ॥ ૧૪॥

ચતુર્થ્યુવાચ ।
ત્વદેકનિલયાં દેવ માં કુરુષ્વ ગજાનન ।
નાન્યં યાચે વરં સ્વામિન્ ભક્તિમિચ્છામિ શાશ્વતીમ્ ॥ ૧૫॥

તસ્યાસ્તદ્વચનં શ્રુત્વા તાં જગાદ ગજાનનઃ ।
પ્રાપ્તં ચતુર્થિ મધ્યાહ્ને મદીયં દર્શનં ત્વયા ॥ ૧૬॥

અતો મધ્યાહ્નકાલેઽન્યે માં ભજન્તે શિવાદયઃ ।
ચતુર્થ્યાં શુક્લપક્ષસ્ય સ્થિતાયાં સર્વદા જનાઃ ॥ ૧૭॥

મદીયવ્રતમુખ્યત્વે ભવ ત્વં સર્વભાવતઃ ।
નિરાહારેણ માં તત્ર ત્વદ્યુક્તં પર્યુપાસતે ॥ ૧૮॥

ચતુર્વિધં પ્રદાસ્યામિ નાનાભાવનિયન્ત્રિતમ્ ।

સઞ્ચિતં નાસ્તિ ચેદ્દેવિ તથાપ્યત્ર ન સંશયઃ ॥ ૧૯॥

સઞ્ચિતં ચાસ્તિ ચેદ્વાપિ દદાસિ ત્વં મહામતે ।
અતસ્તે નામ વિખ્યાતં વરદેતિ ભવિષ્યતિ ॥ ૨૦॥

ત્વાં પૂજયન્તિ યે નૈવ મદ્યુક્તાં વ્રતભાવતઃ ।
તેષાં વ્રતાનિ સર્વાણિ નિષ્ફલાનિ ભવન્તુ વૈ ॥ ૨૧॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો દેવનાયકઃ ।
તદાદિ સા તિથિઃ ખ્યાતા વરદા ચ પ્રજાપતે ॥ ૨૨॥

ગણેશસ્ય પ્રિયાઽત્યન્તમિતિ જન્મતિથિઃ સ્મૃતા ।
તસ્યામુપોષણં કાર્યં નરૈરાત્મહિતેપ્સુભિઃ ॥ ૨૩॥

પઞ્ચમ્યાં પારણં દક્ષ કર્તવ્યં દ્વિજસાક્ષિકમ્ ।
ચતુર્વિધં ફલં તૈશ્ચ સમ્પ્રાપ્તં નાત્ર સંશયઃ ॥ ૨૪॥

યદ્યદિચ્છતિ તત્તત્ સ લભતે વ્રતકારકઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા સાયુજ્યં બ્રહ્મણસ્તથા ॥ ૨૫॥

તત્ર વ્રતે નરાઃ પાપા અન્નં ભક્ષન્તિ ચેત્ પ્રિયમ્ ।
નારકાસ્તે ભવિષ્યન્તિ હીના અન્નૈઃ પુનર્જનૌ ॥ ૨૬॥

એવં વરં ચતુર્થ્યૈ સ દદૌ વિઘ્નવિદારણઃ ।
સા તિથિઃ સર્વમાન્યા ચ બભૂવ વ્રતમૂલગા ॥ ૨૭॥

તતઃ કૃષ્ણાં ચતુર્થીં સ જગાદ ગણનાયકઃ ।
વરં વૃણુ મહાભાગે દાસ્યામિ મનસીપ્સિતમ્ ॥ ૨૮॥

શ્રુત્વા સા તં પ્રણમ્યાઽઽદૌ પૂજયિત્વા ગજાનનમ્ ।
સ્તુત્વા જગાદ વાક્યં વૈ હર્ષેણ મહતા યુતા ॥ ૨૯॥

કૃષ્ણચતુર્થ્યુવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા ભક્તિં દૃઢાં દેહિ ત્વદીયાં મે મહોદર ॥ ૩૦॥

ત્વત્પ્રિયત્વં સદા નાથ વિયોગો ન ભવેચ્ચ મે ।
સર્વમાન્યાં કુરુષ્વ ત્વદેકનિષ્ઠસ્વભાવતઃ ॥ ૩૧॥

તસ્યાસ્તદ્વચનં શ્રુત્વા તાં જગાદ ગજાનનઃ ।
સદા મમ પ્રિયાઽત્યન્તં ભવિષ્યસિ મહાતિથે ॥ ૩૨॥

ચન્દ્રોદયે ત્વયાઽહં વૈ પ્રાપ્તસ્તેન ચતુર્થિકે ।
તત્ કાલે ચ વ્રતં મુખ્યં ત્વદ્યુક્તં ભવતુ પ્રિયમ્ ॥ ૩૩॥

ન વિયોગો ભવેદ્ભક્તાઃ પ્રિયેઽન્નજલવર્જિતાઃ ।
ઉપાસતે ચ તેષાં ત્વં સઙ્કષ્ટહરણં કુરુ ॥ ૩૪॥

પ્રહરાન્ પઞ્ચ મદ્ભક્તાઃ પ્રિયેઽન્નજલવર્જિતાઃ ।
ઉપાસતે ચ તેષાં ત્વં સઙ્કષ્ટહરણં કુરુ ॥ ૩૫॥

ચતુર્વિધં સ્વસઙ્કષ્ટં જન્મ મૃત્યુશ્ચ કર્મજમ્ ।
વ્રતિનાં તત્ફલં કર્મ વિદ્યતે ન કદાચન ॥ ૩૬॥

ઇત્યાદિ વિવિધં દેવિ વિશેષેણ ચતુર્વિધમ્ ।
(Page ખં. ૪ અ. ૨ પાન ૫)
સઙ્કષ્ટદં હર ત્વં વૈ મત્પ્રસાદાચ્ચતુર્થિકે ॥ ૩૭॥

ન સઙ્કષ્ટં કદાચિદ્વૈ વ્રતકારિ નરસ્ય ચ ।
ભવેન્ મે ભક્તિયુક્તસ્ય પુનસ્ત્વદ્યુક્તસેવિનઃ ॥ ૩૮॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાપ્નુયાત્ ।
સઙ્કષ્ટહરણી નામ ભવેત્તવ ચતુર્થિકે ॥ ૩૯॥

ન કરોતિ ચતુર્થીં ચેન્નરો મદ્ભક્તિકારકઃ ।
નિષ્ફલં સકલં તસ્ય ભજનં વૈ ભવિષ્યતિ ॥ ૪૦॥

ત્વાં ત્યક્ત્વા યે નરાઃ પાપા વ્રતમન્યચ્ચ કુર્વતે ।
વ્રતાદિકં નિષ્ફલકં તેષાં સર્વં ભવિષ્યતિ ॥ ૪૧॥

વર્ણાશ્રમસ્થકો ભૂત્વા ચતુર્થીં ન કરોતિ ચેત્ ।
તસ્ય સર્વં સ્વધર્મસ્થં કર્મ યન્નિષ્ફલં ભવેત્ ॥ ૪૨॥

યતી રાત્રૌ નિરાહારયુક્તઃ સન્ વ્રતમાચરેત્ ।
સઙ્કષ્ટહરણં દેવિ સ્વાનન્દાર્થં ન સંશયઃ ॥ ૪૩॥

અન્યૈશ્ચ દ્વિજસંયુક્તૈર્ભોજનં દ્વિજસાક્ષિકમ્ ।
રાત્રૌ કર્તવ્યમેતસ્મિન્ માં પ્રપૂજ્ય વરાનને ॥ ૪૪॥

શ્રાવણે લડ્ડુકાન્ ભક્ષેત્ ભાદ્રકે દધિભોજનમ્ ।
નિર્જલં ત્વાશ્વિને પ્રોક્તં દુગ્ધપાનં ચ કાર્તિકે ॥ ૪૫॥

માર્ગશીર્ષે જલાહારઃ પૌષે ગોમૂત્રભક્ષણમ્ ।
માઘે માસિ તિલાન્ શુક્લાન્ ફાલ્ગુને ઘૃતશર્કરામ્ ॥ ૪૬॥

પઞ્ચગવ્યં મધૌ માસે વૈશાખે પદ્મબીજકમ્ ।
જ્યેષ્ઠે ઘૃતં ગવાં ભક્ષ્યમાષાઢે મધુભોજનમ્ ॥ ૪૭॥

યતીનાં સર્વદા હ્યેતત્ વ્રતં યુક્તં પ્રકીર્તિતમ્ ।
અન્યેષાં ભોજને નૈવાનેન વા વ્રતકં સ્મૃતમ્ ॥ ૪૮॥

યામમાત્રાઽવશિષ્ટાયાં રાત્રાવુત્થાય સત્વરમ્ ।
પ્રાતઃકૃત્યં સુસઙ્ક્ષેપાત્ કર્તવ્યં તન્નરેણ વૈ ॥ ૪૯॥

તથા માધ્યાહ્નિકં કર્મ કર્તવ્યં પ્રાતરેવ ચ ।
ચતુર્ઘટિકરાત્રૌ સૂર્યોદયઃ સ પ્રકીર્તિતઃ ॥ ૫૦॥

એવં કર્માદિકં કૃત્વા માં સમ્પૂજ્યાલ્પમન્ત્રતઃ ।
પ્રત્યક્ષોદયકાલે વૈ સૂર્યોપસ્થાનમાચરેત્ ॥ ૫૧॥

ચન્દ્રોદયસ્ય પર્યન્તં શમીમૂલે જપં જપેત્ ।
મદીયં મૌનિભાવેન પશ્ચાત્ સ્નાનં સમાચરેત્ ॥ ૫૨॥

સાયાહ્નકાલજં કર્મ તત્ર કુર્યાન્નરોત્તમઃ ।
વિધિના પૂજ્ય માં પશ્ચાદર્ઘ્યદાનં સમાચરેત્ ॥ ૫૩॥

આદૌ તેઽર્ઘ્યપ્રદાનં ચ તતો મેઽર્ઘ્યનિવેદનમ્ ।
તતઃ સપ્તાર્ઘ્યદાનં વ્રતી ચન્દ્રાય સમાચરેત્ ॥ ૫૪॥

બ્રાહ્મણૈઃ પૂજિતૈર્દેવિ નરઃ કુર્યાચ્ચ ભોજનમ્ ।
મોદકાપૂપલડ્ડૂકપાયસાદિભિરાદરાત્ ॥ ૫૫॥

રાત્રૌ જાગરણં કુર્યાન્ મદીયકથયાન્વિતઃ ।
પઞ્ચમ્યામુપચારૈઃ સમ્પૂજયન્ માં પ્રયત્નતઃ ॥ ૫૬॥

એવં વ્રતં નરઃ કુર્યાત્ સ વૈ સર્વાર્થસિદ્ધિભાક્ ।
ભવિષ્યત્યમરૈર્માન્યોઽન્તે બ્રહ્મણિ લયં વ્રજેત્ ॥ ૫૭॥

યથાઽહં દેવતાદીનાં પૂજ્યઃ સર્વાદિભાવતઃ ।
તથા ત્વં વ્રતજાતીનામાદિપૂજ્યા ભવિષ્યસિ ॥ ૫૮॥

શુક્લાં કૃષ્ણાં ચતુર્થીં યે કરિષ્યન્ત્યમરાદયઃ ।
સર્વવ્રતાદિ ભાવેષુ તેષાં સિદ્ધિર્ભવિષ્યતિ ॥ ૫૯॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
ચતુર્થી ભક્તિસંયુક્તાઽભવત્તત્રૈવ સંસ્થિતા ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શુક્લકૃષ્ણચતુર્થીવરદાનવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૪.૨

## ૪.૩ પ્રતિપદાદિવ્રતવર્ણનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો ગણપતિર્દક્ષ યયૌ સર્વતિથીઃ પ્રતિ ।
ઉવાચ વૃણુત પ્રાજ્ઞા વરં યં મનસીપ્સિતમ્ ॥ ૧॥

શ્રુત્વા ગણપતેર્વાક્યં પ્રણમ્ય ગણનાયકમ્ ।
પૂજયિત્વા ચ તં સ્તુત્વા જગદુસ્તિથયઃ પરાઃ ॥ ૨॥

પ્રતિપદાદ્યા ઉચુઃ ।
યદિ વિઘ્નેશ્વર સ્વામિન્ વરદોઽસિ ગજાનન ।
કિં કર્તવ્યં દયાસિન્ધો અસ્માભિર્વદ સામ્પ્રતમ્ ॥ ૩॥

સ્વસ્વવ્યાપારજં દેવં સામર્થ્યં દેહિ ચાદ્ભુતમ્ ।
ભક્તિં ત્વદીયપાદાબ્જે સર્વં માન્યં ત્વયા પ્રભો ॥ ૪॥

તાસાં વચનમાકર્ણ્ય જગાદ ગણનાયકઃ ।
તાઃ શ ૃણુ ત્વં પ્રજાનાથ સર્વેષાં હિતકારકમ્ ॥ ૫॥

ગણેશ ઉવાચ ।
મદીયા ભક્તિરત્યન્તં ભવિષ્યતિ ન સંશયઃ ।
ભવતીનાં મહાભાગાસ્તિથયઃ પુણ્યભાગિકાઃ ॥ ૬॥

મત્કલાંશસમુદ્ભૂતા દેવાસ્તાન્ પ્રીણયન્તુ વૈ ।
ભવતીભિર્યુતા દેવા નરાણાં પ્રીતિદાઽસ્તુ ચ ॥ ૭॥

સદા વહ્નિં પ્રતિપદિ પૂજયિષ્યન્તિ યે નરાઃ ।
હુતદ્રવ્યૈશ્ચ હુત્વા તં દુગ્ધાહારા વ્રતે રતાઃ ॥ ૮॥

ઉપોષણં કરિષ્યન્તિ તૈશ્ચ દેવાઃ સહેશ્વરાઃ ।

તોષિતાસ્તે સદા તેભ્યો દાસ્યન્તિ મનસીપ્સિતમ્ ॥ ૯॥

તે મૃતાઃ સઙ્ગમિષ્યન્ત્યગ્નિલોકે ભોગકારકાઃ ।
અગ્નિતુલ્યપ્રકાશેન વિમાનેન વિહાયસા ॥ ૧૦॥

ચરિષ્યન્તિ ન સન્દેહઃ પ્રતિપદ્વ્રતકારકાઃ ।
બ્રહ્માર્પણસ્વભાવેન ગમિષ્યન્તિ મદાત્મનિ ॥ ૧૧॥

દ્વિતીયાયાં નરો યસ્તુ પૂજયેદશ્વિનૌ શુભૌ ।
પત્રાહારસમાયુક્તો રૂપવાન્ જાયતે કિલ ॥ ૧૨॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે તલ્લોકમાપ્નુયાત્ ।
દ્વિતીયાવ્રતકારી સ દેવમાન્યો ભવિષ્યતિ ॥ ૧૩॥

બ્રહ્માર્પણસ્વભાવેન દ્વિતીયાવ્રતમાચરેત્ ।
સ સ્વાનન્દે મદીયે વૈ લીનશ્ચૈવ ભવિષ્યતિ ॥ ૧૪॥

તૃતીયાયાં મહાશક્તિં પૂજયેદ્ભક્તિસંયુતઃ ।
સર્વૈઃ સૌભાગ્યદૈર્દ્રવ્યૈર્લવણાહારવર્જિતઃ ॥ ૧૫॥

સ શક્તિલોકગો ભૂત્વા ભોગયુક્તો ભવિષ્યતિ ।
બ્રહ્માર્પણતયા સોઽપિ મલ્લોકે ચાગમિષ્યતિ ॥ ૧૬॥

પઞ્ચમ્યાં નાગમુખ્યાંશ્ચ દુગ્ધેન સ્નાપયેન્નરઃ ।
પૂજયેત્તાન્ પ્રયત્નેન નિરમ્લાહારકારકઃ ॥ ૧૭॥

સ નાગલોકગો ભૂત્વા ભોગયુક્તશ્ચરિષ્યતિ ।
નિષ્કામેન મદીયે વૈ લોકેંઽતે આગમિષ્યતિ ॥ ૧૮॥

ષષ્ઠ્યાં સ્કન્દં ફલાહારઃ પૂજયેદ્ભક્તિસંયુતઃ ।
સ્કન્દલોકે ચરેત્ સોઽપિ મહાભોગપરાયણઃ ॥ ૧૯॥

નિષ્કામભાવયુક્તશ્ચેત્ સ્વાનન્દેંઽતે ગમિષ્યતિ ।
શુક્લગત્યાઃ ક્રમેણૈવ સર્વભાવનિયન્ત્રિતઃ ॥ ૨૦॥

સપ્તમ્યામર્ચયેત્ સૂર્યમુપોષણપરાયણઃ ।
સ સૂર્યલોકમાશ્રિત્ય પ્રચરેદ્ભોગસંયુતઃ ॥ ૨૧॥

નિષ્કામવ્રતકારી ચેન્ મહાલયસમુત્થિતે ।
સ્વાનન્દે મે સદેહો વૈ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૨૨॥

અષ્ટમ્યાં માતૃકાનાં યઃ પૂજકો ભાવસંયુતઃ ।
બિલ્વાહારસમાયુક્તો માતૃકાલોકગો ભવેત્ ॥ ૨૩॥

મદર્પણસ્વભાવેન સદા વ્રતપરાયણઃ ।
અષ્ટમ્યાં સોઽપિ મલ્લોકે ગચ્છેત્ ક્રમવિનિશ્ચિતે ॥ ૨૪॥

નવમ્યામેવ દુર્ગાયાઃ પૂજનં યઃ સમાચરેત્ ।
પિષ્ટાશી ભોગસંયુક્તોંઽતે તલ્લોકમવાપ્નુયાત્ ॥ ૨૫॥

(Page ખં. ૪ અ. ૩ પાન ૭)
બ્રહ્માર્પણતયા સોઽપિ નિજલોકે ગમિષ્યતિ ।
શુક્લગત્યા મહાભાગો બ્રહ્મભૂતો ન સંશયઃ ॥ ૨૬॥

દશમ્યાં વ્રતસંસ્થો યો દધિભક્ષણસંયુતઃ ।
દિશાં દિગીશકાનાં વૈ પૂજકસ્તત્પ્રિયો ભવેત્ ॥ ૨૭॥

ઇહ ભુક્ત્વાઽખિલાત્ ભોગાનન્તે તલ્લોકમાપ્નુયાત્ ।
નિષ્કામવ્રતભાવેન બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૨૮॥

એકાદશ્યાં નરો ભક્ષેદ્વહ્નિપક્વવિવર્જિતમ્ ।
ધનપં પૂજયેચ્ચૈવ ભક્તિયુક્તેન ચેતસા ॥ ૨૯॥

સ વૈ તસ્ય વસેલ્લોકે નાનાભોગકરઃ સદા ।
બ્રહ્માર્પણતયા તદ્વદ્વ્રતં કૃત્વા સુખી ભવેત્ ॥ ૩૦॥

વિષ્ણું સમ્પૂજયેદ્યો વૈ દ્વાદશ્યાં ઘૃતભોજનઃ ।
સ વિકુણ્ઠે વસેન્નિત્યં નાનાભોગપરાયણઃ ॥ ૩૧॥

બ્રહ્માર્પણવિધાનેન વ્રતં કુર્યાદ્યદા નરઃ ।
મહાલયે મદીયે સ લોકે બ્રહ્મમયો ભવેત્ ॥ ૩૨॥

ધર્મં ત્રયોદશીસંસ્થં પૂજયેત્ ક્ષીરભોજનઃ ।
સ ધર્મલોકગો ભૂત્વા ભુઞ્જીત વિવિધં સુખમ્ ॥ ૩૩॥

બ્રહ્માર્પણતયા યેન સાધિતા ચેત્ ત્રયોદશી ।
સ સ્વાનન્દે સમાગમ્ય બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૩૪॥

ચતુર્દશ્યાં શિવં યશ્ચ પૂજયેદ્ભક્તિસંયુતઃ ।
ઉપોષણસમાયુક્તો ગોધૂમાન્નેન પારણમ્ ॥ ૩૫॥

કરિષ્યતિ ચ કૈલાસે વાસસ્તસ્ય ભવિષ્યતિ ।

નિષ્કામશ્ચેત્તદન્તે સ મલ્લોકે મન્મયો ભવેત્ ॥ ૩૬॥

પૂર્ણિમાયાં દેવગણાન્ દેવાંશ્ચન્દ્રમસં તથા ।
પૂજયેદ્ભક્તિભાવેન ચન્દ્રલોકં સ આપ્નુયાત્ ॥ ૩૭॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે દેવાન્ ગમિષ્યતિ ।
નિષ્કામનો મદીયે સ લોકે બ્રહ્મમયો ભવેત્ ॥ ૩૮॥

ઉપોષણસમાયુક્તોઽર્ઘ્યદાનં યઃ કરિષ્યતિ ।
ચન્દ્રાય નિશિભુગ્ વાઽપિ સર્વદેવપરાયણઃ ॥ ૩૯॥

સર્વદેવમયી રમ્યા પૂર્ણિમા પરિકીર્તિતા ।
ચાન્દ્રી ચૈવ તથા જ્ઞેયા તિથિઃ પુણ્યપ્રદા મતા ॥ ૪૦॥

અમાયાં તર્પયેદ્યો વૈ પિતૄન્ પિતૃપરાયણઃ ।
ઉપોષણં વા કુર્વીત સ સર્વાર્થમવાપ્નુયાત્ ॥ ૪૧॥

અન્તે પિતૃમયે લોકે વસતિસ્તસ્ય સમ્ભવેત્ ।
આગમિષ્યતિ નિષ્કામશ્ચેત્ સ્વાનન્દે સ તલ્લયે ॥ ૪૨॥

કૃષ્ણાઃ શુક્લાઃ સદા પૂજ્યાસ્તિથયો વ્રતકારિણા ।
એવં ભાવયુતેનૈવ સ સર્વાર્થમવાપ્નુયાત્ ॥ ૪૩॥

મત્પ્રિયાસ્તિથયઃ સર્વા ભવિષ્યથ ન સંશયઃ ।
મત્કલાંશયુતૈર્દેવૈઃ સંયુક્તાઃ પ્રભવેત વૈ ॥ ૪૪॥

ચતુર્થીં યે ન કુર્વન્તિ તેષાં સર્વં નિરર્થકમ્ ।
ભવદીયવ્રતે સંસ્થં ભવિષ્યતિ ન સંશયઃ ॥ ૪૫॥

અતશ્ચતુર્થીસંયુક્તાઃ સદા ભવત માનદાઃ ।
તિથયઃ કાલમાનેન સર્વપૂજ્યા ભવિષ્યથ ॥ ૪૬॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો ગણવલ્લભઃ ।
તથા જાતં પ્રજાનાથ તિથિયુક્તવ્રતં સદા ॥ ૪૭॥

ચતુર્થીજં ચ માહાત્મ્યં તિથીનાં યદ્વિશેષતઃ ।
શૃણુયાદ્યઃ પઠેદ્વાઽપિ સ સર્વાર્થમવાપ્નુયાત્ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે પ્રતિપદાદિવ્રતવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૪.૩

(Page ખં. ૪ અ. ૪ પાન ૮)

# ૪.૪ દશરથવ્રતોપદેશો નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અધુના શૃણુ દક્ષ ત્વં સંવાદં તં પુરાતનમ્ ।
દશરથસ્ય રાજર્ષેર્વસિષ્ઠસ્ય મહાત્મનઃ ॥ ૧॥

યેન ત્વં તિથિમુખ્યાયાશ્ચતુર્થ્યા વ્રતજે પરે ।
મહિમ્નિ નિપુણોઽત્યન્તં સમ્ભવેર્બ્રહ્મપુત્રક ॥ ૨॥

મહાયશા દશરથો વન્ધ્યદોષભયાર્દિતઃ ।
વસિષ્ઠં શરણં ગત્વા નત્વા પપ્રચ્છ તં મુનિમ્ ॥ ૩॥

દશરથ ઉવાચ ।
પુત્રપ્રાપ્ત્યર્થમેવં ભો વદોપાયં મહામુને ।
શિષ્યં માં શાધિ ભાવજ્ઞ તારયસ્વ ભવાર્ણવાત્ ॥ ૪॥

તતસ્તં મુનિશાર્દૂલ ઉવાચ નૃપમુત્તમમ્ ।
કુલદેવં ગણેશં તે ભજસ્વ વ્રતસંયુતઃ ॥ ૫॥

વસિષ્ઠસ્ય વચઃ શ્રુત્વા પુનસ્તં પ્રણનામ હ ।
પપ્રચ્છ વિનયેનૈવ સંયુતઃ સ નૃપોત્તમઃ ॥ ૬॥

કીદૃશં તદ્વ્રતં વિપ્ર ગણેશસ્ય મહાત્મનઃ ।
કૃતં કેન વ્રતં તત્ર ભવેત્ સિદ્ધિશ્ચ કીદૃશી ॥ ૭॥

કસ્મિન્ કાલે વ્રતં કાર્યં પૂજનં કીદૃશં મુને ।
વદ સર્વં વિશેષેણ કરિષ્યામિ ત્વદાજ્ઞયા ॥ ૮॥

વસિષ્ઠ ઉવાચ ।
ચતુર્થી ગણનાથસ્ય પ્રિયાઽત્યન્તં નૃપોત્તમ ।
શુક્લા કૃષ્ણા સમાખ્યાતા સર્વસિદ્ધિપ્રદા ભવેત્ ॥ ૯॥

ચન્દ્રોદયે યદા પ્રાપ્તા કૃષ્ણા સૈવ ચતુર્થિકા ।
સા સઙ્કષ્ટહરા પ્રોક્તા ચતુર્વિધફલપ્રદા ॥ ૧૦॥

ચતુર્વિધં જગત્ સર્વં જાનીહિ ત્વં નૃપાત્મજ ।
સઙ્કષ્ટં તત્ સમાખ્યાતં બન્ધનેન વિશેષતઃ ॥ ૧૧॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ સઙ્કષ્ટીકરણાન્નૃપ ।
સર્વસઙ્કટહીનઃ સ સ્વાનન્દે પ્રગમિષ્યતિ ॥ ૧૨॥

યદા ચન્દ્રોદયે ભૂપ ચતુર્થી નૈવ લભ્યતે ।
પ્રદોષવ્યાપિની ગ્રાહ્યા સર્વસઙ્કટમુક્તયે ॥ ૧૩॥

ઉભયે ચન્દ્રસંયુક્તા પ્રાપ્તા સા વ્રતધારિણી ।
તદા સ્વેચ્છાવિહારેણ કર્તવ્યા ચન્દ્રવ્યાપિની ॥ ૧૪॥

તૃતીયાયાં પ્રદોષાચ્ચ ચન્દ્રસ્યોદયગા ભવેત્ ।
તદા સૈવ સદા ગ્રાહ્યા પરાં ત્યક્ત્વા વિશેષતઃ ॥ ૧૫॥

શુક્લા સા વરદા પ્રોક્તા ચતુર્ણાં નાત્ર સંશયઃ ।
સઞ્ચિતાઽસઞ્ચિતાનાં વૈ વ્રતકારિજનાય ચ ॥ ૧૬॥

ધર્માર્થકામમોક્ષાદ્યાશ્ચત્વારો યે પદાર્થકાઃ ।
તાન્ દદાતિ ગણેશસ્ય પ્રીતિદા સા ચતુર્થિકા ॥ ૧૭॥

મધ્યાહ્નવ્યાપિની ગ્રાહ્યા સદા શુક્લચતુર્થિકા ।
ઉભયત્ર યદા નાપ્તા પૂર્વવિદ્ધા મતા તિથિઃ ॥ ૧૮॥

ઉભયત્ર યદા પ્રાપ્તા ભવેત્ પ્રહરભાનુગા ।
તૃતીયા ચેત્તદા સાઽપિ પૂર્વવિદ્ધા મતા તિથિઃ ॥ ૧૯॥

પ્રહરાદૂર્ધ્વગા ભૂપ તૃતીયા સૂર્યસંયુતા ।
તદા પૂર્વા પરા વાઽપિ કાર્યા સૈવ ચતુર્થિકા ॥ ૨૦॥

ચતુર્થીવ્રતહીનસ્ય ફલહીનાનિ ભૂમિપ ।
વ્રતાનિ સર્વકાલેષ્વાદ્યા કાર્યા સા તતઃ પ્રભો ॥ ૨૧॥

એતદ્વ્રતં મહાભાગ બ્રહ્મણાઽઽચરિતં પુરા ।
વ્રતસ્યૈવ પ્રભાવેણ નિર્મમે સકલં જગત્ ॥ ૨૨॥

વિષ્ણુના શઙ્કરેણૈવ કૃતં વ્રતમનુત્તમમ્ ।
પાલને હરણે દેવૌ સમર્થૌ તૌ બભૂવતુઃ ॥ ૨૩॥

યોગિભિઃ શુકમુખ્યૈશ્ચ કશ્યપાદિમુનીશ્વરૈઃ ।
મુનિભિશ્ચ કૃતં પૂર્વં સ્વસ્વકાર્યાર્થસિદ્ધયે ॥ ૨૪॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગા બભુઃ ।
નાનેન સદૃશં વિદ્ધિ ચતુર્ણાં સાધકં નૃપ ॥ ૨૫॥

અન્યૈર્નાનાવિધૈરેતત્ કૃતં વર્ણાશ્રમસ્થિતૈઃ ।
(Page ખં. ૪ અ. ૫ પાન ૯)
તે સર્વે બ્રહ્મભૂતા વૈ યયુઃ સ્વાનન્દકે પુરે ॥ ૨૬॥

એતદ્ વ્રતં મહીપાલ કુરુ ત્વં ભાવસંયુતઃ ।
ભવિતાઽસિ સપુત્રશ્ચ તથા સ્વાનન્દગો ભવેઃ ॥ ૨૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે દશરથવ્રતોપદેશો નામ ચતુર્થોઽધ્યાયઃ ॥ ૪.૪

## ૪.૫ ચતુર્થીવિવેકવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
બ્રહ્માદિભિઃ કથં વિપ્ર ચતુર્થીગં વ્રતં કૃતમ્ ।
ગણનાથપ્રિયં પૂર્ણં વદ સર્વં પ્રવિસ્તરાત્ ॥ ૧॥

દક્ષ ઉવાચ ।
વદ મુદ્ગલ માહાત્મ્યં ચતુર્થ્યાસ્ત્વં પ્રવિસ્તરાત્ ।
શ્રુત્વા કથાં મહારમ્યાં ન તૃપ્યામિ મુનીશ્વર ॥ ૨॥

દક્ષસ્ય ભક્તિસંયુક્તં વાક્યં શ્રુત્વા મહામુનિઃ ।
જગાદ તં વિશેષજ્ઞો મુદ્ગલઃ શ઼ૃણુ શૌનક ॥ ૩॥

વચનં નૃપવર્યસ્ય શ્રુત્વા દશરથસ્ય ચ ।
જગાદ તં મુનિશ્રેષ્ઠો વસિષ્ઠઃ સર્વવિત્ પ્રભુઃ ॥ ૪॥

વસિષ્ઠ ઉવાચ ।
કદાચિત્ પ્રલયે વૃત્તે નષ્ટે સ્થાવરજઙ્ગમમ્ ।
પઞ્ચભૂતમયં સર્વં વ્યવસ્થાસંયુતં પુરા ॥ ૫॥

શૂન્યવત્ સર્વભાવૈસ્તદ્ધીનં બ્રહ્મમયં બભૌ ।
યોગનિદ્રા ગણેશસ્ય સૈવ વેદે પ્રકથ્યતે ॥ ૬॥

પુનઃ સ કસ્મિંશ્ચિત્કાલે વેદવાગ્ભિઃ પ્રબોધિતઃ ।
ગણેશો નિર્મમે સર્વં તત્ત્વૈસ્તત્ત્વપ્રધારકઃ ॥ ૭॥

ત્રિગુણેભ્યઃ સમુત્પન્ના દેવાઃ પઞ્ચ નૃપેશ્વર ।
બ્રહ્મા વિષ્ણુઃ શિવઃ શક્તિઃ સૂર્યઃ સર્વધરા બભુઃ ॥ ૮॥

તૈસ્તપશ્ચરિતં ઘોરમેકાક્ષરવિધાનતઃ ।
તપસા ગણનાથસ્તુ પ્રસન્નઃ પ્રબભૂવ હ ॥ ૯॥

હૃદયે દર્શયામાસ સ્વાત્માનં સર્વદં પરમ્ ।
તેન જ્ઞાનયુતા જાતા દેવાઃ પઞ્ચ નરેશ્વર ॥ ૧૦॥

તૈશ્ચ સમ્પ્રાર્થિતો યોગી ભૃશુણ્ડી સર્વપારગઃ ।
તેન સમ્પ્રેષિતા દેવા આયયુર્નગરે નિજે ॥ ૧૧॥

કર્મભૂમૌ ગણેશસ્ય ક્ષેત્રં સ્વાનન્દવાચકમ્ ।
વેદૈઃ સન્દર્શિતં સ્થાપયામાસુસ્તત્ર વિઘ્નપમ્ ॥ ૧૨॥

યસ્મિન્ કાલે ચ દેવેશૈઃ સ્થાપિતા મૂર્તિરાદરાત્ ।
તસ્મિન્ કાલે ચતુર્થી સા ભાદ્રી શુક્લા બભૂવ હ ॥ ૧૩॥

મધ્યાહ્નસમયે સંસ્થા સા મુખ્યા પ્રબભૂવ હ ।
તત આરાધિતસ્તૈઃ સ ગણરાજો વિશેષતઃ ॥ ૧૪॥

માઘમાસે સિતે પક્ષે ચતુર્થ્યાં રાજસત્તમ ।
પ્રકટોઽભૂત્ પુરસ્તેષાં વરદાતા ગજાનનઃ ॥ ૧૫॥

વરપ્રસાદેન તસ્ય નિર્મિતં સકલં જગત્ ।
દેવેશૈઃ સા તિથિર્મુખ્યા બભૂવ વરદાયિની ॥ ૧૬॥

બ્રહ્માદિભિશ્ચ સર્વેભ્ય ઉપદિષ્ટા ચતુર્થિકા ।
આદૌ કાલે તથા તત્ર જ્યેષ્ઠી મુખ્યા બભૂવ સા ॥ ૧૭॥

જ્યેષ્ઠશુદ્ધચતુર્થ્યાં તદ્વ્રતદાનં કૃતં પુરા ।
તસ્મિન્ કાલે ધૃતા સર્વૈઃ સદ્યઃ સા વરદાયિની ॥ ૧૮॥

અતો મુખ્યત્વમાપન્ના જ્યેષ્ઠી માઘી ચ ભાદ્રિકા ।
ચતુર્થી નૃપશાર્દૂલ શુક્લપક્ષેષુ સર્વદા ॥ ૧૯॥

તત્ર ભાદ્રપદે માસે ચતુર્થી યા મહામતે ।
શુક્લા સાઽત્યન્તભાવેન મુખ્યા જાતાઽદ્ય ભાવતઃ ॥ ૨૦॥

(Page ખં. ૪ અ. ૫ પાન ૧૦)
ચતુર્થી સમભાવેન ન કિઞ્ચિદ્વર્તતે વ્રતમ્ ।

અતઃ કિં વર્ણનીયં વૈ તદૌપમ્યં તદેવ ચ ॥ ૨૧॥

ભાદ્રે ચતુર્થી યા શુક્લા સાધિતા સા નરેણ ચેત્ ।
સ દ્વાદશચતુર્થીસમ્ભવં પુણ્યં સમાપ્નુયાત્ ॥ ૨૨॥

અઙ્ગારકયુતા ભૂપ સા નરેણ કૃતા ભવેત્ ।
ચતુર્થી ષોડશભવં પુણ્યં પ્રાપ્તં ન સંશયઃ ॥ ૨૩॥

નરેણ ધીમતા સા ચેદ્યદિ ચન્દ્રયુતા કૃતા ।
ચતુર્થી વિંશતિભવં ફલં પ્રાપ્તં મહામતે ॥ ૨૪॥

યદિ સ્વાતિયુતા ભૂપ ચન્દ્રવારેણ ચેત્કૃતા ।
પ્રાપ્તં ચતુર્વિંશતિચતુર્થીજં કિલ પુણ્યકમ્ ॥ ૨૫॥

માઘે શુક્લચતુર્થી સા કૃતા ચેન્નાત્ર સંશયઃ ।
અષ્ટાનાં ચ ચતુર્થીનાં ફલં પ્રાપ્તં નરેણ તત્ ॥ ૨૬॥

અઙ્ગારકયુતા ચેદ્વૈ સાધિતા સા નરેણ ચ ।
દ્વાદશાનાં ચતુર્થીનાં પુણ્યં પ્રાપ્તં વ્રતોદ્ભવમ્ ॥ ૨૭॥

જ્યેષ્ઠે શુક્લચતુર્થી યઃ કરોતિ વ્રતધારકઃ ।
ચતુશ્ચતુર્થીજં પુણ્યં લભતે સ નરાધિપ ॥ ૨૮॥

અઙ્ગારકયુતા ચેદ્ દ્વાદશભિઃ સમતાં વ્રજેત્ ।
નરેણ સા પ્રયત્નેન કર્તવ્યા સર્વદાયિકા ॥ ૨૯॥

અન્યેષુ શ્રાવણાદ્યેષુ ચતુર્થી વરદા કૃતા ।
ધર્માર્થકામમોક્ષાણાં દાત્રી શાસ્ત્રેષુ સમ્મતમ્ ॥ ૩૦॥

તત્ર શ્રાવણમાસે યા ચતુર્થી વરદા મતા ।
દ્વિચતુર્થીભવં પુણ્યં દદાતિ વ્રતકારિણે ॥ ૩૧॥

ચતુર્થ્યા મહિમાઽનન્તોઽશક્યો વર્ણયિતું ભવેત્ ।
ચતુઃપદપ્રદા પ્રોક્તા સા કથં વર્ણ્યતે મયા ॥ ૩૨॥

અધુના શૃણુ રાજેન્દ્ર કૃષ્ણપક્ષે સમાગતામ્ ।
ચતુર્થી સર્વદાં પુણ્યાં સઙ્કષ્ટહરિણીં શુભામ્ ॥ ૩૩॥

ચતુર્વિધં ચ સઙ્કષ્ટં પ્રાપ્તં સર્વૈર્નરાધિપ ।
જન્મમૃત્યુવ્યવસ્થાખ્યં ચતુર્થં કર્મજં ફલમ્ ॥ ૩૪॥

ઇત્યાદિબહવો ભેદાઃ કથનં નૈવ શક્યતે ।
ચતુર્વિધં જગત્ સર્વં પઞ્ચમં બ્રહ્મ ઉચ્યતે ॥ ૩૫॥

ચતુર્વિધં સુસઙ્કષ્ટં વ્રતમાત્રેણ હન્તિ યા ।
સઙ્કષ્ટહરિણી પ્રોક્તા ચતુર્થી કૃષ્ણપક્ષગા ॥ ૩૬॥

તસ્યાપિ મહિમાનં કઃ ક્ષમો વર્ણયિતું ભવેત્ ।
સર્વસિદ્ધિપ્રદાયાસ્તુ વ્રતાચરણમાત્રતઃ ॥ ૩૭॥

માઘમાસે કૃતાઽઽદૌ ચ બ્રહ્મણા વિશ્વયોનિના ।
અતઃ સા મુખ્યતાં પ્રાપ્તાઽષ્ટચતુર્થીવ્રતૈઃ સમા ॥ ૩૮॥

અઙ્ગારકયુતા તત્ર વિંશત્યા સમતાં વ્રજેત્ ।
સાધિતા વ્રતભાવેન ચેન્નરેણ નરાધિપ ॥ ૩૯॥

શ્રાવણે યા સમાખ્યાતા ચતુર્થી કૃષ્ણપક્ષગા ।
ચતુશ્ચતુર્થીતુલ્યા સા ભવત્યત્ર ન સંશયઃ ॥ ૪૦॥

બ્રહ્મણા ચોપદિષ્ટા વૈ શ્રાવણે સા તતોઽધિકા ।
આદૌ દેવમુનીન્દ્રેભ્યઃ સર્વસઙ્કષ્ટહારિણી ॥ ૪૧॥

ભાદ્રમાસે નરાધીશ ચતુર્થી કૃષ્ણપક્ષગા ।
ચતુશ્ચતુર્થીતુલ્યા સા શૃણુ કારણમત્ર વૈ ॥ ૪૨॥

દેવાનાં ગણનાથશ્ચ વરદઃ સમ્બભૂવ હ ।
વ્રતમાત્રેણ તસ્માત્ સા મુખ્યા જાતા ન સંશયઃ ॥ ૪૩॥

અઙ્ગારકયુતા કુત્ર સમ્પ્રાપ્તા ચેત્ સુસિદ્ધિદા ।
દ્વાદશવ્રતજં પુણ્યં દદાતિ વ્રતકારિણે ॥ ૪૪॥

શુક્લા કૃષ્ણા સદા કાર્યા ચતુઃપદસુસિદ્ધયે ।
અન્યથા સિદ્ધિહીનાનિ પ્રભવન્તિ વ્રતાનિ ચ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચતુર્થીવિવેકવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૪.૫
(Page ખં. ૪ અ. ૬ પાન ૧૧)

## ૪.૬ ચન્દ્રદર્શનદોષહરણચરિતવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
અઙ્ગારકયુતા સ્વામિન્ કથં શ્રેષ્ઠા બભૂવ સા ।
તન્મે બ્રૂહિ વિશેષેણ સંશયોઽત્ર મહાંશ્ચ મે ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ભરદ્વાજાત્ સમુત્પન્નઃ પૃથ્વ્યાં ભૌમો મહામતિઃ ।
ગણાનાં ત્વેતિમન્ત્રેણ પૂજયામાસ વિઘ્નપમ્ ॥ ૨॥

તતાપ સ તપો રમ્યં ધ્યાત્વા દેવં ગજાનનમ્ ।
પારિનેરાખ્ય નગરાત્ પશ્ચિમે વનસંસ્થિતઃ ॥ ૩॥

શતવર્ષૈર્ગણાધ્યક્ષઃ પ્રસન્નસ્તં યયૌ નૃપ ।
વરં બ્રૂહિ મહાભાગ ભૂમિપુત્રેતિ સોઽબ્રવીત્ ॥ ૪॥

તતો ભૌમો ગણાધીશં પૂજયન્ ભક્તિભાવતઃ ।
સ્તુત્વા તં સ જગાદેતિ વરં સર્વસુખપ્રદમ્ ॥ ૫॥

નરદેહેન યુક્તોઽહં તથાપિ ગણનાયક ।
ઇચ્છામિ ચામૃતં પાતું ગ્રહં માં કુરુ માનદ ॥ ૬॥

તવ ભક્ત્યેકનિલયં નામ્ના મઙ્ગલસંજ્ઞકમ્ ।
ઋણહર્તારમેવં માં પ્રભો કુરુ ધનપ્રદમ્ ॥ ૭॥

માઘકૃષ્ણચતુર્થ્યાં યદ્દર્શનં તે મયા કૃતમ્ ।
મયા યુક્તા તતો દેવી મહાપુણ્યપ્રદાઽસ્તુ સા ॥ ૮॥

તથેતિ ગણનાથેન કૃતં સર્વં નરાધિપ ।
અતોઽઙ્ગારયુતા પુણ્યા ચતુર્થી મુખ્યતાં ગતા ॥ ૯॥

અધુના ચેતિહાસં તે કથયામિ વિશેષતઃ ।
ભાદ્રશુક્લચતુર્થ્યાં વૈ ન દ્રષ્ટવ્યો નિશાકરઃ ॥ ૧૦॥

તત્ર તે કારણં સર્વં કથયામિ સવિસ્તરમ્ ।
યેન દોષવિહીનસ્ત્વં ગણેશં ભજસે નૃપ ॥ ૧૧॥

એકદા દેવસંયુક્તૈર્મુનિભિશ્ચૈવ નિશ્ચિતમ્ ।
ગણેશાંશસમુદ્ભૂતાઃ પઞ્ચ દેવા ન સંશયઃ ॥ ૧૨॥

તે ગણેશસ્વરૂપાદ્વૈ કદા ભિન્ના ભવન્તિ ન ।
તેષાં સ્મરણમાત્રેણ સન્તુષ્ટો ગણનાયકઃ ॥ ૧૩॥

ભવિષ્યતિ ન સન્દેહસ્તસ્માદાદૌ મુનીશ્વરાઃ ।
શિવાદીન્ પૂજયત ચ તેન સિદ્ધિમવાપ્સ્યથ ॥ ૧૪॥

એવં જ્ઞાનબલેનાજ્ઞૈઃ કૃતં દેવૈઃ સહર્ષિભિઃ ।
પઞ્ચભિર્વિષ્ણુમુખ્યૈસ્તત્તથેતિ પ્રતિપાદિતમ્ ॥ ૧૫॥

તતઃ સર્વે મુનિગણાશ્ચક્રુસ્તે તાદૃશીં ક્રિયામ્ ।
તયા સિદ્ધિવિહીનાસ્તે ભ્રાન્તાઃ સર્વે બભૂવિરે ॥ ૧૬॥

સમાગતા દેવગણૈઃ બ્રહ્માણં તુષ્ટુવુર્નૃપ ।
વૃત્તાન્તં કથયામાસુઃ સોઽપિ ચિન્તાતુરોઽભવત્ ॥ ૧૭॥

સસ્માર શિવમુખ્યાંશ્ચ બ્રહ્માણં તે સમાયયુઃ ।
વિષ્ણુઃ શિવોઽર્યમા શક્તિસ્તેઽપિ શ્રુત્વા સુવિસ્મિતાઃ ॥ ૧૮॥

એતસ્મિન્નન્તરે તત્ર શબ્દઃ સર્વભયઙ્કરઃ ।
બભૂવ તીવ્રઘોષેણ યુક્તઃ પ્રલયસૂચકઃ ॥ ૧૯॥

શબ્દં શ્રુત્વા ભયોદ્વિગ્ના બભૂવુઃ શમ્ભુમુખ્યકાઃ ।
તતોઽકસ્માન્ મહાભીમઃ પુરુષઃ પ્રકટોઽભવત્ ॥ ૨૦॥

વિકરાલં ચ તં દૃષ્ટ્વા મુમૂર્ચ્છુઃ શઙ્કરાદયઃ ।
મુનયો દેવતાઃ કેઽપિ પલાયન્ત ચ મૂર્ચ્છિતાઃ ॥ ૨૧॥

મુહૂર્તમાત્રકાલે વૈ ગતે બ્રહ્માદયઃ સુરાઃ ।
સાવધાના બભૂવુસ્તં દદૃશુઃ પુરતઃ સ્થિતમ્ ॥ ૨૨॥

તતોઽતિભયસંયુક્તાસ્તુષ્ટુવુર્ગણનાયકમ્ ।
ધ્યાત્વા હૃદિ મહદ્રૂપં ગજવક્ત્રાદિચિહ્નિતમ્ ॥ ૨૩॥

બ્રહ્માદ્યા ઊચુઃ ।
નમસ્તે ગણનાથાય વિઘ્નાનાં પતયે નમઃ ।
અનાથાનાં સુનાથાય નમો વિઘ્નનિવારણ ॥ ૨૪॥

ભક્તેભ્યઃ સર્વદાત્રે તે નિરાકારાય સાક્ષિણે ।
અમેયાયાપ્રતર્ક્યાય હેરમ્બાય નમો નમઃ ॥ ૨૫॥

ગજાનનાય દેવાય શૂર્પકર્ણાય તે નમઃ ।
મહોદરાય સર્વેષામાદિપૂજ્યાય વૈ નમઃ ॥ ૨૬॥

(Page ખં. ૪ અ. ૬ પાન ૧૨)
સર્વાદયે મહાદાત્રે સર્વપૂજ્યાય વૈ નમઃ ।
સર્વભાવસ્થિતાયૈવ ઢુણ્ઢિરાજાય તે નમઃ ॥ ૨૭॥

સ્વાનન્દવાસિને તુભ્યં યોગશાન્તિમયાય ચ ।
યોગિભ્યો યોગદાત્રે વૈ યોગાનાં પતયે નમઃ ॥ ૨૮॥

સૃષ્ટિકર્ત્રે ચ પાત્રે તે સૃષ્ટિહર્ત્રે નમો નમઃ ।
ગણેશાય ગુણાનાં વૈ ચાલકાય નમો નમઃ ॥ ૨૯॥

આત્મનેઽનાત્મને ચૈવ કારણાનાં પ્રકાશિને ।
બ્રહ્મેશાય સદાનાથ દેવપાલકરૂપિણે ॥ ૩૦॥

નિવારય મહાવિઘ્નં સહસા સમુપસ્થિતમ્ ।
ગ્રસિષ્યતિ ન ચેદણ્ડમસ્માન્ વૈ નાત્ર સંશયઃ ॥ ૩૧॥

ત્વદીયપાદપદ્મસ્ય વયં દાસા ગજાનન ।
મરિષ્યામો યદા નાથ યશસ્તવ ગતં તદા ॥ ૩૨॥

અધુના રક્ષ દેવેશ ન વયં દ્રષ્ટુમુગ્રકમ્ ।
ક્ષમા ગચ્છન્તિ નઃ પ્રાણા રક્ષ વિઘ્નેશ રક્ષ ભોઃ ॥ ૩૩॥

એવં સંસ્તુવતાં તેષાં પુરઃ સોઽપિ મહાપુમાન્ ।
ગણેશાકારરૂપેણ બભૂવ નૃપસત્તમ ॥ ૩૪॥

તતસ્તે તં પ્રણેમુશ્ચ પૂજયામાસુરાદરાત્ ।
માનસીં સ્વસુતાં તસ્મૈ દદુઃ સર્વે શિવાદયઃ ॥ ૩૫॥

સરસ્વતીં દદૌ બ્રહ્મા વિષ્ણુઃ પુષ્ટિં ચ માનસીમ્ ।
યોગિનીં શઙ્કરશ્ચૈવ મોહિનીં જગદમ્બિકા ॥ ૩૬॥

સઞ્જીવનીં દદૌ તસ્મૈ ભાનુઃ સર્વપ્રિયઙ્કરઃ ।
એવં સમ્પૂજ્ય વિઘ્નેશં પ્રણતાસ્તે મહીપતે ॥ ૩૭॥

ઉવાચ તાન્ સ ઉત્થાપ્ય વિઘ્નેશો ભક્તિભાવતઃ ।
વિષ્ણુમુખ્યાન મહેશાંશ્ચ મેઘગમ્ભીરનિઃસ્વનઃ ॥ ૩૮॥

શ્રીગણેશ ઉવાચ ।

શમ્ભુમુખ્યાઃ શૃણુત ચ દેવેન્દ્રા મુનિમુખ્યકાઃ ।
મદીયાંશા ભવન્તોઽપિ ગર્વં મા કુરુત પ્રિયાઃ ॥ ૩૯॥

ચરાચરં મદીયાંશં મદ્રહિતં ન કિઞ્ચન ।
તેભ્યઃ સિદ્ધિપ્રદાનાર્થં દેહધારી ભવામ્યહમ્ ॥ ૪૦॥

યદિ જ્ઞાનેન માં ત્યક્ત્વા પૂજયેત્ તૃણરૂપકમ્ ।
તેનાઽહં કિં મહાદેવાઃ પૂજિતો વદત પ્રિયાઃ ॥ ૪૧॥

તત્રાંશો વર્તતે કિઞ્ચિન્ મદીયસ્તત્ સમા ચ મે ।
તૃપ્તિર્જાતા ન સન્દેહઃ પૂર્ણસ્તૃપ્તો ભવામિ ન ॥ ૪૨॥

ભવન્તોઽપિ તથા વિપ્રૈઃ કલાંશાઃ પૂજિતા યદિ ।
કલાંશરૂપા મે તૃપ્તિસ્તેન જાતા ગુણાત્મિકા ॥ ૪૩॥

બ્રહ્માણ્ડે પૂજિતે પૂર્ણે ન તૃપ્તોઽહં ભવામિ ચ ।
અનન્તાનિ મદીયેષુ બ્રહ્માણ્ડાનિ સ્વલોમસુ ॥ ૪૪॥

ગજવક્ત્રાદિચિહ્નેન ચિહ્નિતોઽહં મહેશ્વરઃ ।
જગદ્બ્રહ્મમયસ્તત્ર તિષ્ઠામિ યોગશાન્તિદઃ ॥ ૪૫॥

તસ્ય પૂજનમાત્રેણ જગદ્બ્રહ્મ સુપૂજિતમ્ ।
અહં તયોશ્ચ યોગે વૈ પૂર્ણઃ સમ્પૂજિતો મતઃ ॥ ૪૬॥

માં ત્યક્ત્વા જ્ઞાનમોહેન મોહિતા મુનિદેવતાઃ ।
ભવતાં પૂજનં ચક્રુઃ સર્વાદૌ વિઘ્નસંયુતાઃ ॥ ૪૭॥

તત્રાપિ મદસંયુક્તા ભવન્તસ્તાદૃશાત્મકાઃ ।
સિદ્ધિહીનાસ્તતો જાતાઃ પુનર્મા કુરુત ત્વિદમ્ ॥ ૪૮॥

પૂર્વસ્મિંશ્ચ ભવદ્ભિર્વૈ સેવિતો ભક્તિસંયુતૈઃ ।
અતઃસહામિ દેવેશા દત્તં વો દર્શનં મયા ॥ ૪૯॥

કલાંશમાત્રેણ યદિ સન્તુષ્ટોઽહં ભવામિ ચેત્ ।
તદા દેહધરઃ કસ્માત્ સ્થાસ્યામિ વદત પ્રિયાઃ ॥ ૫૦॥

એવમુક્ત્વા ગણાધીશો વિરરામ મહીપતે ।
તેઽપિ પ્રણમ્ય વિઘ્નેશં સ્વદોષં પ્રક્ષમાપયન્ ॥ ૫૧॥

એતસ્મિન્નન્તરે તત્ર ચન્દ્રઃ શઙ્કરભાલગઃ ।
જહાસ વિવૃતૈર્દન્તૈર્ગણેશં રૂપગર્વિતઃ ॥ ૫૨॥

ઉવાચ મોહિતોઽત્યન્તં પ્રણમ્ય ગણનાયકમ્ ।
(Page  ખં. ૪ અ. ૬ પાન ૧૩)
ગજવક્ત્રયુતં રૂપં કિં ધૃતં વિકટં પ્રભો ॥ ૫૩॥

પુનઃ પુનરુવાચેદં વાક્યં હાસ્યપરાયણઃ ।
તતસ્તં કુપિતો દેવઃ શશાપ શશલાઞ્છનમ્ ॥ ૫૪॥

યે ત્વાં વિલોકયન્તે વૈ ચન્દ્ર તે પાપિનઃ સદા ।
ભવન્તુ વિઘ્નસંયુક્તા મદ્વાક્યાન્નાત્ર સંશયઃ ॥ ૫૫॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
ભાર્યાભિઃ સહિતો ભૂપ ચન્દ્રશ્ચ મલિનોઽભવત્ ॥ ૫૬॥

અહઙ્કારવિહીનાસ્તે જાતાઃ શમ્ભ્વાદયઃ સુરાઃ ।
તદારભ્ય મહાભાગ ગાણપત્યા વિશેષતઃ ॥ ૫૭॥

વેદજ્ઞાઽહઙ્કૃતિઃ પૂર્ણા બ્રહ્મણો હૃદિ સંસ્થિતા ।
તયા મદયુતો બ્રહ્મા ભવત્યેવં પુનઃ પુનઃ ॥ ૫૮॥

સરસ્વતી સા દત્તા વૈ ગણેશાય મહાત્મને ।
તયા યુક્તઃ સદા રેમે બ્રહ્મણો હૃદિ વિઘ્નપઃ ॥ ૫૯॥

હૃદિ સ્થિતે ગણેશે સ કથં મોહયુતો ભવેત્ ।
સદા તં ભજતે ભક્ત્યા ગાણપત્યસ્વભાવતઃ ॥ ૬૦॥

સર્વપોષણતા તદ્વદ્વિષ્ણોર્હૃદિ સમાસ્થિતા ।
તત્ સામર્થ્યવિમોહેન ગર્વં ગચ્છતિ કેશવઃ ॥ ૬૧॥

તાં દદૌ વિઘ્નરાજાય પુષ્ટિં વિશ્વસ્ય પોષિણીમ્ ।
તયા યુક્તો ગણેશાનો રેમે વિષ્ણોઃ સદા હૃદિ ॥ ૬૨॥

સોઽપિ તં ભજતે નિત્યં ગાણપત્યવિચારવિત્ ।
હૃદિસ્થે સ કથં મોહં પ્રાપ્નોતિ નૃપ વિઘ્નપે ॥ ૬૩॥

યોગેન મોહહીનત્વં સદા શમ્ભોર્હૃદિ પ્રભો ।
તેનાહઙ્કારભાવેન મન્યતે કિં ન શઙ્કરઃ ॥ ૬૪॥

તામેવ યોગિનીં દેવીં હૃદિસ્થાં પ્રદદૌ શિવઃ ।
ગણેશસ્તુ તયા યુક્તો રેમે શમ્ભોર્હૃદિ સ્થિતઃ ॥ ૬૫॥

ગણેશે હૃદિ સંસ્થે સ મોહં નૈવ પ્રપદ્યતે ।
સદા ગાણેશકો ભૂત્વા ભજતે ગણનાયકમ્ ॥ ૬૬॥

વૃષ્ટ્યા દાનપ્રદાને વૈ કરોતિ સ દિવાકરઃ ।
સર્વેષાં જીવનં તેન ધૃતં કર્મમયં નૃપ ॥ ૬૭॥

તદેવ હૃદયે તસ્ય વર્તતેઽહંસ્વભાવતઃ ।
તાં સઞ્જીવનિકાં સૂર્યો દદૌ વિઘ્નેશ્વરાય ચ ॥ ૬૮॥

તયા યુક્તો ગણાધીશઃ સદા હૃદિ સ ખેલતિ ।
ભાનોસ્તેન રવિસ્તં સ ભજતેઽનન્યચેતસા ॥ ૬૯॥

શક્તિર્હૃદયગાં દેવીં મોહિનીં સર્વમોહિનીમ્ ।
દદૌ વિઘ્નેશ્વરાયૈવ શક્તિભાવસમન્વિતામ્ ॥ ૭૦॥

તયા યુક્તો ગણેશાનસ્તસ્યા હૃદિ વિશેષતઃ ।
તેન ખેલતિ સા દેવી ભજતે ગણનાયકમ્ ॥ ૭૧॥

ઇત્યહઙ્કારનિર્મુક્તા દેવેન્દ્રાસ્તે બભૂવિરે ।
ગાણપત્યપ્રિયા જાતા ભજન્તે વિઘ્નનાયકમ્ ॥ ૭૨॥

ચિત્તે ચિન્તામણિઃ સ્થિત્વા પ્રકૃત્યા ખેલતિ પ્રભુઃ ।
મિથ્યાહઙ્કારભાવેન બન્ધનં પ્રતિપદ્યતે ॥ ૭૩॥

કર્તા કારયિતા દેવો ગણેશો નાત્ર સંશયઃ ।
હૃદિસ્થં તં સમર્પ્યૈવ સ્વાત્માનં સુખિનોઽભવન્ ॥ ૭૪॥

મુદ્ગલ ઉવાચ ।
શ્રુત્વા દશરથો રાજા જગાદ મુનિસત્તમમ્ ।
ચન્દ્રસ્ય કા ગતિર્જાતા તાં મે વદ મહામુને ॥ ૭૫॥

વસિષ્ઠ ઉવાચ ।
ગણેશશાપસંયુક્તશ્ચન્દ્રઃ સ સ્વગૃહે ગતઃ ।
એકાન્તે દુઃખસંયુક્તો વિચારમકરોદ્ધૃદિ ॥ ૭૬॥

સમ્પ્રજ્ઞાતસ્વરૂપશ્ચ દેહો ગણપતેઃ સ્મૃતઃ ।
અસમ્પ્રજ્ઞાતરૂપં વૈ શિરસ્તસ્ય મહાત્મનઃ ॥ ૭૭॥

તયોર્યોગે ગણેશોઽયં ભક્તાનુગ્રહકારણાત્ ।
દેહધારી સ્વયં સાક્ષાદ્બભૂવાત્ર ન સંશયઃ ॥ ૭૮॥

(Page  ખં. ૪ અ. ૬ પાન ૧૪)
વેદેષુ કથિતં તે યદ્રૂપં પરમયોગદમ્ ।
તન્ન જ્ઞાતં મયા દેવ મોહેનૈવ ગજાનન ॥ ૭૯॥

અપરાધં દયાસિન્ધો ક્ષમ ત્વં ચિત્તગં પ્રભો ।
એવં ક્ષમાપ્ય વિઘ્નેશં ધ્યાત્વા લીનો બભૂવ હ ॥ ૮૦॥

ગઙ્ગાતીરે સમાગમ્ય તતાપ તપ ઉત્તમમ્ ।
અષ્ટાદશાક્ષરેણૈવ તોષયામાસ વિઘ્નપમ્ ॥ ૮૧॥

ચન્દ્રે લીને જગત્ સર્વં દુઃખયુક્તં બભૂવ હ ।
સૂર્યસ્ય તેજસા દગ્ધં રસહીનં ચરાચરમ્ ॥ ૮૨॥

તતો દેવગણૈઃ સર્વૈર્ભયભીતૈઃ સમન્તતઃ ।
શમ્ભુવિષ્ણુમુખાસ્તત્ર તપસ્તેપુઃ સહેશ્વરાઃ ॥ ૮૩॥

ષડક્ષરવિધાનેન ધ્યાત્વા હૃદિ ગજાનનમ્ ।
ભક્તિયુક્તા નૃપશ્રેષ્ઠ તોષયામાસુરાદરાત્ ॥ ૮૪॥

વર્ષાણાં શતકે તત્ર ગતે ચન્દ્રં ગણાધિપઃ ।
આયયૌ વરદાનાર્થં તપો બદ્ધો નૃપોત્તમ ॥ ૮૫॥

વર્ષેણૈકેન દેવેશાન્ યયૌ વિઘ્નાધિપો વિભુઃ ।
સમકાલે ચ દેવેશાશ્ચન્દ્રસ્તં તુષ્ટુવુર્વિભુમ્ ॥ ૮૬॥

અથર્વશિરસા ઢુણ્ઢિં તોષયામાસુરાદરાત્ ।
સન્તુષ્ટસ્તાનુવાચેદં ગણેશો બ્રહ્મનાયકઃ ॥ ૮૭॥

શ્રીગણેશ ઉવાચ ।
વરં વૃણુત દેવેશાઃ સન્તુષ્ટોઽહં દદામિ તમ્ ।
યં યમિચ્છથ તં તં વૈ સફલં વઃ કરોમ્યહમ્ ॥ ૮૮॥

ગણેશવચનં શ્રુત્વા દેવાસ્તં પ્રણિપત્ય તે ।
કૃત્વા કરપુટં સર્વે જગુઃ પરમહર્ષિતાઃ ॥ ૮૯॥

દેવા ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા ચન્દ્રં સુનિર્દોષં કુરુ નાથ નમોઽસ્તુ તે ॥ ૯૦॥

સ તાનુવાચ સર્વાત્મા ભક્ત્યા સન્તોષિતઃ પ્રભુઃ ।

ભાદ્રશુક્લચતુર્થ્યાં વૈ ન દ્રષ્ટવ્યઃ સુધાકરઃ ॥ ૯૧॥

હાસ્યં કૃતં મદીયં વૈ તદ્ દિને તેન દેવપાઃ ।
દોષયુક્તો વિધુસ્તસ્માન્નાન્યથા મે વચો ભવેત્ ॥ ૯૨॥

તતોઽતિહર્ષિતા દેવાસ્તથેતિ પ્રતિપાદ્ય તે ।
યયુશ્ચન્દ્રં તુ સન્દ્રષ્ટું ગણેશેંઽતર્હિતે નૃપ ॥ ૯૩॥

ચન્દ્રો ગણપતિં દૃષ્ટ્વા નનામ દણ્ડવત્ ક્ષિતૌ ।
પૂજયામાસ તં દેવં તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૯૪॥

ચન્દ્ર ઉવાચ ।
નમસ્તે વિઘ્નપાલાય ગણેશાય પરાત્મને ।
બ્રહ્મેશાય સ્વભક્તેભ્યો બ્રહ્મભૂયપ્રદાય તે ॥ ૯૫॥

અનામયાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ।
શિવાત્મજાય દેવાય વિષ્ણુપુત્રાય તે નમઃ ॥ ૯૬॥

બ્રહ્મપુત્રાય સૂર્યસ્ય પુત્ર તે વિઘ્નહારિણે ।
શક્તિપુત્રાય શેષસ્ય પુત્રાય ચ નમો નમઃ ॥ ૯૭॥

સર્વપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
સર્વેશાય પરેશાય પરાત્પરતરાય તે ॥ ૯૮॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રચાલક ।
હેરમ્બાય મહેશાનાં મહેશાય નમો નમઃ ॥ ૯૯॥

સ્રષ્ટે પાત્રે ચ સંહર્ત્રે પરમાત્મસ્વરૂપિણે ।
સર્વેભ્યો વરદાત્રે તેઽનાદિસિદ્ધાય ભો નમઃ ॥ ૧૦૦॥

ક્ષમાપરાધં દેવેશ ત્વન્માયામોહધારિણઃ ।
શરણં તે પ્રસન્નસ્ય રક્ષ માં મહતો ભયાત્ ॥ ૧૦૧॥

માં દૃષ્ટ્વા હર્ષસમ્પન્ના અભવન્ દેવતાદયઃ ।
અધુના માં નિરીક્ષ્યૈવ દોષયુક્તા ભયાતુરાઃ ॥ ૧૦૨॥

અતો માં નૈવ પશ્યન્તિ પાપિનાં પાપરૂપિણમ્ ।
નિર્દોષં કુરુ વિઘ્નેશ કરુણાલય તે નમઃ ॥ ૧૦૩॥

સર્વદા દર્શનં તે વૈ મમાસ્તાં વિઘ્નવારણ ।
તેનાઽહં કૃતકૃત્યશ્ચ ભવેયં યોગિસમ્મતઃ ॥ ૧૦૪॥

તતોઽતિભક્તિસંયુક્તં નૃત્યન્તં દેવસન્નિધૌ ।
રોમાઞ્ચાશ્રુસમાયુક્તં દૃષ્ટ્વા ઢુણ્ઢિર્જગાદ તમ્ ॥ ૧૦૫॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
અપરાધાનનન્તાંશ્ચ સહે તેઽનેન નિશ્ચિતમ્ ॥ ૧૦૬॥

સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ વિશેષતઃ ।
પઠતાં શૃણ્વતાં ચૈવ નાનાસુખકારકં ભવેત્ ॥ ૧૦૭॥

યથાપૂર્વં સ્થિતશ્ચન્દ્ર તાદૃશો ભવ નિત્યદા ।
યસ્મિન્ દિને કૃતં હાસ્યં તત્ર દોષયુતો ભવેઃ ॥ ૧૦૮॥

લલાટે ભૂષણં મે ત્વં ભવ સેવાપરાયણઃ ।
ચતુર્થ્યાં કૃષ્ણપક્ષસ્ય વ્રતે તે પૂજનં ભવેત્ ॥ ૧૦૯॥

માં પૂજયિત્વા તારેશ અર્ધ્યં યસ્તે પ્રદાસ્યતિ ।
તસ્ય સિદ્ધિર્ભવેત્ પૂર્ણા વ્રતજા નાન્યથા ક્વચિત્ ॥ ૧૧૦॥

દ્વિતીયાયાં ચ સાયાહ્ને ત્વયા પ્રાપ્તોઽહમાદરાત્ ।
અતઃ શુક્લદ્વિતીયાયાં નમસ્યો માનવૈર્ભવ ॥ ૧૧૧॥

દ્વિતીયાયાં પ્રયત્નેન ત્વાં નમસ્યન્તિ માનવાઃ ।
માસગં દુઃખમુત્સૃજ્ય ક્વચિત્ તિષ્ઠતિ નાન્યથા ॥ ૧૧૨॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશશ્ચન્દ્રપૂજિતઃ ।
તસ્મિન્ કાલે ચ દેવેશા દેવાસ્તત્ર સમાયયુઃ ॥ ૧૧૩॥

માનયામાસ સમ્પૂજ્ય ચન્દ્રસ્તાંસ્તૈઃ સમન્વિતઃ ।
ગણેશં બ્રાહ્મણૈઃ સાર્ધં સંસ્થાપ્યાપૂજયત્ પ્રભુમ્ ॥ ૧૧૪॥

ગણેશભાલસંસ્થાનં પ્રાપ્તં ચન્દ્રેણ યત્ર વૈ ।
ભાલચન્દ્રં ગણેશાનં વદન્તિ તત્ર સંસ્થિતમ્ ॥ ૧૧૫॥

દેવૈઃ સમ્પૂજિતસ્તત્ર બ્રાહ્મણૈર્ગણનાયકઃ ।
પ્રગૃહ્ય ચન્દ્રં નિર્દોષં તતઃ સ્વર્ગં યયુઃ સુરાઃ ॥ ૧૧૬॥

ચન્દ્રઃ સ્વાંશસ્વરૂપેણ સ્વર્ગે તિષ્ઠતિ ભૂમિપ ।
પૂર્ણરૂપેણ વિઘ્નેશં સેવતે નિત્યમાદરાત્ ॥ ૧૧૭॥

ગઙ્ગાતીરે નિવાસં સ ચકારાત્રિસમુદ્ભવઃ ।
વિધુશ્ચ ભાલચન્દ્રં તં સેવતે ભક્તિતત્પરઃ ॥ ૧૧૮॥

અથ કસ્મિંશ્ચ સમયે દેવૈઃ સમ્પ્રાર્થિતો હરિઃ ।
યાદવેષુ સમુત્પન્નો વાસુદેવો બભૂવ હ ॥ ૧૧૯॥

અજ્ઞાનેન વિધોસ્તેન દર્શનં પ્રકૃતં નૃપ ।
ભાદ્રશુક્લચતુર્થ્યાં તુ સદોષઃ સ બભૂવ હ ॥ ૧૨૦॥

અન્તર્જ્ઞાનં ગતં તસ્ય નરતુલ્યો બભૂવ સઃ ।
તથાપિ વિઘ્નસંયુક્તો હરિસ્તચ્છૃણુ ભૂમિપ ॥ ૧૨૧॥

સત્રાજિન્નામ રાજર્ષિર્યાદવેષુ બભૂવ વૈ ।
તેન સૂર્યતપસ્તપ્તં દારુણં શતવત્સરમ્ ॥ ૧૨૨॥

સૂર્યેણ સ્વગલે સંસ્થો મણિર્દત્તઃ સ્યમન્તકઃ ।
સત્રાજિતે સ તદ્રત્નં ગલે ભક્ત્યા બબન્ધ હ ॥ ૧૨૩॥

નિત્યં સુવર્ણભારાણામષ્ટૌ સ્રવતિ સન્મણિઃ ।
સૂર્યતેજઃસમાનશ્ચાઽશોભયદ્યદુનન્દનમ્ ॥ ૧૨૪॥

દ્વારકાયાં સ્થિતં તં સ સૂર્યભક્તિપરાયણમ્ ।
શુચિભાવેન રત્નં સોઽપૂજયત્તાન્નરન્તરમ્ ॥ ૧૨૫॥

તતો બહુગતે કાલે કૃષ્ણો દોષયુતોઽભવત્ ।
તસ્ય બુદ્ધિઃ સમુત્પન્ના મણેઃ સઙ્ગ્રહણે નૃપ ॥ ૧૨૬॥

સભાયાં સંસ્થિતઃ કૃષ્ણઃ સ સત્રાજિતમાહ્વયત્ ।
આગતં તમુવાચાઽસૌ વિનયેન સમન્વિતઃ ॥ ૧૨૭॥

શ્રીકૃષ્ણ ઉવાચ ।
ઉગ્રસેનશ્ચ સર્વેષાં યાદવાનાં મહામતે ।
રાજાઽસ્માભિઃ કૃતસ્તં તે યાદવાઃ પૂજયન્તિ ભોઃ ॥ ૧૨૮॥

અસ્માભિર્દિગ્જયે પ્રાપ્તમુગ્રસેનાય યાદવ ।
દત્તં શ્રેષ્ઠં તથા ત્વં તં મણિં દેહિ સ્યમન્તકમ્ ॥ ૧૨૯॥

સુવર્ણં મણિસમ્ભૂતં ગૃહાણ ત્વં તુ નિત્યદા ।
(Page ખં. ૪ અ. ૬ પાન ૧૬)
શોભાર્થં કણ્ઠગં તાત મણિં કુરુ નૃપસ્ય તમ્ ॥ ૧૩૦॥

એવમુક્તઃ સ સત્રાજિત્તમુવાચ સમન્યુના ।
પ્રસેનાય મયા દત્તઃ સ મે નૈવ દદાતિ તમ્ ॥ ૧૩૧॥

એવમુક્ત્વા ગૃહં ગત્વા સ્વાનુજાય દદૌ મણિમ્ ।
પ્રસેનાય સ્વવૃત્તાન્તં કથયામાસ વિસ્તરાત્ ॥ ૧૩૨॥

તતઃ કદાચિત્ કૃષ્ણેન સહિતા યદુનન્દનાઃ ।
મૃગયાર્થં વને રાજન્ જગ્મુર્હર્ષસમન્વિતાઃ ॥ ૧૩૩॥

તત્રાશુચિસ્વભાવેન પ્રસેનસ્તં મણિં પરમ્ ।
બબન્ધ સ્વગલે સોઽપિ તૈઃ સહ પ્રયયૌ વનમ્ ॥ ૧૩૪॥

અશુચિત્વસ્ય દોષેણ સિંહકસ્તં પ્રસેનકમ્ ।
સાશ્વં હત્વાઽઽગૃહ્ય મણિં યયૌ સ્થાનં સ્વકં મહાન્ ॥ ૧૩૫॥

તતસ્તં જામ્બવાન્ હત્વા ગૃહ્ય સિંહં મણિં યયૌ ।
સ્થાનં પુત્ર્યા મણિં હસ્તે તં દદૌ સ મહાબલઃ ॥ ૧૩૬॥

તવ ભર્તા સુતે યો વૈ ભવિષ્યતિ મણિં પરમ્ ।
તસ્મૈ દાસ્યામિ ભાવેન ત્વદીયોઽયં મણિઃ સ્મૃતઃ ॥ ૧૩૭॥

સાયાહ્ને યાદવાઃ સર્વે આગતાઃ સ્વસ્વમન્દિરે ।
પ્રસેનેન વિહીનાસ્તે સત્રાજિત્ ક્રોધમાદધે ॥ ૧૩૮॥

અહો કૃષ્ણેન મે ભ્રાતા સંહતો નાત્ર સંશયઃ ।
મણિલોભવશેનાઽપિ પાપિના પાપચેતસા ॥ ૧૩૯॥

તતો લોકાઃ પુરે સંસ્થાઃ સત્યમામાનયંસ્તુ તે ।
ઉગ્રસેનાદયઃ સર્વે કૃષ્ણં ન્યભર્ત્સયન્નૃપ ॥ ૧૪૦॥

તતઃ કૃષ્ણશ્ચ દુઃખાર્તઃ સ ધ્યાનેનાવલોકયન્ ।
નરવન્ન બુબોધાઽપિ સ દોષો વસુદેવજઃ ॥ ૧૪૧॥

તતોઽતિદુઃખિતો ભૂત્વા વિચારં દેવકીસુતઃ ।
ચકારાન્તરજં જ્ઞાનં ક્વ ગતં મમ સામ્પ્રતમ્ ॥ ૧૪૨॥

નરતુલ્યઃ કથં જાતઃ કારણં નાત્ર વેદ્મિ વૈ ।
દેહત્યાગં કરિષ્યામિ વૃથા લાઞ્છનકારણાત્ ॥ ૧૪૩॥

તતઃ સભાં સમાગમ્યાઽઽગૃહ્ય યાદવમુખ્યકાન્ ।
વનં યયૌ પ્રસેનસ્ય નિશ્ચયાર્થં મહાદ્યુતિઃ ॥ ૧૪૪॥

પાદમાર્ગં પ્રસેનસ્ય તે સઙ્ગૃહ્ય મહાવને ।
ગતાસ્તત્ર મૃતં સાશ્વં પ્રસેનં દદૃશુર્નરાઃ ॥ ૧૪૫॥

સિંહેન સંહતં દૃષ્ટ્વા મણિહીનં તુ યાદવાઃ ।
પુરતસ્તે યયુઃ સર્વે સિંહમાર્ગપ્રધારિણઃ ॥ ૧૪૬॥

તતો મહાવને સિંહમૃક્ષેણ પ્રહતં પુનઃ ।
દદૃશુર્ન મણિં તત્ર લેભિરે ભયસઙ્કુલાઃ ॥ ૧૪૭॥

ઋક્ષપાદં તથાઽઽગૃહ્ય યયુર્યાદવમુખ્યકાઃ ।
મહાવને બિલે ઘોરે ગતમૃક્ષમલોકયન્ ॥ ૧૪૮॥

તતસ્તાંસ્તત્ર સંસ્થાપ્ય કૃષ્ણઃ પરપુરઞ્જયઃ ।
બિલે સમ્પ્રવિવેશાઽથ લાઞ્છનસ્યાપનોદનાત્ ॥ ૧૪૯॥

બિલે યોજનમાત્રં સ ગત્વા તત્ર દદર્શ હ ।
પ્રકાશયુક્તં સંસ્થાનં શોભમાનં સુવિસ્તરમ્ ॥ ૧૫૦॥

દોલાયાં સંસ્થિતં વીક્ષ્ય મણિં કૃષ્ણો જહર્ષ ચ ।
તત્ર સુપ્તં શિશું દૃષ્ટ્વા શનૈરાગાત્ સ યાદવઃ ॥ ૧૫૧॥

તતોઽકસ્માજ્જામ્બવતો બહિઃ પુત્રી સમાયયૌ ।
અપૂર્વં પુરુષં દૃષ્ટ્વા ચુક્રોશ ભયસઙ્કુલા ॥ ૧૫૨॥

તતો જામ્બવતા રાજન્ શ્રુતં પુત્ર્યાઃ પ્રરોદનમ્ ।
આયયૌ ચ સ તં દૃષ્ટ્વા યુયુધે વિષ્ણુના સ્વયમ્ ॥ ૧૫૩॥

ગતાસ્તયોરેકવિંશતિઘસ્રાસ્તુ પ્રયુધ્યતોઃ ।
યાદવા જગ્મિરે સર્વે બહિઃસ્થા અષ્ટમે દિને ॥ ૧૫૪॥

દ્વારકાયાં સ્વવૃત્તાન્તં કથયન્તિ સ્મ વિહ્વલાઃ ।
દિવસાઃ સપ્ત તત્રૈવ કિલાસ્માકં ગતા બહિઃ ॥ ૧૫૫॥

(Page  ખં. ૪ અ. ૬ પાન ૧૭)
તથાપિ વિવરાત્ કૃષ્ણો ન બહિશ્ચ સમાગતઃ ।
મૃતો વા જીવિતો વા સ જ્ઞાયતે કિં ન યાદવઃ ॥ ૧૫૬॥

વસુદેવાદયઃ શ્રુત્વા સસ્ત્રીકા નૃપ દુઃખિતાઃ ।
ઉગ્રસેનાદયઃ સર્વે રુરુદુર્દુઃખકર્શિતાઃ ॥ ૧૫૭॥

પરેઽસ્માકં વિશેષેણ શત્રવઃ સંસ્થિતા અહો ।
જરાસન્ધાદયશ્ચાન્યે કિં ભવિષ્યતિ યાદવાઃ ॥ ૧૫૮॥

હીનાઃ કૃષ્ણેન સઞ્જાતા અધુના નાત્ર સંશયઃ ।
દ્વિષદ્ભિઃ સંહતાઃ સર્વે મરિષ્યામઃ સપક્ષકાઃ ॥ ૧૫૯॥

તતો રામેણ તે સર્વે સાન્ત્વિતા બહુલોક્તિભિઃ ।
નિઃશ્વસ્ય સંસ્થિતા ભૂપ દુઃખયુક્તા ભયાઽઽતુરાઃ ॥ ૧૬૦॥

સત્રાજિતં નિનિન્દુસ્તે વ્યર્થલાઞ્છનદં તદા ।
સોઽપિ દુઃખસમાયુક્તો બભૂવ ભયસઙ્કુલઃ ॥ ૧૬૧॥

અથ તં જામ્બવાન્ કૃષ્ણમુવાચ ઘનનિઃસ્વનઃ ।
કસ્ત્વં વીર મહાતેજા યોધયન્નસિ માં વદ ॥ ૧૬૨॥

તતસ્તં પ્રત્યુવાચેદં કૃષ્ણો વચનમુત્તમમ્ ।
યદુવંશભવં કૃષ્ણં માં જાનીહિ મહામતે ॥ ૧૬૩॥

શ્રુત્વા ખેદસમાયુક્તો જામ્બવાંસ્તં નનામ વૈ ।
રામેણોક્તં વચો રમ્યં સ ત્વં વિષ્ણુઃ સમાગતઃ ॥ ૧૬૪॥

અહં દાસસ્ત્વદીયો વૈ ક્ષમસ્વ કરુણાનિધે ।
અજ્ઞાનાચ્છક્તિગર્વેણાપરાધં યુદ્ધજં ચ મે ॥ ૧૬૫॥

સ્તુતઃ સમ્પૂજિતસ્તેન કૃષ્ણો વૃત્તાન્તમાદરાત્ ।
અગદત્તં તતઃ શ્રુત્વા કન્યાયુક્તં મણિં દદૌ ॥ ૧૬૬॥

ગૃહીત્વા સસ્ત્રિયં કૃષ્ણો દ્વારકાયાં સમાગતઃ ।
આગતં કૃષ્ણમાલોક્ય હર્ષયુક્તા બભૂવિરે ॥ ૧૬૭॥

યાદવૈશ્ચ તતઃ કૃષ્ણઃ સમાનાય્ય મહામણિમ્ ।
સત્રાજિતે દદૌ તત્ર સર્વેષાં પશ્યતાં નૃપ ॥ ૧૬૮॥

સત્રાજિન્ મનસાઽત્યન્તં નિન્દયામાસ તાં તનુમ્ ।
ભયભીતઃ સ કૃષ્ણસ્ય વિરોધેન મહાયશાઃ ॥ ૧૬૯॥

સત્યભામાં દદૌ તસ્મૈ મણિયુક્તાં મહાત્મને ।
કૃષ્ણાય સ ઉવાચેદં શ્વશુરો વિનયાન્વિતઃ ॥ ૧૭૦॥

સૂર્યભક્તિયુતસ્ત્વં વૈ મણિં રક્ષ મહામતે ।
દૌહિત્રાસ્તે ભવિષ્યન્તિ ગ્રહીષ્યન્તિ મણિં ચ તે ॥ ૧૭૧॥

તથેતિ યાદવેનૈવ કૃતં સત્રાજિતા નૃપ ।
એતસ્મિન્નન્તરે તત્ર વૃત્તાન્તો યાદવૈઃ શ્રુતઃ ॥ ૧૭૨॥

લાક્ષાગૃહેષુ સન્દગ્ધાઃ કુન્ત્યા યુક્તાશ્ચ પાણ્ડવાઃ ।
પુરોચનેન તજ્ જ્ઞાત્વા રુરુદુર્યાદવા બહુ ॥ ૧૭૩॥

રામેણ હસ્તિનાપુર્યાં કૃષ્ણઃ સદ્યો જગામ હ ।
ધૃતરાષ્ટ્રાદિભિઃ સોઽપિ રુરોદ શોકસઙ્કુલઃ ॥ ૧૭૪॥

શતધન્વા તતોઽક્રૂરઃ કૃતવર્મા ચ યાદવઃ ।
મિલિતાઃ ક્રોધસંયુક્તા વિચારં ચક્રુરાદરાત્ ॥ ૧૭૫॥

સત્રાજિતા વયં સર્વે કન્યાર્થં સંવૃતાઃ પુરા ।
અસ્માન્ સન્ત્યજ્ય કૃષ્ણાય દદૌ કન્યાં સુરૂપિણીમ્ ॥ ૧૭૬॥

કૃષ્ણઃ પાણ્ડવશોકાર્તોઽભવત્ તત્રૈવ સંસ્થિતઃ ।
સ રામો નિશ્ચતઃ કાર્યં કર્તવ્યં તત્ ત્રિભિઃ કિલ ॥ ૧૭૭॥

હત્વા સત્રાજિતં સુપ્તં મણિર્ગ્રાહ્યો ન સંશયઃ ।
એવં નિશ્ચિત્ય રાત્રૌ તં શતધન્વા જગામ હ ॥ ૧૭૮॥

સત્રાજિતં સ હત્વા વૈ મણિં જગ્રાહ દારુણઃ ।
સંસ્થાપ્ય તૈલદ્રોણ્યાં તં કૃષ્ણં સત્યાયયો તતઃ ॥ ૧૭૯॥

શ્વશુરં સ હતં શ્રુત્વા રામેણ સહસા ગતમ્ ।
કૃષ્ણં જ્ઞાત્વા રોષિતં શતધન્વાઽક્રૂરમાયયૌ ॥ ૧૮૦॥

(Page ખં. ૪ અ. ૬ પાન ૧૮)
અક્રૂરેણ સમાત્યક્તઃ કૃતવર્માણમાયયૌ ।
તેનાપિ ન ધૃતઃ પક્ષઃ પુનઃ સોઽક્રૂરમાયયૌ ॥ ૧૮૧॥

મણિં તત્રૈવ નિક્ષિપ્ય પપાલ ભયસઙ્કુલઃ ।
શતયોજનગાઽશ્વિન્યાં સમારુહ્ય નૃપાત્મજ ॥ ૧૮૨॥

પલાયમાનં વિજ્ઞાય કૃષ્ણઃ સઙ્કર્ષણાન્વિતઃ ।
રથમારુહ્ય વેગેન તમનુ પ્રયયૌ તદા ॥ ૧૮૩॥

યોજનાનાં શતં ગત્વા મમાર હ પુરોઽશ્વિની ।
શતધન્વા ભયૈર્યુક્તઃ પલાયત પદા તતઃ ॥ ૧૮૪॥

પદાતિનં ચ તં જ્ઞાત્વા કૃષ્ણોઽધાવત્ સુસત્વરઃ ।
પદાતિર્બલભદ્રે સ રથં ત્યક્ત્વા મહાદ્યુતિઃ ॥ ૧૮૫॥

તતશ્ચક્રેણ કૃષ્ણેન હતસ્તત્ર પપાત હ ।
શતધન્વા તેન તસ્મિન્ ન દૃષ્ટો મણિરુત્તમઃ ॥ ૧૮૬॥

તતઃ શોકસમાયુક્તો બલભદ્રમુવાચ હ ।
શતધન્વા હતો હીનો મણિના તત્ર માનદ ॥ ૧૮૭॥

ઉવાચ કોપયુક્તસ્તં સ તતો રોહિણીસુતઃ ।
મણિસ્ત્વયા સુસઙ્ગુપ્તો મિથ્યા વાક્ ત્વં મહાખલ ॥ ૧૮૮॥

અગ્રજાય પ્રદાતવ્યસ્તદર્થં મણિરાદરાત્ ।
કૃતં ત્વયા મહાલોભિન્ કર્મ સાધુ જુગુપ્સિતમ્ ॥ ૧૮૯॥

તતસ્તં વિનયેનૈવ સાન્ત્વયામાસ કેશવઃ ।
દ્વિજદેવગવાં તે મે શપથો ન કૃતં મયા ॥ ૧૯૦॥

તં તિરસ્કૃત્ય વેગેન ત્યક્ત્વા રામો જગામ હ ।
વિદર્ભં રાજનીતિજ્ઞં સ્વમિત્રં નૃપતિં તદા ॥ ૧૯૧॥

તતોઽતિદુઃખસંયુક્તઃ કૃષ્ણઃ પરમદારુણમ્ ।
રુરોદ બલભદ્રં સ સ્મૃત્વા સ્મૃત્વા વિશેષતઃ ॥ ૧૯૨॥

જ્ઞાનદૃષ્ટ્યા સ કૃષ્ણેન મણિર્નાપ્તો મહીપતે ।
તતોઽતિદુઃખિતો ભૂત્વા રુરોદ ચ પુનઃ પુનઃ ॥ ૧૯૩॥

અહો જ્ઞાનં મદીયં યદ્ગતં કુત્ર વિશેષતઃ ।
નરતુલ્યઃ કૃતઃ કેન ધિઙ્ મે જીવિતકં કિલ ॥ ૧૯૪॥

રથસંસ્થઃ સમાયાતો દ્વારકાયાં મહાયશાઃ ।
લોકવૃત્તાન્તમુગ્રં સ કથયામાસ વિસ્તરાત્ ॥ ૧૯૫॥

તતો યાદવમુખ્યૈઃ સ ભર્ત્સિતોઽતિવિશેષતઃ ।
કૃષ્ણઃ સત્રાજિતઃ કર્મ ચકારોત્તરકં નૃપ ॥ ૧૯૬॥

દેશે દેશે નૃપાદ્યાશ્ચ જનાઃ કૃષ્ણં વિશેષતઃ ।
નિનિન્દુઃ કર્મ કૃષ્ણેન કિં કૃતં દુષ્ટબુદ્ધિના ॥ ૧૯૭॥

સમર્થં બલભદ્રં યોઽત્યજજ્જ્યેષ્ઠં સુદુર્મતિઃ ।
મણિલોભી મહાપાપી વિશ્વાસ્યો નૈવ કેનચિત્ ॥ ૧૯૮॥

દ્વારકાયાં જનાઃ સર્વે તં કૃષ્ણં ન પ્રમેનિરે ।
ત્યક્તઃ સર્વૈસ્તથા કૃષ્ણઃ શુશોચ પરમવ્યથઃ ॥ ૧૯૯॥

અસ્થિત્વચાસમાયુક્તં સદા સ્વગૃહસંસ્થિતમ્ ।
નારદસ્તં સમાલોચ્યાયયૌ દૃષ્ટ્વા સુવિસ્મિતઃ ॥ ૨૦૦॥

તં પ્રણમ્ય મહાત્માનં કૃષ્ણઃ પરમદુઃખિતઃ ।
ઉવાચ ભાવભક્ત્યા વૈ કૃતાઞ્જલિપુટઃ શનૈઃ ॥ ૨૦૧॥

શ્રીકૃષ્ણ ઉવાચ ।
સર્વૈઃ સન્ત્યાજિતો દુઃખી ગૃહે નિત્યં વસામ્યહમ્ ।
તત્ર તે દર્શનં સ્વામિન્નભવત્ ભાગ્યયોગતઃ ॥ ૨૦૨॥

તતસ્તં નારદઃ પ્રાહ કિમર્થં ત્યજ્યસે વદ ।
એવં પૃષ્ટઃ પુનઃ પ્રાહ વૃત્તાન્તં સર્વમઞ્જસા ॥ ૨૦૩॥

શ્રુત્વા વૃત્તાન્તમુગ્રં વૈ ધ્યાનેનાલોક્ય નારદઃ ।
દેહત્યાગે સમુદ્યોગં કુર્વન્તં તમુવાચ હ ॥ ૨૦૪॥

નારદ ઉવાચ ।
ભાદ્રશુક્લચતુર્થ્યાં ચ ત્વયા ચન્દ્રો વિલોકિતઃ ।
શપ્તોઽસૌ વિઘ્નરાજેન તેન સન્દુઃખિતો ભવાન્ ॥ ૨૦૫॥

(Page ખં. ૪ અ. ૬ પાન ૧૯)
દેહત્યાગં મહાબુદ્ધે મા કુરુષ્વ વિશેષતઃ ।
ગણેશં ભજ ભાવેન સઙ્કષ્ટીવ્રતસંયુતમ્ ॥ ૨૦૬॥

મિથ્યાઽપવાદશૂન્યસ્ત્વં ભવિષ્યસિ ન ચાન્યથા ।
સજ્ઞાનશ્ચ સમર્થેશસ્તસ્માત્ તં શરણં વ્રજ ॥ ૨૦૭॥

એવમુક્ત્વા મહાયોગી નારદઃ પ્રયયૌ તતઃ ।
ગણેશગાનસંયુક્તો વીણાવાદનલાલસઃ ॥ ૨૦૮॥

તતઃ કૃષ્ણઃ પ્રહર્ષેણ યુક્તો વિઘ્નેશમાદરાત્ ।
અભજદ્ ધ્યાનમાર્ગજ્ઞો ધ્યાનેનોગ્રેણ ભૂમિપ ॥ ૨૦૯॥

એકાક્ષરેણ મન્ત્રેણાપૂજયન્નિત્યમેવ તમ્ ।
વ્રતં ચકાર સ તતઃ સઙ્કષ્ટીસંજ્ઞામુત્તમમ્ ॥ ૨૧૦॥

રાત્રાવેકાન્તસંસ્થં તં ધ્યાનનિષ્ઠં જનાર્દનમ્ ।
નિશ્ચલં ગણરાજઃ સ યયૌ ભક્તં સુખપ્રદઃ ॥ ૨૧૧॥

બોધયામાસ તં કૃષ્ણં ગણેશો બ્રહ્મનાયકઃ ।
તમુત્થાય નનામાઽસૌ પૂજયામાસ ચાદરાત્ ॥ ૨૧૨॥

પુનઃ પ્રણમ્ય તુષ્ટાવ વિઘ્નેશં સામગેન સઃ ।
સ્તોત્રેણાષ્ટકસંજ્ઞેન નામ્ના તં પ્રનનર્ત હ ॥ ૨૧૩॥

સરોમાઞ્ચં ગણેશાનઃ કૃષ્ણં દૃષ્ટ્વા જગાદ હ ।
વરં વરય મત્તસ્ત્વં દાસ્યામિ હૃદિ વાઞ્છિતમ્ ॥ ૨૧૪॥

ગણેશવચનં શ્રુત્વા તં જગાદ મહાયશાઃ ।
કૃષ્ણો ભક્ત્યા સમાયુક્તો વચનં ખેદસંયુતઃ ॥ ૨૧૫॥

શ્રીકૃષ્ણ ઉવાચ ।
યદિ તુષ્ટોઽસિ વિઘ્નેશ વરદોઽસિ વિશેષતઃ ।
તદા તે ભક્તિમુગ્રાં મે દેહિ હ્યવ્યભિચારિણીમ્ ॥ ૨૧૬॥

ભાદ્રશુક્લચતુર્થ્યાં યે ચન્દ્રં પશ્યતિ વિઘ્નપ ।
તે શાપદુઃખહીના વૈ ભવન્તુ કૃપયા ચ તે ॥ ૨૧૭॥

અહં ચાસન્નમરણજનવજ્જ્ઞાનવર્જિતઃ ।
પ્રકૃતોઽન્યસ્ય કા વાર્તા પ્રાર્થયામિ તતઃ પ્રભો ॥ ૨૧૮॥

જગાદ ગણનાથઃ સ તતસ્તં ભક્તિમોહિતઃ ।
મમ ભક્તિર્દૃઢા કૃષ્ણ ભવિષ્યતિ ચ તેઽનઘ ॥ ૨૧૯॥

સ્યમન્તકસ્ય માહાત્મ્યં ત્વદીયં લાઞ્છનપ્રદમ્ ।
વરદાનં મદીયં ચ યઃ શ‌ૃણોતિ જનાર્દન ॥ ૨૨૦॥

પઠેત્તુ ભાવયુક્તશ્ચેન્ માં ધૃત્વા હૃદયે હરે ।
સ એવ દોષસંહીનો ભવત્વત્ર ન સંશયઃ ॥ ૨૨૧॥

એવમુક્ત્વા ગણેશાનઃ કૃષ્ણં ભક્તિપરાયણમ્ ।
અન્તર્ધાનં ચકારાઽસૌ કૃષ્ણસ્તત્ર સમાસ્થિતઃ ॥ ૨૨૨॥

સમ્પૂર્ણં જાગરં કૃત્વા પઞ્ચમ્યાં નિયતઃ પ્રભુઃ ।
પૂજયિત્વા ગણેશાનં દદૌ દાનં વિશેષતઃ ॥ ૨૨૩॥

ગણેશકૃપયા તસ્યાંઽતર્જ્ઞાનં સમ્બભૂવ હ ।

ગ્રહણં ચ મણેસ્તેન જ્ઞાતમક્રૂરકારિતમ્ ॥ ૨૨૪॥

સભાયાં સ સમાગમ્યાક્રૂરં તત્રાજુહાવ ચ ।
તં પ્રણમ્ય મહાભાગમુવાચ હાસ્યસંયુતઃ ॥ ૨૨૫॥

મણિશ્ચ તાત સન્ત્યક્તો ગેહે તે શતધન્વના ।
બલભદ્રાર્થમદ્ય ત્વં મણિં દર્શય માનદ ॥ ૨૨૬॥

તતોઽક્રૂરેણ ચાનીતો મણિસ્તત્ર સુસંસદિ ।
દૃષ્ટ્વોગ્રસેનમુખ્યાસ્તે પ્રશશંસુર્જનાર્દનમ્ ॥ ૨૨૭॥

અક્રૂરશ્ચ વિદર્ભં તં ગત્વા હલધરં પ્રભુમ્ ।
મણિં દત્ત્વા સમાનીય સભાયાં સંસ્થિતોઽભવત્ ॥ ૨૨૮॥

સમાગતં મહાવીરમનમત્ કેશવઃ પુનઃ ।
સર્વે હર્ષયુતા જાતા દ્વારકાવાસિનસ્તતઃ ॥ ૨૨૯॥

નિર્દોષં વાસુદેવં તે માનયામાસુરાદરાત્ ।
રાજાનઃ સુહૃદઃ સર્વે નાનાદેશનિવાસિનઃ ॥ ૨૩૦॥

(Page ખં. ૪ અ. ૭ પાન ૨૦)
સર્વેષાં હૃદિ સંસ્થોઽયં ગણેશો બુદ્ધિનાયકઃ ।
તસ્યૈવ કૃપયા રાજન્ ભવેત્ કિં કિં સુદુર્લભમ્ ॥ ૨૩૧॥

અતો ભાદ્રચતુર્થ્યાં વૈ ન દ્રષ્ટવ્યઃ કદાચન ।
ચન્દ્રઃ કદાચિત્ દૃષ્ટશ્ચેદિદં શ્રોતવ્યમાદરાત્ ॥ ૨૩૨॥

તેન દોષવિહીનશ્ચ જાયતે નાત્ર સંશયઃ ।
અન્યથા ભ્રષ્ટભાવેન નારકી સ નરો ભવેત્ ॥ ૨૩૩॥

સ્યમન્તકમણેશ્ચિત્રં ચરિતં કથિતં પરમ્ ।
ચન્દ્રદર્શનજં દોષં હરતિ શ્રવણેન ચ ॥ ૨૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ભાદ્રશુક્લચતુર્થી
ચન્દ્રદર્શનદોષહરણચરિતવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૪.૬

## ૪.૭ ભાદ્રપદશુક્લચતુર્થીવ્રતવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રુતં મયા મહાખ્યાનં ત્વત્તો વેદવિદાંવર ।
ચતુર્થ્યોરુભયોઃ સારં માહાત્મ્યેન સમન્વિતમ્ ॥ ૧॥

તથાપિ વદ મે બ્રહ્મન્ પૃથક્ વ્રતસમુદ્ભવમ્ ।
ચરિત્રં વિસ્તરેણૈવ કેન કેન કૃતં પુરા ॥ ૨॥

કીદૃશી ચાઽભવત્ સિદ્ધિઃ કેન પ્રાપ્તો ગજાનનઃ ।
શ્રુત્વા વ્રતસ્ય માહાત્મ્યં યામિ નો તૃપ્તિમાદરાત્ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી વસિષ્ઠઃ પરમાર્થવિત્ ।
જગાદ તં પ્રજાનાથ શ‍ૃણુ તત્ સુખદં પરમ્ ॥ ૪॥

વસિષ્ઠ ઉવાચ ।
આદૌ શમ્ભ્વાદિભિશ્ચૈતત્ કૃતં વ્રતમનુત્તમમ્ ।
કૃષ્ણશુક્લચતુર્થ્યાં યદુપોષણપરાયણૈઃ ॥ ૫॥

તતઃ સ્વાયમ્ભુવાદ્યૈશ્ચ કૃતં સર્વાર્થસિદ્ધિદમ્ ।
તતો મુનિગણૈઃ સર્વૈરન્યૈર્વર્ણસ્થજન્તુભિઃ ॥ ૬॥

અધુનાઽહં પૃથક્ત્વેન કથયામિ વ્રતોદ્ભવમ્ ।
માહાત્મ્યં સર્વદં પુણ્યં સઙ્ક્ષેપેણ શ‍ૃણુષ્વ તત્ ॥ ૭॥

પુરા દૌષ્યન્તિકો નામ ભરતઃ સમ્બભૂવ હ ।
તેજસ્વી વીરમુખ્યેશઃ શસ્ત્રાસ્ત્રજ્ઞઃ પ્રતાપવાન્ ॥ ૮॥

જિત્વા ભૂમણ્ડલં સર્વં સાર્વભૌમો બભૂવ હ ।
સપ્તદ્વીપવતીં પૃથ્વીમપાલદ્ધર્મસંયુતઃ ॥ ૯॥

તદ્દેશે દૈવયોગેન હ્યનાવૃષ્ટિઃ સુદારુણા ।
બભૂવ સર્વલોકાસ્તે ભયભીતા બભૂવિરે ॥ ૧૦॥

ચરાચરં વ્યથાયુક્તં દૃષ્ટ્વા રાજા મહાયશાઃ ।
કણ્વં મુનિવરં શાન્તં યયૌ શરણમાદરાત્ ॥ ૧૧॥

તં પ્રણમ્ય મહાત્માનં પૂજયામાસ ભક્તિતઃ ।

કૃત્વા કરપુટં તસ્યાઽગ્રે સ્થિતો ભરતોઽભવત્ ॥ ૧૨॥

તમુવાચ મહાયોગી ગાણપત્યપ્રિયઃ સદા ।
કણ્વો વેદાર્થસન્નિષ્ઠો ભરતં રાજસત્તમમ્ ॥ ૧૩॥

કણ્વ ઉવાચ ।
કિમર્થમાગતો રાજન્ કુશલં તે મહામતે ।
અસ્તિ દેશાદિભાવેષુ તિષ્ઠ ત્વં ચાસનોત્તમે ॥ ૧૪॥

કણ્વસ્ય વચનં શ્રુત્વા હર્ષયુક્તો મહીપતિઃ ।
મુનિદત્તે વિવેશાસાવાસને સ કૃતાઞ્જલિઃ ॥ ૧૫॥

ઉવાચ તં મહાત્માનં કણ્વં વેદવિદાં વરમ્ ।
ભરતો રાજનીતિજ્ઞો ભક્તિયુક્તો વિશેષતઃ ॥ ૧૬॥

ભરત ઉવાચ ।
ત્વત્પ્રસાદેન યોગીન્દ્ર કુશલં મે પ્રવર્તતે ।
દૈવયોગેન તદપિ દુઃખિતોઽહં સમાગતઃ ॥ ૧૭॥

(Page ખં. ૪ અ. ૭ પાન ૨૧)
નિત્યં સ્વધર્મયુક્તેન મયા સમ્પાલિતા મહી ।
દેવવ્રતાતિથિપ્રાજ્ઞપ્રીત્યર્થં યોગિસત્તમ ॥ ૧૮॥

વર્ણાશ્રમાચારયુતા જનાઃ સર્વે ભવન્તિ ચ ।
તથાપિ પાપજં દુઃખં સમ્પ્રાપ્તં તન્ન વેદ્મ્યહમ્ ॥ ૧૯॥

અનાવૃષ્ટિશ્ચ સમ્ભૂતા પ્રભો સર્વત્ર દુઃખદા ।
ચરાચરં ભયોદ્વિગ્નં બભૂવ રસહીનતઃ ॥ ૨૦॥

તદર્થં ત્વાં મહાયોગિન્નાગતોઽહં વિશેષતઃ ।
ત્વદ્દર્શનજપુણ્યેન સફલો મે ભવોઽભવત્ ॥ ૨૧॥

અધુના બ્રૂહિ પાપસ્ય સ્વરૂપં તન્નિહન્મ્યહમ્ ।
યેન વૃષ્ટિર્ભવેત્ પૂર્ણા તથા કુરુષ્વ માનદ ॥ ૨૨॥

તતસ્તં નૃપશાર્દૂલમુવાચ મુનિસત્તમઃ ।
કણ્વઃ શ્રુત્વા ચ વૃત્તાન્તં દયાયુક્તઃ સ્વભાવતઃ ॥ ૨૩॥

કણ્વ ઉવાચ ।
શૃણુ રાજન્ મહત્ પાપં તવ રાજ્યે પ્રવર્તિતમ્ ।

તેનાઽવૃષ્ટિભવં દુઃખં પ્રાદુર્ભૂતં ન સંશયઃ ॥ ૨૪॥

ચતુઃપદવિહીનં તે રાજ્યં ભવતિ નિશ્ચિતમ્ ।
જનૈઃ સર્વૈઃ સુશીલૈશ્ચ પાપં ઘોરં કૃતં મહત્ ॥ ૨૫॥

ત્વં પાપશીલભાવેન વર્તસે જનવત્સલ ।
ધર્માર્થકામમોક્ષૈશ્ચ હીનોઽસિ પુરુષાધમ ॥ ૨૬॥

ચતુર્થીસમ્ભવં તાત વ્રતં સર્વાર્થસિદ્ધિદમ્ ।
કાર્ષ્ણં શૌક્લં સુવિખ્યાતં ભ્રષ્ટં રાજ્યેઽભવન્નૃપ ॥ ૨૭॥

ચતુર્વિધં જગત્સર્વં સ્થૂલસૂક્ષ્માદિભેદતઃ ।
સઙ્કષ્ટં યત્તદેવ ત્વં જાનીહિ નૃપનાયક ॥ ૨૮॥

ચતુર્વિધં ચ સઙ્કષ્ટં હરતિ વ્રતકારિણઃ ।
સા સઙ્કષ્ટચતુર્થી વૈ કૃષ્ણા તે કથિતા મયા ॥ ૨૯॥

ચતુર્વિધં યા દદાતિ સા શુક્લા વરદા મતા ।
સઞ્ચિતં નાસ્તિ ચેદ્રાજન્ વ્રતકારિજનાય વૈ ॥ ૩૦॥

ચતુર્થીજં સ માહાત્મ્યં કથયામાસ વિસ્તરાત્ ।
કણ્વસ્તદ્ભરતાયૈવ સ્વશિષ્યાય વિશેષતઃ ॥ ૩૧॥

વ્રતાનિ વૈ નિષ્ફલાનિ ચતુર્થીહીનકાનિ ચેત્ ।
જ્ઞાત્વા પ્રણમ્ય તં રાજોવાચ હર્ષસમન્વિતઃ ॥ ૩૨॥

ભરત ઉવાચ ।
સ્વામિન્ વદ ગણેશસ્ય માહાત્મ્યં સર્વસિદ્ધિદમ્ ।
એતાદૃશં વ્રતં યસ્ય તં ભજિષ્યામિ નિત્યદા ॥ ૩૩॥

કણ્વ ઉવાચ ।
શ‍ૃણુ રાજન્ ગણેશસ્ય માહાત્મ્યં સર્વદં પરમ્ ।
ક્રતુના કથિતં મે યદ્બ્રહ્મપુત્રેણ ધીમતા ॥ ૩૪॥

એકદાઽહં તપોયુક્તસ્તિષ્ઠામિ સ્વાશ્રમે પુરા ।
વાયુમાત્રાશનો ભૂત્વા તપામિ સ્મ તપો મહત્ ॥ ૩૫॥

મદીયતપસા સર્વં વ્યાપ્તમાસીન્નરાધિપ ।
તથાપિ યોગમાસ્થાય સંસ્થિતોઽહં વિશેષતઃ ॥ ૩૬॥

તતઃ પ્રજાપતિઃ સાક્ષાદાશ્રમે મે સમાગતઃ ।

ક્રતુર્યોગીન્દ્રવન્દ્યો યો ગાણપત્યો મહાયશાઃ ॥ ૩૭॥

તં પ્રણમ્ય મહાત્માનં પૂજયિત્વા પુરઃ સ્થિતમ્ ।
કૃતાઞ્જલિં મામુવાચ સ તથા ભક્તવત્સલઃ ॥ ૩૮॥

ક્રતુરુવાચ ।
વત્સ તિષ્ઠસ્વ મે દત્ત આસને કિં મહામતે ।
ઇચ્છા તે વદ માં તાત કરિષ્યામિ હિ તં ચ તે ॥ ૩૯॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષિતોઽહં નરાધિપ ।
આસને સમુપાવેશ્યાવદત્તં વિનયાન્વિતઃ ॥ ૪૦॥

કણ્વ ઉવાચ ।
તવ દર્શનમાત્રેણ કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ।
તથાપિ શાન્તિદં યોગં વદ પૂર્ણં દયાનિધે ॥ ૪૧॥

ક્રતુરુવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા વત્સ શ્રેષ્ઠાચ્છ્રેષ્ઠતમં મહત્ ।
કથયામિ મહાભાગ બ્રહ્મણઃ સંશ્રુતં મયા ॥ ૪૨॥

(Page ખં. ૪ અ. ૭ પાન ૨૨)
તપસ્ત્યક્ત્વા પુરા તાત યોગમાર્ગપરાયણઃ ।
ન શાન્તિં પ્રલભે તત્ર યોગભૂમિં પ્રસાધયન્ ॥ ૪૩॥

તતોઽહં પિતરં ગત્વા બ્રહ્માણં સર્વવેદિનમ્ ।
વન્દ્યં તં યોગશાન્ત્યર્થમપૃચ્છં વિનયાન્વિતઃ ॥ ૪૪॥

સ્વામિન્ શાન્તિપ્રદં બ્રહ્મ કીદૃશં વદ મે પ્રભો ।
કેન યોગેન લભ્યં તત્ પ્રભવેત્ કૃપયાન્વિતઃ ॥ ૪૫॥

બ્રહ્મોવાચ ।
યોગશાન્તિપ્રદં બ્રહ્મ ગાણેશં વિદ્ધિ પુત્રક ।
મનોવાણીમયં સર્વં ત્યજ યોગસ્ય સેવયા ॥ ૪૬॥

મનોવાણીવિહીનં યદેવ તત્તાદૃશં મતમ્ ।
ગણેશોઽહં ન ભિન્નશ્ચ બ્રહ્મણાં નાયકઃ સ્મૃતઃ ॥ ૪૭॥

મનોવાણીમયઃ પ્રોક્તો ગકારો વેદવાદતઃ ।
મનોવાણીવિહીનશ્ચ ણકારઃ સર્વસમ્મતઃ ॥ ૪૮॥

તયોઃ સ્વામી ગણેશાનો નામ્ના ગણપતેર્યદા ।
ગકારસ્ય ણકારસ્ય યોગો વેદપ્રમાણતઃ ॥ ૪૯॥

સમાધિના લભ્યતે યચ્ચિત્તેન ચ મહામતે ।
ગકારાક્ષરગં જ્ઞાનં જ્ઞાતવ્યં વેદવાદતઃ ॥ ૫૦॥

ચિત્તેન યન્ન લભ્યેત ણકારં વિદ્ધિ માનદ ।
જ્ઞાનાજ્ઞાનમયં ચિત્તં ત્યક્ત્વા શાન્તિમવાપ્સ્યસિ ॥ ૫૧॥

એતદેવ પરં ગુહ્યં શાન્તિદં કથિતં મયા ।
તદર્થં ગણરાજં ત્વં ભજસ્વ ભાવસંયુતઃ ॥ ૫૨॥

એકાક્ષરં મહામન્ત્રં ગૃહાણ ત્વં મહામતે ।
ધ્યાનયોગેન વિઘ્નેશં પ્રાપ્સ્યસિ ત્વં ન સંશયઃ ॥ ૫૩॥

એવમુક્ત્વા મહામન્ત્રં દદૌ મહ્યં વિધાનતઃ ।
તં પ્રણમ્ય વને તાત ગતોઽહં યોગકારણાત્ ॥ ૫૪॥

ક્રમેણ ચિત્તભૂમીનાં યોગં ત્યક્ત્વા મયા પરમ્ ।
ચિત્તં ચિન્તામણૌ પુત્ર ક્ષિપ્તં તદ્રૂપભાવતઃ ॥ ૫૫॥

તતો યોગીન્દ્રવન્દ્યોઽહં જાતસ્તદપિ નિત્યદા ।
ગણેશધ્યાનસંયુક્તોઽભવં તદ્ભક્તિકામ્યયા ॥ ૫૬॥

તતો વિઘ્નપતિઃ સાક્ષાદ્દર્શનં મે દદૌ મયા ।
સ્તુતઃ સમ્પૂજિતઃ સોઽપિ દદૌ સ્વભક્તિમુત્તમામ્ ॥ ૫૭॥

તદાદિગાણપત્યોઽહં જાતઃ સર્વૈશ્ચ વન્દિતઃ ।
ભજસ્વ ગણરાજં તમતસ્ત્વં યોગકામ્યયા ॥ ૫૮॥

કણ્વ ઉવાચ ।
એવમુક્ત્વા મહાયોગી મહ્યં મન્ત્રં દદૌ તતઃ ।
એકાક્ષરં યથાન્યાયમન્તર્ધાનં ચકાર હ ॥ ૫૯॥

અહં તથા ગણેશાનં સાધયિત્વા વિશેષતઃ ।
શાન્તિં પ્રાપ્તસ્તં તથાપિ ભજામ્યનન્યચેતસા ॥ ૬૦॥

અતસ્ત્વમપિ રાજેન્દ્ર ભજ વિઘ્નપતિં સદા ।
ચતુર્થીવ્રતસંયુક્તો બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૬૧॥

તત એકાક્ષરં મન્ત્રં દદૌ તસ્મૈ મહામુનિઃ ।

કણ્વં પ્રણમ્ય રાજર્ષિર્યયૌ સ્વનગરે તદા ॥ ૬૨॥

તસ્મિન્ કાલે ચતુર્થી સા શુક્લા ભાદ્રી સમાગતા ।
કૃતા તેન સુભક્ત્યા વૈ નગરસ્થજનૈઃ સહ ॥ ૬૩॥

તતઃ સર્વત્ર સઙ્ઘોષઃ કૃતસ્તેન મહીભૃતા ।
શુક્લાં કૃષ્ણાં ચતુર્થીં યે નાઽઽચરિષ્યન્તિ નિત્યદા ॥ ૬૪॥

તે દણ્ડૈઃ પીડનીયા વૈ તતઃ સર્વેઽભવન્ જનાઃ ।
વ્રતકારિણ એતસ્માત્ પુણ્યાત્ વૃષ્ટિર્બભૂવ હ ॥ ૬૫॥

હૃષ્ટપુષ્ટજનાઃ સર્વે તયા જાતા નૃપાત્મજ ।
રોગાદિદોષહીનાસ્તે ભજંસ્તં ગણનાયકમ્ ॥ ૬૬॥

ભરતઃ સ્મ મહારાજોઽભજત્સોઽનન્ય ચેતસા ।
ગણેશં ભક્તિસંયુક્તો ગાણપત્યપ્રિયોઽભવત્ ॥ ૬૭॥

સ પુત્રે રાજ્યમુગ્રં તન્નિક્ષિપ્ય વનગોઽભવત્ ।
(Page ખં. ૪ અ. ૮ પાન ૨૩)
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૬૮॥

ક્રમેણ ભૂમિસંસ્થા યેઽભવન્ સ્વાનન્દગા જનાઃ ।
ચતુર્થી પુણ્યયોગેન યથા યોગપરાયણાઃ ॥ ૬૯॥

સ્પર્શેન ભરતસ્યૈવ જનાઃ કીટાદિકા નૃપ ।
પુણ્યરૂપા બભૂવુસ્તેઽથાન્તે સ્વાનન્દગામિનઃ ॥ ૭૦॥

એતાદૃશેન ભૂપેન પુણ્યશાલિજનાઃ કૃતાઃ ।
યજ્ઞૈઃ સર્વા ધરા યેન ચિત્રિતા પુણ્યકારિણા ॥ ૭૧॥

ભરતેન સમો રાજન્ ન કશ્ચિત્ પ્રબભૂવ હ ।
જ્ઞાનેન સ્વબલેનાઽપિ યશસા ધર્મશાલિના ॥ ૭૨॥

ભાદ્રશુક્લચતુર્થ્યાસ્તુ મહિમા કથિતો મયા ।
ચતુર્વર્ગફલૈર્યુક્તો બ્રહ્મભૂયપદપ્રદઃ ॥ ૭૩॥

ભાદ્રશુક્લચતુર્થ્યાં તુ માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય રાજેન્દ્ર સર્વદં પ્રભવેદ્ ધ્રુવમ્ ॥ ૭૪॥

ભાદ્રશુક્લચતુર્થ્યાં વૈ શઙ્કરસ્ય હૃદિ પ્રભુઃ ।
પ્રાદુર્બભૂવ મધ્યાહ્ને ધ્યાનજઃ સ સુતોઽભવત્ ॥ ૭૫॥

તદાદિ સા તિથિર્મુખ્યા બભૂવ જન્મધારિણી ।
ગણેશસ્ય ન સન્દેહો બ્રહ્મભૂયપદપ્રદા ॥ ૭૬॥

સૃષ્ટ્યાદૌ પઞ્ચ દેવેશૈઃ સ્થાપિતા મૂર્તિરુત્તમા ।
મયૂરે ગણનાથસ્ય મધ્યાહ્ને ભાદ્રગે તિથૌ ॥ ૭૭॥

મયૂરેશાવતારો ભાદ્રપદેયો બભૂવ સઃ ।
મધ્યાહ્ને શઙ્કરગૃહે ચતુર્થ્યાં શુક્લપક્ષકે ॥ ૭૮॥

તસ્યાં યે મૃન્મયીં મૂર્તિં પૂજયન્તિ નરાદયઃ ।
દેવાઃ શઙ્કરમુખ્યાશ્ચ મહોત્સવપરાયણાઃ ॥ ૭૯॥

તે સર્વે વિઘ્નહીનાશ્ચ ભવન્તિ સુખભોગિનઃ ।
અન્તે સ્વાનન્દગા ભૂપ બ્રહ્મભૂતા ભવન્તિ ચ ॥ ૮૦॥

મધ્યાહ્ને પૂજનં પ્રોક્તં ગણેશસ્ય વિશેષતઃ ।
ઉપોષણસમાયુક્તૈશ્ચતુર્થ્યાં વ્રતકારિભિઃ ॥ ૮૧॥

પઞ્ચમ્યાં પારણં કૃત્વા દ્વિજૈઃ સહ મહામતે ।
મૂર્તિં તાં મૃન્મયીં પૂજ્યાં વિસૃજ્ય નિનયેજ્જલમ્ ॥ ૮૨॥

ચતુર્થ્યાં મૃન્મયીં મૂર્તિં ભાદ્રે યે નાર્ચયન્તિ ચેત્ ।
તેષાં નિષ્ફલરૂપં વૈ કર્મ સર્વં ભવિષ્યતિ ॥ ૮૩॥

ન તેષાં દર્શનં કાર્યં નરૈરાત્મહિતેપ્સુભિઃ ।
પતિતાસ્તે મતાઃ શાસ્ત્રે નારકાશ્ચ ભવન્ત્યતઃ ॥ ૮૪॥

ઇહ વિઘ્નસમાયુક્તા નાનારોગપ્રપીડિતાઃ ।
દારિદ્ર્યાદિસમાયુક્તા મહાપાપા મતા નૃપ ॥ ૮૫॥

ચતુર્થ્યાં સર્વવર્ણસ્થૈર્ભાદ્રે પૂજ્યો ગજાનનઃ ।
મૃન્મયો વિઘ્નહીનાસ્તે ભવન્તિ સફલક્રિયાઃ ॥ ૮૬॥

ઇયં ભાદ્રપદે માસિ ચતુર્થી શુક્લરૂપિણી ।
તસ્યાશ્ચરિતમાદ્યં તે કથિતં સ્વલ્પભાવતઃ ॥ ૮૭॥

અત્ર તે વર્ણયિષ્યેઽહં ઇતિહાસં પુરાતનમ્ ।
તચ્છૃણુષ્વ મહાભાગ ચતુર્થીવ્રતજં મહત્ ॥ ૮૮॥

દ્રાવિડે નગરે રાજંશ્ચાણ્ડાલઃ કોઽપિ પાપકૃત્ ।

કુષ્ઠરોગયુતઃ પૂર્ણઃ પરસ્ત્રીલમ્પટોઽભવત્ ॥ ૮૯॥

ચતુર્થ્યાં ભાદ્રમાસે સ જ્વરયુક્તો બભૂવ હ ।
જ્વરસ્ય પીડયાઽત્યન્તં પીડિતો રાજસત્તમ ॥ ૯૦॥

અન્નેન સ જલેનાઽપિ હીનોઽભૂદ્દૈવયોગતઃ ।
પઞ્ચમ્યાં મરણે પ્રાપ્તે વિમાનેન જગામ હ ॥ ૯૧॥

તસ્યાઙ્ગસ્પર્શતો વાયુર્યમલોકે જગામ હ ।
તેન સ્પૃષ્ટા નરાસ્તત્ર નરકસ્થાઃ સમન્તતઃ ॥ ૯૨॥

તે સર્વે યાનગા ભૂત્વા ગતાઃ સ્વાનન્દકે પુરે ।
દૃષ્ટ્વા ગણપતિં તૈઃ સ બ્રહ્મભૂતો બભૂવ હ ॥ ૯૩॥

વ્રતમજ્ઞાનતશ્ચૈવં ફલપ્રદમિદં મતમ્ ।
(Page  ખં. ૪ અ. ૮ પાન ૨૪)
યથાવિધિ કૃતં યેન તત્ર ચિત્રં કિમપ્યહો ॥ ૯૪॥

ચતુર્થ્યા મહિમાઽયં કથયિતું ન પ્રશક્યતે ।
પુરુષાર્થાશ્ચ ચત્વારઃ પ્રાપ્યન્તે વ્રતમાત્રતઃ ॥ ૯૫॥

મુદ્ગલ ઉવાચ ।
વસિષ્ઠવચનં શ્રુત્વા દશરથસ્તમબ્રવીત્ ।
શ ૃણુ દક્ષ મહાભાગ તાં કથાં પાવનીં પ્રભો ॥ ૯૬॥

દશરથ ઉવાચ ।
ચાણ્ડાલો ગણનાથસ્ય પુપૂજ સ ન મૃન્મયીમ્ ।
મૂર્તિં દોષી કથં સ્વામિન્ બ્રહ્મભૂતો બભૂવ હ ॥ ૯૭॥

વસિષ્ઠ ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા રાજન્ શ ૃણુ સંશયનાશનમ્ ।
જ્ઞાનં તે કથયિષ્યામિ ભવેલ્લોકોપકારદમ્ ॥ ૯૮॥

ચાણ્ડાલસ્ય ચતુર્થ્યાસ્તુ જ્ઞાનં નાઽભૂદ્ દુરાત્મનઃ ।
પૂજનં ચ તથા તસ્યોલ્લઙ્ઘનં ન તતોઽભવત્ ॥ ૯૯॥

અતોઽયં દોષહીનશ્ચ સ્વાનન્દસ્થો બભૂવ હ ।
પૂજનોલ્લઙ્ઘનાભ્યાં સ વર્જિતો જ્ઞાનભાવતઃ ॥ ૧૦૦॥

એવં નાનાજનાશ્ચેહ ભુક્ત્વા તુ વિવિધં સુખમ્ ।

અન્તે સ્વાનન્દગા રાજન્ બભૂવુર્વ્રતમાત્રતઃ ॥ ૧૦૧॥

તત્રૈકં કથિતં પ્રોક્તું નાલં વર્ષાયુતૈરપિ ।
પૂર્ણં ભવતિ માહાત્મ્યં સઙ્ક્ષેપેણ નિરૂપિતમ્ ॥ ૧૦૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ભાદ્રપદશુક્લચતુર્થીવ્રતવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૪.૭

## ૪.૮ વ્રતવર્ણનં નામાષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વસિષ્ઠ ઉવાચ ।
આશ્વિને વરદાત્રી યા ચતુર્થી શુક્લપક્ષગા ।
તાં શ‍ૃણુષ્વ મહાભાગ સવ્રતાં સર્વદાયિનીમ્ ॥ ૧॥

ઇતિહાસં પ્રવક્ષ્યામિ પુરાતનભવં નૃપ ।
વ્રતસંયુક્તમાહાત્મ્યં ભવેત્ સર્વાર્થસાધકમ્ ॥ ૨॥

રૈવતાન્તરગો રાજા કીર્તિમાંશ્ચ બભૂવ હ ।
મતો નામ્ના ધર્મધરઃ પૂર્ણશસ્ત્રાસ્ત્રપારગઃ ॥ ૩॥

દેવવિપ્રાતિથિપ્રેપ્સુઃ પઞ્ચયજ્ઞપરાયણઃ ।
નીતિજ્ઞઃ પુત્રવલ્લોકાન્ પાલયન્ સ્વહિતે રતઃ ॥ ૪॥

ભાર્યા તસ્યાઽભવત્ સાઽપિ પાતિવ્રત્યગુણાન્વિતા ।
સર્વલક્ષણસંયુક્તા વિપ્રદેવાતિથિપ્રિયા ॥ ૫॥

ગજાનાં ચ હયાનાં વૈ પદાતીનાં મહીપતેઃ ।
રથાનાં નૈવ સઙ્ખ્યાઽસ્તિ ધાનુષ્કાણાં વિશેષતઃ ॥ ૬॥

સપ્તદ્વીપવતીં પૃથ્વીં પાલયન્ સ નરાધિપઃ ।
દેવાદીનાં ચ સઙ્ગ્રામે હ્યજેયઃ પરવીરહા ॥ ૭॥

તસ્ય વન્ધ્યત્વદોષેણ નૃપ પુત્રો બભૂવ નો ।
નાનાયત્નપરો રાજા પુત્રાર્થે પ્રબભૂવ હ ॥ ૮॥

તીર્થયાત્રાદિકં સર્વં ચકાર વિધિવન્નૃપઃ ।
અનુષ્ઠાનવ્રતાદીનિ દેવાનાં પૂજનં તથા ॥ ૯॥

એવં નાનાવિધૈઃ પુણ્યૈર્ન બભૂવ સુતસ્તતઃ ।

રાજ્યં ત્યક્ત્વા વને રાજા સસ્ત્રીકઃ સ જગામ હ ॥ ૧૦॥

તત્ર ભ્રમણયુક્તઃ સ દદર્શ હ મહાવનમ્ ।
સિંહવ્યાલાદિસંયુક્તં ભયદં સર્વજન્મિનામ્ ॥ ૧૧॥

દુઃખયુક્તઃ સ રાજર્ષિઃ પ્રવેશં સ ચકાર હ ।
વને તત્ર મુનિશ્રેષ્ઠં સૌભરિં સન્દદર્શ ચ ॥ ૧૨॥

તં પ્રણમ્ય મહાભાગઃ સસ્ત્રીકઃ પુરતો મુનેઃ ।
કૃતાઞ્જલિપુટો ભૂત્વા તસ્થૌ સ નૃપસમ્મુખઃ ॥ ૧૩॥

(Page ખં. ૪ અ. ૮ પાન ૨૫)
તતઃ સૌભરિણા સોઽપિ સત્કૃતો વચનેન ચ ।
નિષસાદાસને તત્ર મુનિના દર્શિતે નૃપઃ ॥ ૧૪॥

તમુવાચ મહાભાગં રાજાનં મુનિસત્તમઃ ।
કોઽસિ ત્વં વન ઉગ્રે મેઽત્ર કિમર્થં સમાગતઃ ॥ ૧૫॥

ઇતિ પૃષ્ટો મહીપાલસ્તમુવાચ સુહર્ષિતઃ ।
કીર્તિમાન્ સર્વધર્મજ્ઞઃ કૃત્વા કરપુટં વચઃ ॥ ૧૬॥

કીર્તિમાનુવાચ ।
દ્રાવિડે વસતિર્મેઽસ્તિ નગરે સુરસત્તમે ।
રાજ્યં કરોમિ તત્રાઽહં સાર્વભૌમો મહામુને ॥ ૧૭॥

અપુત્રો દૈવયોગેન જાતોઽહં મુનિસત્તમ ।
પુત્રાર્થે વ્રતતીર્થાદીન્ નાનાધર્માન્ કરોમિ વૈ ॥ ૧૮॥

રાજ્યં ત્યક્ત્વા વને યોગિન્નાગતઃ પુત્રકામ્યયા ।
તત્ર તે દર્શનં પ્રાપ્તં સર્વસિદ્ધિપ્રદં પ્રભો ॥ ૧૯॥

તવ દર્શનમાત્રેણ સફલો મે ભવો ભવેત્ ।
માતૃપિત્રાદિકં સર્વં ધન્યં જાતં ન સંશયઃ ॥ ૨૦॥

અધુના બ્રૂહિ મે નાથ પુત્રપ્રાપ્ત્યર્થમાદરાત્ ।
ઉપાયં તં ચરિષ્યામિ ત્વદાજ્ઞાવશગો મુને ॥ ૨૧॥

ઇહ જન્મનિ ભો વિપ્ર ન કૃતં પાપમુલ્બણમ્ ।
મયા રાજ્યં કૃતં ભૂમેર્ભયયુક્તેન ચેતસા ॥ ૨૨॥

તથાપિ વન્ધ્યજો દોષો મયા પ્રાપ્તો મહામુને ।

પૂર્વજન્મકૃતં પાપં જ્ઞાયતે નૈવ ચેતસા ॥ ૨૩॥

કથયસ્વ મહોગ્રં મે પાપં સર્વવિદાં વર ।
યોગીન્દ્રોઽસિ મહાતેજાઃ સાક્ષાદ્બ્રહ્મતનોર્ધરઃ ॥ ૨૪॥

વસિષ્ઠ ઉવાચ ।
એવં વિનયયુક્તેન રાજ્ઞા પૃષ્ટો મહામુનિઃ ।
સૌભરિસ્તં જગાદેદં વચનં ગણપપ્રિયઃ ॥ ૨૫॥

સૌભરિરુવાચ ।
કૃતં ત્વયા મહત્પાપં મહારાજ વિશેષતઃ ।
પૂર્વજન્મકૃતં નૈવ પાપં તે વિદ્યતેઽધમ ॥ ૨૬॥

તવ રાજ્યે મહામૂર્ખ ચતુર્થીવ્રતમુત્તમમ્ ।
લયં પ્રાપ્તં વિશેષેણ વ્રતાદૌ ફલદં મતમ્ ॥ ૨૭॥

ચતુર્થીવ્રતમાદ્યં યન્માનવેન નરાધમ ।
ન કૃતં ચેદ્વ્રતાનીહ નિષ્ફલાનિ ભવન્તિ ચ ॥ ૨૮॥

વિશેષતસ્ત્વયા કર્મ નાનાપુણ્યાદિકં કૃતમ્ ।
ચતુર્થીહીનભાવેન નિષ્ફલં તદ્બભૂવ હ ॥ ૨૯॥

ચતુર્વિધપદાર્થાનાં દાત્રી સા વરદા મતા ।
ચતુર્વિધં તુ સઙ્કષ્ટં હરન્તી સઙ્કટી મતા ॥ ૩૦॥

ભુનક્તિ રાજા પાપં રાષ્ટ્રકૃતં શાસ્ત્રસમ્મતમ્ ।
જનાનાં વ્રતહીનાનાં પાપભાગી ભવાન્ મતઃ ॥ ૩૧॥

અતઃ પાપમયી મૂર્તિસ્ત્વમેવાત્ર ન સંશયઃ ।
તેન વન્ધ્યત્વમાપન્નો નરાધમ ન બુદ્ધ્યસે ॥ ૩૨॥

સૌભરેર્વચનં શ્રુત્વા કીર્તિમાંસ્તં જગાદ હ ।
વિનયેન સમાયુક્તો ભયભીતશ્ચ પાર્થિવઃ ॥ ૩૩॥

કીર્તિમાનુવાચ ।
અજ્ઞાનેન કૃતં કર્મ મયા સ્વામિન્ સુપાપિના ।
કીદૃશં તદ્વ્રતં વિપ્ર મહ્યં વદ વિધાનતઃ ॥ ૩૪॥

પુત્રપ્રાપ્ત્યર્થમેવં મે વદોપાયં મહામતે ।
યેન પાપવિહીનોઽહં ભવામિ પુત્રવાન્ સુખી ॥ ૩૫॥

સૌભરિરુવાચ ।
ચતુર્થીવ્રતમાદ્યં ત્વં કુરુષ્વ નૃપ નિત્યદા ।
જનૈઃ સર્વૈસ્તદા સર્વપાપહીનો ભવિષ્યસિ ॥ ૩૬॥

અજ્ઞાનેન કરોષિ સ્મ પાપં જ્ઞાત્વાઽનુતાપવાન્ ।
વ્રતાચરણમાત્રેણ નિષ્પાપઃ પુણ્યભાગ્ ભવેઃ ॥ ૩૭॥

ઇત્યુક્ત્વા વ્રતમાહાત્મ્યં કથયામાસ વિસ્તરાત્ ।
તતઃ સોઽપિ મહાબુદ્ધિઃ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૩૮॥

કીર્તિમાનુવાચ ।
(Page ખં. ૪ અ. ૮ પાન ૨૬)
કીદૃશોઽયં ગણાધીશો વ્રતં યસ્ય ચતુઃપદમ્ ।
બ્રહ્મભૂયકરં પ્રોક્તં ભજિષ્યામિ વિશેષતઃ ॥ ૩૯॥

તતસ્તં મુનિશાર્દૂલઃ સૌભરિઃ પુનરબ્રવીત્ ।
માહાત્મ્યં ગણનાથસ્ય શાન્તિયોગપદપ્રદમ્ ॥ ૪૦॥

સૌભરિરુવાચ ।
પુરાઽહં તપસા યુક્તો નાનાછન્દપરાયણઃ ।
અભવં તત્ર દેવા વૈ ભયભીતા બભૂવિરે ॥ ૪૧॥

અહો તપઃપ્રભાવેણ જિત્વા સર્વં દ્વિજોત્તમઃ ।
કિમિચ્છતિ પદં શ્રેષ્ઠં જ્ઞાયતેઽસ્માભિરેવ ન ॥ ૪૨॥

પ્રેષયામાસ સસ્ત્રીકં તતઃ કામં સુરાધિપઃ ।
તપોભઙ્ગાર્થમેવં મે કામસ્તત્ર સમાગતઃ ॥ ૪૩॥

ઉર્વશીસહિતાભિશ્ચાપ્સરોભિર્મધુના તથા ।
આત્તબાણઃ સ્વયં કામઃ પીડયામાસ માં શરૈઃ ॥ ૪૪॥

અહં તપઃપ્રભાવેણ જિત્વા કામં સહ સ્ત્રિયા ।
મોહહીનસ્તપસ્તત્રાઽતપં સુદૃઢનિશ્ચયઃ ॥ ૪૫॥

તતો મે તપસોગ્રેણ દાહયુક્તો બભૂવ હ ।
કામઃ પલાય્ય સર્વૈસ્તં મઘવન્તં જગાદ સઃ ॥ ૪૬॥

તતોઽહં યોગમાર્ગેણાંઽતર્નિષ્ઠશ્ચાભવન્નૃપ ।
જડોન્મત્તાદિમાર્ગેષુ સંસ્થિતો યોગકારણાત્ ॥ ૪૭॥

તતઃ શુકો મહાયોગી ગાણપત્યઃ સમાગતઃ ।
મમાશ્રમે સ માં દૃષ્ટ્વા જગાદેચ્છસિ કિં મુને ॥ ૪૮॥

તતસ્તં પ્રણતો ભૂત્વા કૃતાઞ્જલિઃ પુરઃ પ્રભોઃ ।
સ્થિત્વાઽવદં સુવાક્યં તચ્છૃણુ રાજન્ સુસિદ્ધિદમ્ ॥ ૪૯॥

મમ શ્રેષ્ઠેન ભાગ્યેન ત્વં પ્રાપ્તોઽસિ મહાયશાઃ ।
શાન્તિં વદ મહાયોગિન્ યયા શાન્તો ભવામ્યહમ્ ॥ ૫૦॥

શ્રીશુક ઉવાચ ।
ચિત્તં પઞ્ચવિધં ત્યક્ત્વા ચિત્તં કૃત્વા ચ તન્મયમ્ ।
નિરોધેનૈવ ભૂમીનાં શાન્તિં પ્રાપ્સ્યસિ નિશ્ચિતમ્ ॥ ૫૧॥

ચિન્તામણિં ભજસ્વ ત્વં મન્ત્રેણૈકાક્ષરેણ ચ ।
તેન ચિન્તામણૌ વિપ્ર સઞ્ચિત્તઃ સુભવિષ્યસિ ॥ ૫૨॥

ત્યક્ત્વા જડાદિકં માર્ગં શમદમપરાયણઃ ।
ગણનાથં મહાભાગ ભજ યત્નેન નિત્યદા ॥ ૫૩॥

એવમુક્ત્વા શુકો યોગી યયૌ સ્વેચ્છાપરાયણઃ ।
ગણેશનામ સઙ્કીર્ત્ય જપંશ્ચૈવ વિશેષતઃ ॥ ૫૪॥

અહં ગણપતિં ભક્ત્યાઽભજં સમ્ભક્તિસંયુતઃ ।
એકાક્ષરવિધાનેનાઽઽસ્થાપ્ય મૂર્તિં પુરો નૃપ ॥ ૫૫॥

તતઃ સ્વલ્પેન કાલેન શાન્તિં પ્રાપ્તોઽહમાદરાત્ ।
તથાપિ પૂજને સક્તોઽભજં તં ગણનાયકમ્ ॥ ૫૬॥

દશવર્ષે ગતે કાલે વિઘ્નેશો માં સમાગતઃ ।
મયા સમ્પૂજિતો રાજન્ સ્તુતશ્ચ વિવિધૈઃ સ્તવૈઃ ॥ ૫૭॥

ગાણપત્યપદં દત્ત્વા ગતઃ સ્વાનન્દકે પુરે ।
તદાદિ ગાણપત્યોઽહં ભજામિ બ્રહ્મનાયકમ્ ॥ ૫૮॥

એવમુક્ત્વા સ રાજાનં દદૌ મન્ત્રં વિધાનતઃ ।
ષડક્ષરં સ રાજર્ષિસ્તં પ્રણમ્ય યયૌ પુરમ્ ॥ ૫૯॥

સ આશ્વિન્યાં દ્વિતીયાયાં શુક્લાયાં તુ ગૃહે ગતઃ ।
તસ્મિન્ માસે ચતુર્થ્યાં ચ શુક્લાયાં વ્રતમારભત્ ॥ ૬૦॥

જનૈઃ સર્વૈઃ સમાયુક્ત ઉપોષણપરાયણઃ ।

મધ્યાહ્ને ગણપં તત્ર પ્રપૂજ્ય વિધિવન્નૃપઃ ॥ ૬૧॥

રાત્રૌ જાગરણં ચક્રે બાલવૃદ્ધસમન્વિતઃ ।
નરૈઃ સ્ત્રીભિસ્તદ્વ્રતં ચ કૃતં સર્વૈર્યથાતથમ્ ॥ ૬૨॥

શુક્લાં કૃષ્ણાં ચતુર્થીં યે ન કુર્વન્તિ નરાધમાઃ ।
તાડનીયાઃ પ્રયત્નેન પૃથિવ્યાં યત્ર તત્ર સઃ ॥ ૬૩॥

(Page ખં. ૪ અ. ૯ પાન ૨૭)
ઘોષેણ ઘોષયામાસ તતઃ સર્વે તથાઽભવન્ ।
વ્રતં તતો વૈ બભૂવ પ્રશસ્તં ભૂમિમણ્ડલે ॥ ૬૪॥

એવં ભૂમણ્ડલે રાજ્યં કૃત્વા પુત્રે નિવેદ્ય સઃ ।
વને ગત્વા ગણેશાનં સસ્ત્રીકો નૃપ આભજન્ ॥ ૬૫॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ।
તસ્ય રાજ્યે સ્થિતા લોકાઃ સર્વે સ્વાનન્દગા બભુઃ ॥ ૬૬॥

એવમન્યં દશરથ શ‍ૃણુષ્વ ત્વં વ્રતોદ્ભવમ્ ।
ઇતિહાસં પ્રવક્ષ્યામિ ચાશ્વિન્યાં પરમાદ્ભુતમ્ ॥ ૬૭॥

ભીમો નામ મહાવ્યાધઃ પાપકર્મપરાયણઃ ।
માર્ગે જનાન્ નિહત્વાઽગૃહ્ય ધનં સ તુતોષ હ ॥ ૬૮॥

એકદા વનમધ્યે સ બ્રાહ્મણં હન્તુમુદ્યતઃ ।
પલાયત દ્વિજસ્તત્ર વને ભયસમાકુલઃ ॥ ૬૯॥

એતસ્મિન્નન્તરે તત્રાશ્વગઃ શસ્ત્રધરઃ પુમાન્ ।
ધાવંશ્ચ બ્રાહ્મણં દૃષ્ટ્વા ભીમં ધૃત્વા ગતઃ પુરે ॥ ૭૦॥

તતો દ્વિજઃ સુખેનૈવ સ્વાશ્રમં પ્રજગામ હ ।
પુરુષો ભીમવ્યાધં તં રાજ્ઞે દુષ્ટં ન્યવેદયત્ ॥ ૭૧॥

તત્ર સોઽપિ ક્ષુધાવિષ્ટો વ્યાધઃ સંસ્થાપિતોઽભવત્ ।
રાજ્ઞાઽઽશ્વિન્યાં ચતુર્થ્યાં વૈ શુક્લાયાં દૈવયોગતઃ ॥ ૭૨॥

પઞ્ચમ્યાં તં જઘાનૈવ તતો વ્યાધં ગજાનનઃ ।
ચતુર્થ્યાં ક્ષુધિતત્વાત્ સ બ્રહ્મભૂતં ચકાર હ ॥ ૭૩॥

એવં નાનાજના રાજન્ ચતુર્થીવ્રતયોગતઃ ।
સ્વાનન્દસ્થા ભવન્તીહ મયા વક્તું ન શક્યતે ॥ ૭૪॥

ચતુર્થીજમિદં ચિત્રં ચરિતં કથિતં મયા ।
શુક્લાઽઽશ્વિન્યાં સમુદ્ભૂતં શ્રવણાત્ સર્વસિદ્ધિદમ્ ॥ ૭૫॥

શ‍ૃણુયાદ્યઃ પઠેદ્વાઽપિ ભુક્તિં મુક્તિં લભેન્નરઃ ।
પુત્રપૌત્રાદિસંયુક્તઃ સુહૃદ્ભિર્નૃપસત્તમ ॥ ૭૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શુક્લાઽઽશ્વિની ચતુર્થી
વ્રતવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૪.૮

## ૪.૯ કાર્તિકશુક્લચતુર્થીવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

વસિષ્ઠ ઉવાચ ।
કાર્તિકે માસિ શુક્લા યા ચતુર્થી સર્વસિદ્ધિદા ।
તાં શ‍ૃણુષ્વ મહાભાગ ઇતિહાસસમન્વિતામ્ ॥ ૧॥

સૂર્યવંશોદ્ભવો રાજા સુધન્વા નીતિસંયુતઃ ।
શસ્ત્રાસ્ત્રબલસંયુક્તો બભૂવ પરમદ્યુતિઃ ॥ ૨॥

ધર્મશીલો વદાન્યશ્ચ સત્યવાક્ સાધુસમ્મતઃ ।
દેવવિપ્રાતિથિપ્રાજ્ઞપઞ્ચયજ્ઞપરાયણઃ ॥ ૩॥

ભાર્યા કલાવતી તસ્ય બભૂવે રૂપશાલિની ।
પતિવ્રતા મહોદારા ધર્મશીલા વિશેષતઃ ॥ ૪॥

જિત્વા ભૂમણ્ડલં સર્વં રાજા તેજસ્વિનાં વરઃ ।
પાલયામાસ પૃથ્વીં સ નિત્યં ધર્મપરાયણઃ ॥ ૫॥

સામન્તા વશગા યસ્ય સૈન્યં સ્મ ગણનાતિગમ્ ।
સમ્પચ્ચ ધનદેનૈવ તુલ્યા સર્વત્ર સમ્બભૌ ॥ ૬॥

અર્ધાયુષા સમાયુક્તો બભૂવ નૃપસત્તમઃ ।
અકસ્માત્ કુષ્ઠસંયુક્તઃ કીટૈઃ સમ્પીડિતોઽભવત્ ॥ ૭॥

પૂયશોણિતઘર્મૌઘૈર્વ્યાપ્તો દુર્ગન્ધિસંયુતઃ ।
ન ચાઽલભત્ સુખં કિઞ્ચિચ્છૂલપ્રોતો યથા નરઃ ॥ ૮॥

ઔષધાનિ વિશેષેણ સિષેવે યત્નસંયુતઃ ।
નાનામન્ત્રપ્રયોગાદિ કારયામાસ માનવૈઃ ॥ ૯॥

અનુષ્ઠાનં દ્વિજૈઃ સોઽપિ વેદમન્ત્રૈઃ સુખપ્રદૈઃ ।
અકારયત્તથા તેભ્યો ન ફલં ચાઽભવત્ કદા ॥ ૧૦॥

તતસ્તીર્થાનિ બભ્રામ સ્નાનદાનપરાયણઃ ।
તથાપિ રોગસંયુક્તોઽધિકં રાજા બભૂવ હ ॥ ૧૧॥

તતો નિવૃત્તિમાપન્નો જગાદ સચિવાન્નૃપઃ ।
રાજ્યં મે પરિપાલ્યં વૈ યાવદાગમનં પુનઃ ॥ ૧૨॥

સાન્ત્વયિત્વા સ સસ્ત્રીકઃ સુહૃદઃ સર્વનાગરાન્ ।
વનં યયૌ નૃપશ્રેષ્ઠો બભ્રામ યત્ર તત્ર ચ ॥ ૧૩॥

તતો ગણપતિં રાજા સસ્માર દુઃખસંયુતઃ ।
વિઘ્નહીનાર્થમેવં સ તત્ર ચિત્રં બભૂવ હ ॥ ૧૪॥

અકસ્માન્ મુનિશાર્દૂલઃ પુલસ્ત્યસ્તત્ર ચાયયૌ ।
તં દૃષ્ટ્વા હર્ષસંયુક્તો નનામ પ્રિયયા સહ ॥ ૧૫॥

કૃત્વા કરપુટં રાજોવાચ તં મુનિનાયકમ્ ।
કિં પુણ્યં મે પુરા ચીર્ણં યેન દૃષ્ટો ભવાન્ મુને ॥ ૧૬॥

ધન્યં જન્મ તથા જ્ઞાનં જનકો જનની ચ મે ।
તપો ધર્માદિકં સર્વં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૭॥

એવં વિવદમાનં તં જગાદ મુનિસત્તમઃ ।
કિમર્થં રાજનીતિજ્ઞ વને ત્વં ચ સમાગતઃ ॥ ૧૮॥

એવં પૃષ્ટ્વા સ રાજાનં વૃક્ષચ્છાયાસમાશ્રિતઃ ।
પુલસ્ત્ય ઉપવિશ્યાથ તમુપાવેશ્ય સમ્બભૌ ॥ ૧૯॥

તતો રાજ્ઞા સ્વકીયો વૈ વૃત્તાન્તઃ કથિતોઽભવત્ ।
જગાદ પ્રણનામૈવં પુનસ્તં હર્ષસંયુતઃ ॥ ૨૦॥

સુધન્વોવાચ ।
દયાકરાશ્ચ યોગીન્દ્રાઃ પુરાણેષુ વદન્તિ યત્ ।
તદેવ સત્યમભવત્ ત્વાં દૃષ્ટ્વા દયયા યુતમ્ ॥ ૨૧॥

દુઃખિતં માં વિદિત્વા ત્વં સંસ્થિતો મુનિસત્તમ ।

સાક્ષાત્ પ્રજાપતિઃ પ્રોક્તઃ પુલસ્ત્યો બ્રહ્મણઃ સુતઃ ॥ ૨૨॥

સર્વજ્ઞસ્ત્વં મહાયોગિન્ ન્યાયં મે વદ માનદ ।
ધર્મયુક્તતયા રાજ્યં કરોમિ સ્મ નિરન્તરમ્ ॥ ૨૩॥

પૂર્વજન્મકૃતં મે કિં મહાપાપં સમાગતમ્ ।
યેનાઽહં કુષ્ઠસંયુક્તોઽભવં પશ્ય દયાયુતઃ ॥ ૨૪॥

વસિષ્ઠ ઉવાચ ।
સુધન્વનો વચઃ શ્રુત્વા તમુવાચ મહામુનિઃ ।
અત્યન્તં પીડિતં દૃષ્ટ્વા કરુણાયુતચેતસા ॥ ૨૫॥

પુલસ્ત્ય ઉવાચ ।
ઇહજન્મકૃતં પાપં બુદ્ધ્યસે ન નરાધમ ।
તેન કુષ્ઠયુતો જાતઃ શૃણુ તત્તે વદામ્યહમ્ ॥ ૨૬॥

તવ રાજ્યે નૃપશ્રેષ્ઠ વ્રતં ગાણેશ્વરં મહત્ ।
નષ્ટં ચતુર્થીસંજ્ઞં યત્ સર્વસિદ્ધિપ્રદં પરમ્ ॥ ૨૭॥

ચતુર્ણાં પુરુષાર્થાનાં સાધનં સર્વસમ્મતમ્ ।
તેન પ્રોક્તા ચતુર્થી સા વરદા સઙ્કટા મતા ॥ ૨૮॥

સર્વાદૌ ન કૃતં ચેદ્વૈ ભવેત્ સર્વં સુનિષ્ફલમ્ ।
કૃતં કર્મ નરેણાઽપિ ચતુર્વર્ગવિહીનકમ્ ॥ ૨૯॥

વર્ણૈઃ સર્વૈઃ કૃતં પાપં રાજાનમુપતિષ્ઠતિ ।
તેન ત્વં કુષ્ઠસંયુક્તોઽધુના જાતો નરાધમ ॥ ૩૦॥

મરિષ્યસિ યદા રાજંસ્તદા તે નરકે ગતિઃ ।
ભવિષ્યતિ ન સન્દેહશ્ચતુર્વર્ગવિહીનતા ॥ ૩૧॥

પુલસ્ત્યવચનં શ્રુત્વા દુઃખયુક્તો મહીપતિઃ ।
ઉવાચ તં મહાપ્રાજ્ઞં કૃતાઞ્જલિપુટોઽભવત્ ॥ ૩૨॥

સુધન્વોવાચ ।
ભગવન્ સર્વતત્ત્વજ્ઞ ત્વયા યત્ કથિતં વચઃ ।
તદેવ સત્યરૂપં વૈ મયા જ્ઞાતં ન સંશયઃ ॥ ૩૩॥

(Page ખં. ૪ અ. ૯ પાન ૨૯)
અધુના તદ્વ્રતં બ્રૂહિ કીદૃશં કસ્ય પૂજનમ્ ।

કસ્મિન્ કાલે પ્રકર્તવ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩૪॥

કુષ્ઠનાશાર્થમેવં મે વદોપાયં મહાપ્રભો ।
પ્રાયશ્ચિત્તં કરિષ્યામિ વ્રતલોપપ્રદોષહૃત્ ॥ ૩૫॥

એવં પૃષ્ટો મહાયોગી પુલસ્ત્યો હર્ષસંયુતઃ ।
તં જગાદ ગણેશાય નમ ઇત્યુપસંસ્મરન્ ॥ ૩૬॥

પુલસ્ત્ય ઉવાચ ।
અજ્ઞાનેન કૃતં દોષં પ્રાયશ્ચિત્તેન હન્તિ તમ્ ।
નરસ્તસ્માત્ત્વમેવાશુ વ્રતં કુરુ જનૈઃ સહ ॥ ૩૭॥

તેન કુષ્ઠવિહીનસ્ત્વં સુરૂપઃ પ્રભવિષ્યસિ ।
અનુતાપાચ્ચ તે રાજન્ પાપં નષ્ટં ન સંશયઃ ॥ ૩૮॥

ઇત્યુક્ત્વા તં તતો યોગી જગાદ વ્રતસમ્ભવામ્ ।
કથાં સર્વાં સ સંશ્રુત્ય હર્ષયુક્તો નૃપોઽભવત્ ॥ ૩૯॥

ઉવાચ તં મુનિશ્રેષ્ઠં પ્રણમ્ય ચ પુનઃ પુનઃ ।
ધન્યં મે જન્મ ભો નાથ શ્રુતં યેન મહદ્વ્રતમ્ ॥ ૪૦॥

નાનેન સદૃશં કિઞ્ચિન્ મયા જ્ઞાતં મહામતે ।
ત્વત્તો વદ મહાપ્રાજ્ઞ ગણેશસ્ય સ્વરૂપકમ્ ॥ ૪૧॥

તજ્ જ્ઞાત્વા સર્વભાવેન ભજિષ્યામિ મહામુને ।
નિત્યં ભક્તિસમાયુક્તો દેવદેવેશમાદરાત્ ॥ ૪૨॥

એવં પૃષ્ટઃ સ રાજાનં વચનં પ્રજગાદ હ ।
પુલસ્ત્યઃ સર્વભાવજ્ઞો ગાણપત્યો મહાયશાઃ ॥ ૪૩॥

પુલસ્ત્ય ઉવાચ ।
સુધન્વઞ્છૃણુ મે વાક્યં ગણેશજ્ઞાનકારકમ્ ।
બ્રહ્મભૂયમયં પૂર્ણં યોગાકારં વિશેષતઃ ॥ ૪૪॥

પુરાઽહં યોગશાન્ત્યર્થં નાનાયોગપરાયણઃ ।
અસાધયઞ્છમેનૈવ દમેન મનસો જયાત્ ॥ ૪૫॥

તથાપિ શાન્તિહીનોઽહં શરણં શઙ્કરં ગતઃ ।
તં પ્રણમ્ય મહાત્માનમપૃચ્છં યોગમુત્તમમ્ ॥ ૪૬॥

તતસ્તેન સમાખ્યાતં તચ્છૃણુષ્વ નરાધિપ ।

યેન ત્વં ગાણપત્યશ્ચ સાધનેન ભવિષ્યસિ ॥ ૪૭॥

શ્રીશિવ ઉવાચ ।
યોગશાન્તિમયં વિદ્ધિ ગણેશં ભજ ભાવતઃ ।
મનોવાણીવિહીનં તં મનોવાણીમયં ન ચ ॥ ૪૮॥

મનોવાણીમયં સર્વં સમ્પ્રજ્ઞાતસમુદ્ભવમ્ ।
ગકારાક્ષરગં વિદ્ધિ પશ્ય વેદે મહામતે ॥ ૪૯॥

મનોવાણીવિહીનં યદસમ્પ્રજ્ઞાતગં મતમ્ ।
ણકારાક્ષરસમ્ભૂતં નામ્નો ગણપતેર્યદિ ॥ ૫૦॥

તયોઃ સ્વામી ગણેશાનઃ શાન્ત્યા યોગેન લભ્યતે ।
ચિત્તભૂમિનિરોધેન તં ભજસ્વ વિનાયકમ્ ॥ ૫૧॥

એવમુક્ત્વા મહાદેવો વિરરામ વિશેષવિત્ ।
તં પ્રણમ્ય વનં ગત્વાઽસાધયં તં સુયત્નતઃ ॥ ૫૨॥

અષ્ટાક્ષરેણ મન્ત્રેણ ધ્યાત્વા ગણપતિં નૃપ ।
અતોષયં વિશેષેણ ચિત્તનિગ્રહભાવતઃ ॥ ૫૩॥

તતઃ સ્વલ્પેન કાલેન શાન્તિં પ્રાપ્તોઽહમાત્મનિ ।
તથાપિ મન્ત્રરાજં તમજપં પૂજને રતઃ ॥ ૫૪॥

એકવિંશતિવર્ષેષુ ગતેષુ સ વિનાયકઃ ।
આયયૌ મે વરં દાતું ભક્તાનુગ્રહકારકઃ ॥ ૫૫॥

તં દૃષ્ટ્વા પ્રણતો ભૂત્વાઽપૂજયં તુ યથાવિધિ ।
સ્તૌમિ નામાષ્ટકેન સ્મ કૌથુમેન મહાપ્રભુમ્ ॥ ૫૬॥

ગાણપત્યં સ માં કૃત્વા યયૌ સ્વાનન્દકે પુરે ।
તદારભ્યાહમત્યન્તં ભજામિ ગણનાયકમ્ ॥ ૫૭॥

એવમુક્ત્વા મહીપાલં તથા દશરથ સ્વયમ્ ।
મન્ત્રમષ્ટાક્ષરં તસ્મૈ દદૌ વિધિસમન્વિતમ્ ॥ ૫૮॥

તેન સ્તુતો મહાયોગી પુલસ્ત્યોઽતર્દધે પ્રભુઃ ।
રાજા સ્વનગરે ગત્વા કાર્તિકે હર્ષિતોઽભવત્ ॥ ૫૯॥

જનૈઃ સર્વૈર્મહાભાગશ્ચકાર વ્રતમુત્તમમ્ ।
કાર્તિકે શુક્લપક્ષસ્ય ચતુર્થ્યાં ગણપં સ્મરન્ ॥ ૬૦॥

પઞ્ચમ્યાં પારણં ચક્રે રાજાઽસૌ જનસંયુતઃ ।
બ્રાહ્મણેભ્યો દદૌ દાનં સર્વાન્ અન્નૈસ્ત્વતોષયત્ ॥ ૬૧॥

તતઃ કુષ્ઠવિહીનશ્ચ બભૂવ સ જનાધિપઃ ।
સુરૂપઃ કામદેવેન સમઃ શોભાધરો બભૌ ॥ ૬૨॥

લોકા વન્ધ્યત્વદોષેણ રોગાદિભિઃ પ્રપીડિતાઃ ।
તે સર્વે દુઃખહીનાશ્ચ બભૂવુર્વ્રતસેવનાત્ ॥ ૬૩॥

તતસ્તેન નૃપેણાઽથ સર્વત્ર ભૂમિમણ્ડલે ।
પ્રકાશિતં પ્રયત્નેન વ્રતં ગાણેશ્વરં નૃપ ॥ ૬૪॥

તતઃ શુક્લાં તથા કૃષ્ણાં ચતુર્થીં ચક્રિરે જનાઃ ।
તેનાઽઽનન્દસમાયુક્તા બુભુજુર્વિવિધં સુખમ્ ॥ ૬૫॥

તતઃ સુધન્વા સ્થાપ્ય સ્વં પુત્રં રાજ્યે મહામતિઃ ।
એકાન્તે સંસ્થિતો ભૂત્વાઽભજત્તં ગણપં સદા ॥ ૬૬॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ।
તથા જનાશ્ચ સર્વે તે સ્વાનન્દસ્થા બભૂવિરે ॥ ૬૭॥

એવં તે કથિતં રાજન્નથો શૃણુ મહામતે ।
મહિમાનં વ્રતસ્યૈવ સર્વસિદ્ધિકરસ્ય હ ॥ ૬૮॥

માહિષ્મત્યાં ચ ચાણ્ડાલો વસન્ કઃ પાપકારકઃ ।
પ્રાપ્ય કાર્તિકગાં શુક્લાં ચતુર્થીં સ વને ગતઃ ॥ ૬૯॥

તત્ર વ્યાઘ્રેણ સન્દૃષ્ટઃ પલાયન્ વૃક્ષમારુહત્ ।
વ્યાઘ્રો વૃક્ષતલે તત્ર સંસ્થિતસ્તં પ્રતીક્ષયન્ ॥ ૭૦॥

તત્ર રાત્રિર્ગતા તસ્ય ચાણ્ડાલસ્ય પ્રજાગરઃ ।
સમ્પૂર્ણશ્ચાભવદ્ભૂપ પુનશ્ચિત્રં બભૂવ હ ॥ ૭૧॥

સમાગતો મહાસર્પો વનસ્થો વૃક્ષમારુહત્ ।
પપાત ભયભીતઃ સ તં દૃષ્ટ્વા કમ્પવેગતઃ ॥ ૭૨॥

વ્યાઘ્રેણ સઙ્ગૃહીતઃ સ પઞ્ચમ્યાં ભક્ષિતોઽભવત્ ।
સ વિમાનં સમારુહ્ય યયૌ સ્વાનન્દકં પુરમ્ ॥ ૭૩॥

અજ્ઞાતવ્રતજેનૈવ પુણ્યેન ગણપં ગતઃ ।

દૃષ્ટ્વા યોગપરો ભૂત્વા બ્રહ્મભૂતો બભૂવ સઃ ॥ ૭૪॥

એવં નૃપ અપારા વૈ ચતુર્વર્ગફલૈર્યુતાઃ ।
બ્રહ્મભૂતાશ્ચ સઞ્જાતાશ્ચતુર્થીવ્રતકારકાઃ ॥ ૭૫॥

કાર્તિકે શુક્લપક્ષસ્ય ચતુર્થ્યા મહિમા મયા ।
કથિતો લેશતો ભૂપ શ્રોતુમિચ્છસિ કિં પુનઃ ॥ ૭૬॥

શ઼ૃણુયાદ્યઃ પઠેદ્વાઽપિ સ વૈ સર્વાર્થસિદ્ધિભાક્ ।
પુત્રપૌત્રાદિસંયુક્તઃ પ્રભવેદ્ગણપપ્રિયઃ ॥ ૭૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે કાર્તિકશુક્લચતુર્થીવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૪.૯
(Page ખં. ૪ અ. ૧૦ પાન ૩૧)

## ૪.૧૦ માર્ગશીર્ષશુક્લચતુર્થીવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
ગણેશસ્ય કથાં શ્રુત્વા હર્ષશ્ચેતસિ જાયતે ।
માર્ગશીર્ષે ચ યા શુક્લા તાં મે વદ મુને યતઃ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે વર્ણયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
માર્ગશીર્ષે ચતુર્થ્યાં યઃ શુક્લાયામભવન્નૃપ ॥ ૨॥

કાશીપતિઃ પુરા રાજા પુણ્યકીર્તિર્બભૂવ હ ।
અજાતશત્રુકો નામ સર્વશાસ્ત્રવિશારદઃ ॥ ૩॥

દેવદ્વિજાતિથિપ્રેપ્સુર્નાનાધર્મપરાયણઃ ।
પ્રજાનાં પાલને સક્તો યથાશાસ્ત્રેણ માનદઃ ॥ ૪॥

તત્રૈવ નારદોઽકસ્માન્નૃપં દ્રષ્ટું સમાગતઃ ।
તં પ્રણમ્ય મહાત્માનં પૂજયામાસ ભક્તિતઃ ॥ ૫॥

સ્વયં પાદસ્ય સંવાહં ચકાર નૃપસત્તમઃ ।
ઉવાચ તં પ્રહર્ષેણ નારદં સર્વગં પરમ્ ॥ ૬॥

અજાતશત્રુરુવાચ ।

ધન્યં મે જન્મ પુત્રાદિ રાજ્યં નિહતકણ્ટકમ્ ।
ધન્યૌ ચ જનકૌ જ્ઞાનં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૭॥

સર્વસારં વદસ્વ ત્વં યોગશાન્તિપ્રદાયકમ્ ।
યેન સંસારદુઃખેભ્યો મુચ્યતે માનવઃ ક્ષણાત્ ॥ ૮॥

તતસ્તં નારદો યોગી ગાણપત્યાગ્રણીર્નૃપ ।
જગાદ હર્ષસંયુક્તો વાક્યં સારમયં હસન્ ॥ ૯॥

નારદ ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા રાજન્ સર્વેભ્યો બ્રહ્મદં પરમ્ ।
શ ृણુ તે કથયિષ્યામિ યોગં શાન્તિપ્રદાયકમ્ ॥ ૧૦॥

બ્રહ્મ નાનાવિધં વેદે વર્ણિતં પાત્રભેદતઃ ।
ન મુખ્યં બ્રહ્મભૂતત્વં તદેવ ભવતિ પ્રભો ॥ ૧૧॥

બ્રહ્મણસ્પતિનામાનં ગણેશં ભજ ભાવતઃ ।
ચિત્તવૃત્તિનિરોધેન ચિન્તામણિર્ભવિષ્યસિ ॥ ૧૨॥

ગણેશોઽહં ન સન્દેહો મમ તત્ર કથં ભવેત્ ।
સંયોગાયોગકં રાજન્ તેન શાન્તિમવાપ્સ્યસિ ॥ ૧૩॥

તસ્ય વ્રતં મહાભાગ ચતુર્થીસંજ્ઞકં મહત્ ।
રાજ્યે નષ્ટે ચ તેન ત્વં નારકી પ્રભવિષ્યસિ ॥ ૧૪॥

ધર્માર્થકામમોક્ષાણાં પ્રદં પૂર્ણં પ્રકીર્તિતમ્ ।
ચતુર્થીસંજ્ઞકં રાજન્ વરદં સઙ્કટં મતમ્ ॥ ૧૫॥

નાનાકર્માણિ કુર્વન્તિ નરાઃ સર્વાર્થસિદ્ધયે ।
ચતુર્થીવ્રતહીનાશ્ચેન્નિષ્ફલાઃ પ્રભવન્તિ તે ॥ ૧૬॥

ઇત્યુક્ત્વા તં મહાયોગી નારદઃ કરુણાયુતઃ ।
માહાત્મ્યં કથયામાસ ચતુર્થીસમ્ભવં નૃપ ॥ ૧૭॥

તતસ્તં નૃપવર્યઃ સ પ્રણમ્ય ભાવસંયુતઃ ।
પપ્રચ્છ સર્વમાર્ગજ્ઞં ગણેશોપાસનં પુનઃ ॥ ૧૮॥

અજાતશત્રુરુવાચ ।
બ્રહ્મણસ્પતિમાહાત્મ્યં શ્રુતં મયા મહામતે ।
તસ્યોપાસનમાર્ગં મે વદ સર્વજ્ઞ તે નમઃ ॥ ૧૯॥

નારદ ઉવાચ ।
એકાક્ષરવિધાનેન ભજ ઢુણ્ઢિં વિનાયકમ્ ।
તેન સાધ્યો ગણેશસ્તે પ્રત્યક્ષશ્ચ ભવિષ્યતિ ॥ ૨૦॥

તસ્મૈ સ વિધિના સર્વં ગણેશોપાસનં દદૌ ।
મન્ત્રમેકાક્ષરં સાઙ્ગં તતશ્ચાન્તર્હિતોઽભવત્ ॥ ૨૧॥

તત્રાઽઽદૌ માર્ગશીર્ષસ્થા સમ્પ્રાપ્તા શુક્લગા નૃપ ।
ચતુર્થી સા કૃતા તેનોપોષણેન યથાવિધિ ॥ ૨૨॥

જનૈઃ સર્વૈસ્તથા રાજન્ કૃતા સર્વપ્રદાયિની ।
તતસ્તેન ચ સર્વત્ર પ્રશસ્તા સુકૃતાઽભવત્ ॥ ૨૩॥

શુક્લાં કૃષ્ણાં ચતુર્થીં યે ન કુર્વન્તિ નરાધમાઃ ।
સ્ત્રિયશ્ચેત્તાઽનીયાસ્તે મહાપાપિન એવ ચ ॥ ૨૪॥

ઢુણ્ઢિરાજં નૃપાધ્યક્ષો નિત્યં સમ્પૂજ્ય યત્નતઃ ।
ભક્ત્યાઽભજત્ સમ્બભૂવ યોગીન્દ્રો યોગિસમ્મતઃ ॥ ૨૫॥

(Page ખં. ૪ અ. ૧૦ પાન ૩૨)
તતો બહુગતે કાલે પ્રત્યક્ષઃ સ ગજાનનઃ ।
બભૂવ તસ્ય ભૂપસ્ય વરં બ્રૂહિ તમબ્રવીત્ ॥ ૨૬॥

સ્તુતઃ સમ્પૂજિતસ્તેન ઢુણ્ઢિરાજસ્તુતોષ હ ।
ગાણપત્યં ચકારાઽસૌ નૃપં ચાજાતશત્રુકમ્ ॥ ૨૭॥

ઈપ્સિતં તં વરં દત્ત્વા તત્રૈવાન્તરધીયત ।
ઢુણ્ઢિરાજં તમભજત્ રાજેન્દ્રોઽનન્યચેતસા ॥ ૨૮॥

અન્તે નાગરસંયુક્તો જગામ ગણપં નૃપઃ ।
સર્વૈર્બભૂવ ચ બ્રહ્મભૂતો વૈ યોગિસમ્મતઃ ॥ ૨૯॥

એવં શુક્લચતુર્થ્યાં તે માર્ગશીર્ષેઽભવન્ મહત્ ।
માહાત્મ્યં કથિતં રાજન્ સઙ્ક્ષેપેણ ન સંશયઃ ॥ ૩૦॥

અન્યત્ કથાન્તરં ભૂપ શ◌ૃણુ સર્વભયાપહમ્ ।
વેશ્યાયા વ્રતસંયોગાદ્બ્રહ્મભૂયકરં મહત્ ॥ ૩૧॥

મિથિલાયાં કદાચિત્ કા વેશ્યા નરવિમોહિની ।
આગતા તાં નિરીક્ષ્યૈવ મોહિતાઃ સકલા નરાઃ ॥ ૩૨॥

રાજ્ઞા સમ્માનિતાઽત્યન્તં તત્ર વાસમરોચયત્ ।
કદાચિત્તીર્થગા સા વૈ સન્દૃષ્ટા રક્ષસા પુરઃ ॥ ૩૩॥

તાં સઙ્ગૃહ્ય યયૌ રક્ષઃ સ્વવાસં હર્ષસંયુતઃ ।
સા તં દૃષ્ટ્વા ભયોદ્વિગ્ના વિલલાપ ભૃશાતુરા ॥ ૩૪॥

રક્ષસા સાન્ત્વિતા તત્ર ન શોકં સાઽત્યજત્ કદા ।
તસ્મિન્ કાલે ચતુર્થી વૈ શુક્લા માર્ગે સમાગતા ॥ ૩૫॥

અતિશોકતયા રાજન્ન બભક્ષ જલાદિકમ્ ।
પઞ્ચમ્યાં સા મૃતા તત્ર ભયયુક્તેન ચેતસા ॥ ૩૬॥

તતો ગણેશદૂતેન નીતા સ્વાનન્દકે પુરે ।
બ્રહ્મભૂતા ચ સા જાતા વ્રતપુણ્યપ્રભાવતઃ ॥ ૩૭॥

અજ્ઞાનેન કૃતં ચૈતત્ વરદાખ્યં વ્રતં મહત્ ।
બ્રહ્મસાયુજ્યદં પ્રોક્તં કિં પુનર્જ્ઞાનભાવતઃ ॥ ૩૮॥

માર્ગશીર્ષગતાયાશ્ચ શુક્લાયાઃ કુરુતે નરઃ ।
ચતુર્થ્યાં લભતે સોઽપિ સર્વાર્થં સંશ‍ૃણોતિ યઃ ॥ ૩૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે માર્ગશીર્ષશુક્લચતુર્થીવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૪.૧૦

## ૪.૧૧ પૌષશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રુતં યન્ માર્ગશુક્લસ્થચતુર્થી સંજ્ઞિતં મયા ।
વ્રતં તેન મહાભાગ સન્તૃપ્તો ગુરુસત્તમ ॥ ૧॥

અધુના પૌષમાસે યા ચતુર્થી વરદાયિની ।
તસ્યા માહાત્મ્યમેવં મે બ્રૂહિ ત્વં મુનિસત્તમ ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
શ‍ૃણુ રાજંશ્ચ માહાત્મ્યં સઙ્ક્ષેપેણ વદામ્યહમ્ ।
વિસ્તરેણ તુ કો વક્તું સમર્થઃ પ્રભવેદ્ભુવિ ॥ ૩॥

અવન્તીનગરીમધ્યેઽવસત્તુ બ્રાહ્મણોત્તમઃ ।

સુદન્ત ઇતિ વિખ્યાતઃ સર્વશાસ્ત્રવિશારદઃ ॥ ૪॥

રાજ્ઞઃ પુરોહિતઃ શ્રેષ્ઠઃ સદા નીતિપરાયણઃ ।
ધર્મશાસ્ત્રાનુસારેણ રાજાનમપ્યબોધયત્ ॥ ૫॥

રાજા બૃહદ્રથો નામ તદાજ્ઞાવશગોઽભવત્ ।
પાલયામાસ ભૂમિં સ નાનાધર્મકરઃ પરઃ ॥ ૬॥

(Page ખં. ૪ અ. ૧૧ પાન ૩૩)
સુદન્તસ્યાઽભવદ્ભાર્યા નામ્ના ખ્યાતા વિલાસિની ।
બભૂવ કર્મદોષેણ વન્ધ્યા સા વૈ પતિવ્રતા ॥ ૭॥

અપત્યં સુષુવે સા યજ્જાતમાત્રં મૃતં ભવેત્ ।
તદર્થં વ્રતદાનાદિધર્મં ચક્રે ચ સ દ્વિજઃ ॥ ૮॥

નાઽભવત્તસ્ય તદપિ પુત્રઃ પરમસૌખ્યદઃ ।
વિપ્રોઽતિદુઃખિતઃ સસ્ત્રીકો જગામ વનં તતઃ ॥ ૯॥

બભ્રામ ભ્રાન્તચિત્તોઽસૌ યત્ર તત્ર મહામતિઃ ।
મરણે નિશ્ચયં કૃત્વા તપોયુક્તો બભૂવ હ ॥ ૧૦॥

તત્રાઽઽજગામ યોગીન્દ્રો વામદેવઃ પ્રતાપવાન્ ।
યદૃચ્છાવિચરંસ્તેન દૃષ્ટઃ સન્નમિતોઽભવત્ ॥ ૧૧॥

પૂજયિત્વા મહાત્માનં વામદેવં કૃતાઞ્જલિઃ ।
જગાદ ખેદસંયુક્તઃ સુદન્તો યોગિસત્તમમ્ ॥ ૧૨॥

સુદન્ત ઉવાચ ।
વામદેવ ચ મે ધન્યં દુઃખિતસ્ય તપો વયઃ ।
જ્ઞાનાદિકં વિશેષેણ ત્વત્પાદપદ્મદર્શનાત્ ॥ ૧૩॥

વન્ધ્યોઽહં મુનિશાર્દૂલ કા ગતિર્મે ભવિષ્યતિ ।
મૃતસ્ય સ્વર્ગહીનસ્ય વદ યોગીન્દ્રસત્તમ ॥ ૧૪॥

વામદેવ ઉવાચ ।
શુણુ દ્વિજ મહાભાગ ત્વં સદા ધર્મસંયુતઃ ।
તથાપિ પાપચારી ત્વં યેન જાતઃ શ‍ૃણુષ્વ તત્ ॥ ૧૫॥

અવન્તીપુરપાલસ્ય આદરાત્ત્વં પુરોહિતઃ ।
રાજ્ઞા કૃતં મહત્પાપં યત્તદેવ ત્વયા કૃતમ્ ॥ ૧૬॥

ચતુર્થીવ્રતલોપશ્ચ બભૂવે ભૂમિમણ્ડલે ।
ચતુર્વર્ગફલૈર્હીના જાતા ભૂવાસિનો જનાઃ ॥ ૧૭॥

ધર્મસ્યાઽઽચરણં પૂર્ણં કૃતં રાજ્ઞા તથા ત્વયા ।
નિષ્ફલં વ્રતલોપેન તેન ત્વં દુઃખિતોઽધુના ॥ ૧૮॥

એવં શ્રુત્વા વચો રમ્યં વામદેવસ્ય ધીમતઃ ।
વિસ્મિતસ્તં સુદન્તોઽસૌ જગાદ વિનયાન્વિતઃ ॥ ૧૯॥

સુદન્ત ઉવાચ ।
કીદૃશં તદ્વ્રતં તાત વદ મે હિતકારકમ્ ।
ચતુર્ણાં પુરુષાર્થાનાં સાધકં કથમાભવત્ ॥ ૨૦॥

તેન હીનો નરો યસ્તુ સ કથં ફલહીનકઃ ।
કર્મણસ્તત્ સમાચક્ષ્વ દયાસાગર માનદ ॥ ૨૧॥

વસિષ્ઠ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી તજ્જગાદ સવિસ્તરમ્ ।
માહાત્મ્યં સકલં તસ્મૈ સ શ્રુત્વા વિસ્મિતોઽભવત્ ॥ ૨૨॥

પુનઃ પપ્રચ્છ તં વિપ્રો હર્ષયુક્તેન ચેતસા ।
ગણેશજ્ઞાનબોધાર્થં ગાણપત્યં મહામુનિમ્ ॥ ૨૩॥

સુદન્ત ઉવાચ ।
કીદૃશોઽયં ગણાધીશો વદ તસ્ય સ્વરૂપકમ્ ।
જ્ઞાત્વા તં પ્રભજિષ્યામિ નિત્યં ભક્તિસમન્વિતઃ ॥ ૨૪॥

એવં પૃષ્ટો મહાયોગી વામદેવસ્તમબ્રવીત્ ।
ગણેશબોધદાને સ કુશલઃ સર્વપારગઃ ॥ ૨૫॥

વામદેવ ઉવાચ ।
સુદન્ત શ‍ૃણુ વિપ્રર્ષે ગાણેશં જ્ઞાનમુત્તમમ્ ।
ગાણપત્યો યેન ભક્તિભાવિતો ભવિતાઽસિ ભોઃ ॥ ૨૬॥

અહં પુરા તપોનિષ્ઠસ્ત્વભવં યત્નસંયુતઃ ।
તપસા મે મહાભાગ વ્યાપ્તં સર્વં ચરાચરમ્ ॥ ૨૭॥

તતો મયા તપસ્ત્યક્તં યોગાર્થં બ્રાહ્મણોત્તમ ।
શમે દમે પરેણાન્તર્નિષ્ઠેન મનસો જયાત્ ॥ ૨૮॥

યોગભૂમિક્રમેણાઽહં કાલેન મહતા દ્વિજ ।
સહજે સંસ્થિતો ભૂત્વા યત્ર તત્રાઽચરં તુ ચ ॥ ૨૯॥

સહજં મોહહીનં યત્ સ્વાધીનત્વસમાયુતમ્ ।
દૃષ્ટ્વા શાન્ત્યર્થમત્યન્તં તત્ ત્યક્તં ચ મયા તતઃ ॥ ૩૦॥

સન્ધૃતં મનસિ બ્રહ્મ મનોવાણીવિવર્જિતમ્ ।
કથં સ્વાધીનતા તત્ર નિર્મોહશ્ચ પ્રવર્તતે ॥ ૩૧॥

(Page ખં. ૪ અ. ૧૧ પાન ૩૪)
અધુના કિં મયા કાર્યં વિચાર્ય શરણં ગતઃ ।
શઙ્કરં યોગિવન્દ્યં તં શૈવોઽહં પ્રણતોઽભવમ્ ॥ ૩૨॥

શૈવમાર્ગે રતં નિત્યં દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
શમ્ભુઃ પ્રોવાચ માં વિપ્ર સ્થીયતાં મુનિસત્તમ ॥ ૩૩॥

કિમર્થમાગતસ્તાત વામદેવ મહામતે ।
વદ મે સકલં વૃત્તં કરિષ્યામિ પ્રિયં ચ તે ॥ ૩૪॥

શિવસ્ય વચનં શ્રુત્વા સંસ્થિતોઽહં કૃતાઞ્જલિઃ ।
અવદં તં મહાદેવં ભક્તવાઞ્છાસુરદ્રુમમ્ ॥ ૩૫॥

સહજં યત્પરં બ્રહ્મ શૈવં સ્વેચ્છામયં પ્રભો ।
તસ્માત્ પરં ન વિદ્યેત તથાપિ નુદ સંશયમ્ ॥ ૩૬॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ય સ્વેચ્છા તત્ર કુતો ભવેત્ ।
સ્વાધીનતા દોષયુક્તં સહજં ન પરં મતમ્ ॥ ૩૭॥

અતઃ શાન્ત્યર્થમેવ ત્વામહં પ્રષ્ટું સમાગતઃ ।
યોગશાન્તિપ્રદં પૂર્ણં વદ માં કરુણાનિધે ॥ ૩૮॥

વસિષ્ઠ ઉવાચ ।
વામદેવવચઃ શ્રુત્વા હર્ષિતઃ શઙ્કરોઽબ્રવીત્ ।
તં પુનઃ સર્વયોગજ્ઞો ગાણપત્યસ્વભાવવાન્ ॥ ૩૯॥

શ્રીશિવ ઉવાચ ।
યોગશાન્તિપ્રદં પૂર્ણં ગણેશં વિદ્ધિ ભો મુને ।
જાનીહિ ન પરં બ્રહ્મ સહજં યોગસેવયા ॥ ૪૦॥

સ્વાનન્દાદ્યત્ સમુત્પન્નમસત્યં સત્યરૂપકમ્ ।

સમં ચ સહજં વિદ્ધિ ચતુર્ધાઽસૌ વિભજ્યતે ॥ ૪૧॥

ચતુર્ણામત્ર સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
અયોગે નૈવ સંયોગઃ કેષાઞ્ચિદ્બ્રહ્મણાં ભવેત્ ॥ ૪૨॥

ગકારાક્ષરગં જ્ઞાનં વિદ્ધિ તન્નિજબોધતઃ ।
ણકારાક્ષરગં જ્ઞાનં નિવૃત્યા લભ્યતે જનૈઃ ॥ ૪૩॥

તયોઃ સ્વામી ગણેશાનો યોગરૂપઃ પ્રકીર્તિતઃ ।
શાન્ત્યાઽસૌ લભ્યતે વિપ્ર શાન્તિભ્યઃ શાન્તિદાયકઃ ॥ ૪૪॥

ચિત્તં પઞ્ચવિધં વિદ્ધિ બુદ્ધિરૂપં ન સંશયઃ ।
ચિત્તે મોહાત્મિકા સિદ્ધિર્માયે તે પરિકીર્તિતે ॥ ૪૫॥

તયોર્બિંબં ગણેશશ્ચ બિમ્બિભાવં ત્યજ પ્રભો ।
અધુના ગણનાથસ્ત્વં ભવિષ્યસિ ન સંશયઃ ॥ ૪૬॥

એવમુક્ત્વા મહાદેવસ્તસ્મૈ મન્ત્રં દદૌ પુનઃ ।
એકાક્ષરં ગણેશસ્ય સવિધિં કરુણાયુતઃ ॥ ૪૭॥

તં પ્રણમ્ય મહેશાનં વને યાતોઽહમાદરાત્ ।
તત્રૈવ ગણનાથં તમભજં ભક્તિસંયુતઃ ॥ ૪૮॥

એકાક્ષરવિધાનેન સન્તુષ્ટો ગણનાયકઃ ।
યોગશાન્તિં દદૌ પૂર્ણાં ભક્તવાત્સલ્યકારણાત્ ॥ ૪૯॥

તતોઽહં યોગિવન્દ્યશ્ચ જાતઃ સર્વત્ર સમ્મતઃ ।
તથાપિ વિઘ્નદહનમભજં નિત્યમાદરાત્ ॥ ૫૦॥

ગતેષુ દશવર્ષેષુ ગણાધીશઃ સમાયયૌ ।
મમાશ્રમં વરં દાતુમુવાચ ઘનનિઃસ્વનઃ ॥ ૫૧॥

ગણેશ ઉવાચ ।
વામદેવ મહાભાગ વરં વૃણુ હૃદીપ્સિતમ્ ।
તવ દાસ્યામિ ભક્ત્યાઽહં સન્તુષ્ટો યોગિસત્તમ ॥ ૫૨॥

ગણેશસ્ય વચઃ શ્રુત્વા ત્યક્ત્વા ધ્યાનં સમુત્થિતઃ ।
પ્રણમ્ય તં ગણેશં સમ્પૂજ્ય સ્તોતું પ્રચક્રમે ॥ ૫૩॥

વામદેવ ઉવાચ ।
ગણેશાય નમસ્તુભ્યં સદા સ્વાનન્દવાસિને ।

સિદ્ધિબુદ્ધિપતે તુભ્યં વિઘ્નેશાય નમો નમઃ ॥ ૫૪॥

મૂષકારૂઢ હેરમ્બ ભક્તવાઞ્છાપ્રપૂરક ।
ઢુણ્ઢિરાજાય તે દેવ રક્ષ માં તે નમો નમઃ ॥ ૫૫॥

આદિમધ્યાન્તહીનાય લમ્બોદર નમોઽસ્તુ તે ।
આદિમધ્યાન્તરૂપાય શઙ્કરપ્રિયસૂનવે ॥ ૫૬॥

નાનામાયાધરાયૈવ માયિભ્યો મોહદાયિને ।
(Page ખં. ૪ અ. ૧૧ પાન ૩૫)
માયામાયિકભેદૈસ્ત્વં ક્રીડસે તે નમો નમઃ ॥ ૫૭॥

વિષ્ણુપુત્રાય શેષસ્ય પુત્રાય બ્રાહ્મણાય તે ।
બ્રહ્મપુત્રાય સર્વેશ સર્વપુત્રાય તે નમઃ ॥ ૫૮॥

સર્વેષાં ચૈવ પિત્રે તે માત્રે સર્વાત્મકાય તે ।
મહોદરાય દેવેન્દ્રપાય જ્યેષ્ઠાય વૈ નમઃ ॥ ૫૯॥

મહોગ્રાય મહેશાય વિષ્ણવે પ્રભવિષ્ણવે ।
અમૃતાય તુ સૂર્યાય નાનાશક્તિસ્વરૂપિણે ॥ ૬૦॥

પુરુષાય પ્રકૃતયે ગુણેશાય ગુણાત્મને ।
એકાનેકાત્મકાયૈવ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૬૧॥

ભક્તેભ્યઃ સર્વદાત્રે તે બ્રહ્મણાં પતયે નમઃ ।
યોગાય યોગનાથાય યોગિનાં પતયે નમઃ ॥ ૬૨॥

સ્તૌમિ કિં ત્વાં ગણેશાન મનોવાણીવિહીનકમ્ ।
મનોવાણીમયં નૈવાતસ્તે દેવ નમોઽસ્તુ તે ॥ ૬૩॥

સહસૈવં સંસ્તુવતસ્તસ્ય ભક્તિરસેન ચ ।
રોમોદ્ગમઃ પ્રાદુરાસીત્ કણ્ઠરોધો બભૂવ હ ॥ ૬૪॥

ઉવાચ વામદેવં સ નૃત્યન્તં વિઘ્નનાયકઃ ।
વરં વૃણુ મહાભાગ યત્તે ચિત્તે સ્થિતં પરમ્ ॥ ૬૫॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં પરમ્ ।
શ ૃણોતિ યઃ પઠતિ ચેત્તસ્મૈ યોગપ્રદં તથા ॥ ૬૬॥

ભક્તિદં ભક્તિયુક્તેભ્યઃ પુત્રપૌત્રાદિકપ્રદમ્ ।
ધનધાન્યપ્રદં પ્રોક્તં મયિ પ્રીતિવિવર્ધનમ્ ॥ ૬૭॥

ગણેશવચનં શ્રુત્વા તં જગાદ મહામુનિઃ ।
વામદેવઃ પ્રસન્નાત્મા બ્રહ્મેશં બ્રહ્મભાવિતઃ ॥ ૬૮॥

ભક્તિં દેહિ ગણાધીશ ગાણપત્યાં વિશેષતઃ ।
નાન્યં યાચે વરં દેવ યદિ તુષ્ટોઽસિ વિઘ્નપ ॥ ૬૯॥

તથેતિ તમુવાચૈવ ગણેશોઽતર્દધે સ્વયમ્ ।
વામદેવઃ પ્રસન્નાત્મા ગાણપત્યો બભૂવ હ ॥ ૭૦॥

તદાદિ શાન્તિમાપન્નસ્ત્વહં વિપ્ર મહામતે ।
અતસ્ત્વં ગણરાજં તં ભજ શાન્તિમવાપ્સ્યસિ ॥ ૭૧॥

એકાક્ષરં મહામન્ત્રં સુદન્તાય દદૌ તતઃ ।
સવિધિં વામદેવઃ સોઽતર્ધાનમકરોન્ મુનિઃ ॥ ૭૨॥

સુદન્તો વિસ્મિતો ભૂત્વા યયૌ સ્વસ્થાનમુત્તમમ્ ।
રાજ્ઞા સમ્માનિતઃ સોપ્યભજત્તં ગણનાયકમ્ ॥ ૭૩॥

બૃહદ્રથાય વૃત્તાન્તં કથયામાસ ભો નૃપ ।
તદાજ્ઞયા નૃપઃ સદ્યો ઘોષયામાસ તદ્વ્રતમ્ ॥ ૭૪॥

તત્રાદૌ પૌષમાસે યા ચતુર્થી શુક્લગાઽઽગતા ।
તાં ચકાર દ્વિજઃ સદ્યો જનૈ રાજ્ઞા પુરઃ સ્થિતૈઃ ॥ ૭૫॥

વ્રતાચરણમાત્રેણ ગર્ભયુક્તા બભૂવ હ ।
મુનિપત્ની સુતં લેભે જ્ઞાનયુક્તં ચિરાયુષમ્ ॥ ૭૬॥

તતો ભૂમિતલે સર્વે ચક્રુર્વ્રતમનુત્તમમ્ ।
શૌક્લં કાર્ષ્ણં વિશેષેણ ચતુર્થીસંજ્ઞિતં નૃપ ॥ ૭૭॥

સર્વે રોગાદિભિર્હીના જાતાઃ પુત્રાદિસંયુતાઃ ।
ધનધાન્યાદિભિર્યુક્તા અન્તે સ્વાનન્દગા બભુઃ ॥ ૭૮॥

સુદન્તો યોગિવન્દ્યશ્ચ બભૂવે યોગસેવયા ।
રાજાઽપિ જ્ઞાનસંયુક્તો ગાણપત્યો બભૂવ હ ॥ ૭૯॥

પૌષશુક્લચતુર્થીજમેતત્તે કથિતં વ્રતમ્ ।
રાજન્ સર્વાર્થદં પૂર્ણં પુનસ્ત્વં શ઼ૃણુ માનદ ॥ ૮૦॥

વૈશ્યો માર્ગે સ્થિતઃ સોઽપિ શ્રમયુક્તો ધનપ્રિયઃ ।

તત્ર ચોરૈઃ સમાયાતૈર્લુણ્ઠિતં તૈર્ધનં મહત્ ॥ ૮૧॥

તેષાં શસ્ત્રાભિઘાતેન પપાત ધરણીતલે ।
વૈશ્યો વને દુઃખિતશ્ચ વિલલાપ ભૃશાતુરઃ ॥ ૮૨॥

દૈવયોગેન સા દેવી ચતુર્થી શુક્લગા ગતા ।
(Page ખં. ૪ અ. ૧૨ પાન ૩૬)
પૌષી તસ્યાં જલાદ્યૈશ્ચ હીનસ્તત્ર બભૂવ સઃ ॥ ૮૩॥

રાત્રૌ જાગરણં તસ્ય સઞ્જાતં પીડયા તદા ।
પઞ્ચમ્યાં સ મૃતઃ પાપી ધનલુબ્ધો મહામતે ॥ ૮૪॥

અજ્ઞાતવ્રતજેનૈવ મહિમ્ના સોઽપિ ભૂપતે ।
સ્વાનન્દે ગણપં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૮૫॥

એવં જના વ્રતેનૈવ મુક્તાઃ સંસારસાગરાત્ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ વર્ણિતું તન્ન શક્યતે ॥ ૮૬॥

ઇદં પૌષચતુર્થ્યાસ્તુ માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠેદ્વૈ તસ્ય ભો રાજન્ સર્વદં પ્રભવિષ્યતિ ॥ ૮૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે પૌષશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૪.૧૧

## ૪.૧૨ માઘશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
ચતુર્થ્યા મહિમાનં ચ શ્રુત્વા હર્ષઃ પ્રવર્ધતે ।
ન તૃપ્યામિ મહાયોગિન્નમૃતાદધિકં મતમ્ ॥ ૧॥

માઘે શુક્લચતુર્થી યા તસ્યા માહાત્મ્યમુત્તમમ્ ।
વદ યેન જનાઃ સર્વે ભવન્તિ સુખભોગિનઃ ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
માઘી શુક્લા ચતુર્થી યા તસ્યાં જાતો વિનાયકઃ ।
કશ્યપસ્ય ગૃહે સાક્ષાદઙ્ગારકયુતા નૃપ ॥ ૩॥

મુદ્ગલ ઉવાચ ।

એવમુક્ત્વા વસિષ્ઠસ્તં વિનાયકચરિત્રકમ્ ।
કથયામાસ ભો દક્ષ દેવાન્તકવધાશ્રિતમ્ ॥ ૪॥

શ્રુત્વા સોઽપિ મુદા યુક્તો બભૂવાજસ્ય નન્દનઃ ।
પુનસ્તં પ્રેરયામાસ વ્રતાર્થં મુનિમાદરાત ॥ ૫॥

તસ્યાદરં સ વિજ્ઞાય વસિષ્ઠસ્તમુવાચ હ ।
હર્ષેણ મહતા યુક્તો ગાણપત્યેન્દ્રસત્તમઃ ॥ ૬॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે વર્ણયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
શ્રુતશ્ચેત્ સર્વદઃ પૂર્ણો ભવિષ્યતિ નરોત્તમ ॥ ૭॥

કર્ણાટે ભાનુપુર્યાં ચ રાજા પરમધાર્મિકઃ ।
દેવવિપ્રાતિથિપ્રેપ્સુર્નીત્યા રાજ્યં ચકાર સઃ ॥ ૮॥

શસ્ત્રાસ્ત્રજ્ઞો વિશેષેણ નામ્ના સોમશ્ચ વીર્યવાન્ ।
જિત્વા ભૂમણ્ડલં સર્વં ચક્રે સૌરાજ્યમુત્તમમ્ ॥ ૯॥

ભાર્યા યશોવતી તસ્ય નામ્ના પૂર્ણપતિવ્રતા ।
ધર્મશીલા રતા દાને બભૂવે રૂપશાલિની ॥ ૧૦॥

તસ્યાઽપિ દીર્ઘકાલેન કુર્વતો રાજ્યમુત્તમમ્ ।
અનાવૃષ્ટિભવં દુઃખં પ્રાપ્તં પરમદારુણમ્ ॥ ૧૧॥

સ તુ શૌનકનામાનં મુનિં સર્વાર્થકોવિદમ્ ।
યયૌ દુઃખનિવૃત્ત્યર્થં ગાણપત્યં વને પુરાત્ ॥ ૧૨॥

મહાવનં સમાસાદ્ય તં નનામ મહામુનિમ્ ।
સાષ્ટાઙ્ગં ચ પુરસ્તસ્ય કૃતાઞ્જલિપુટોઽભવત્ ॥ ૧૩॥

ઉવાચ તં મુનિશ્રેષ્ઠં સોમો વિનયસંયુતઃ ।
ધન્યં મે જન્મ કર્માદ્યં યેન દૃષ્ટો ભવાન્ મુને ॥ ૧૪॥

વદન્તમેવં રાજાનમુવાચ શૌનકો મુનિઃ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞો ન્યસ્તસ્વપરવિભ્રમઃ ॥ ૧૫॥

શૌનક ઉવાચ ।
પુરા રાજન્ મહાભાગ વદ માં સકલં તવ ।
ચેષ્ટિતં યદ્વને કસ્માદાગતો દુર્ગમે ચ મે ॥ ૧૬॥

એવં પૃષ્ટો મુનીન્દ્રેણ સોમસ્તં પ્રત્યુવાચ હ ।
હર્ષયુક્તેન ચિત્તેન મુનિં વેદજ્ઞમુત્તમમ્ ॥ ૧૭॥

સોમ ઉવાચ ।
કર્ણાટે ભાનુપુર્યાં મે વસતિર્ધર્મમિચ્છતઃ ।
(Page  ખં. ૪ અ. ૧૨ પાન ૩૭)
અનાવૃષ્ટિભવં દુઃખં પ્રાપ્તં તત્ર મહામુને ॥ ૧૮॥

ધર્મેણ નીતિયુક્તેન મયા રાજ્યં પ્રપાલિતમ્ ।
તથાપિ પાપયોગેન દુઃખં પ્રાપ્તં જનૈઃ સહ ॥ ૧૯॥

તત્રોપાયં વદસ્વ ત્વં સાક્ષાદ્યોગીશ્વરો ભવાન્ ।
રાજ્યં ત્યક્ત્વા વને તેઽદ્ય શરણં ચાગતો નૃપઃ ॥ ૨૦॥

શ્રુત્વા તસ્ય વચો રમ્યં તં જગાદ મહીપતિમ્ ।
શૌનકો મુનિશાર્દૂલો વિનયેન સમન્વિતમ્ ॥ ૨૧॥

શૌનક ઉવાચ ।
શૃણુ રાજન્ મહત્ પાપં તવ રાજ્યે બભૂવ હ ।
તેન રોગયુતા લોકા વન્ધ્યતાદોષસંયુતાઃ ॥ ૨૨॥

તત્રાપિ યન્ મહદ્ દુઃખમનાવૃષ્ટિસમુદ્ભવમ્ ।
સમ્પ્રાપ્તં કારણં તત્ર વદામિ ત્વાં નૃપાધમ ॥ ૨૩॥

ચતુર્થીસંજ્ઞકં રાજન્ વ્રતં નષ્ટં વિશેષતઃ ।
શૌક્લં કાર્ષ્ણં તદર્થં ત્વં યત્નયુક્તો ભવાધુના ॥ ૨૪॥

નો ચેદ્વર્ષસહસ્રૈસ્ત્વં સુખં ન લભસે કદા ।
અતઃ સર્વત્ર વિખ્યાતં તદ્વ્રતં કુરુ માનદ ॥ ૨૫॥

ઇત્યુક્ત્વા વ્રતમાહાત્મ્યં કથયામાસ વિસ્તરાત્ ।
નૃપાય સોઽપિ સંશ્રુત્ય વિસ્મિતો માનસેઽભવત્ ॥ ૨૬॥

પુનઃ પપ્રચ્છ ભાવેન શૌનકં મુનિસત્તમમ્ ।
વદ બ્રહ્મન્ ગણેશસ્ય સ્વરૂપં શાન્તિદં પરમ્ ॥ ૨૭॥

શૌનક ઉવાચ ।
પુરાઽહં તપસા યુક્તો નૃપાઽતિષ્ઠં સ્વાશ્રમે ।
અન્તર્નિષ્ઠસ્વભાવેન બ્રહ્મચિન્તનતત્પરઃ ॥ ૨૮॥

તતોઽકસ્માન્ મહાયોગી ભૃગુરસ્માકમેવ સઃ ।
બીજભૂતઃ સમાયાત આશ્રમેઽનુગ્રહાય મે ॥ ૨૯॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણતોઽહં મહામુનિમ્ ।
આસને સમુપાવેશ્યાઽપૂજયં ચ સ્વભક્તિતઃ ॥ ૩૦॥

કૃતાઞ્જલિપુટં નમ્રં પુરસ્તસ્ય મહાત્મનઃ ।
સંસ્થિતં માં તતો દૃષ્ટ્વા સુવિનીતમુવાચ સઃ ॥ ૩૧॥

ભૃગુરુવાચ ।
તાત કિં યોગનિષ્ઠસ્ત્વં શાન્તિં પ્રાપ્તો વદસ્વ મામ્ ।
કિમિચ્છસિ મહાભાગ વદ તેઽહં દદામિ તત્ ॥ ૩૨॥

અસ્મત્કુલે મહાભાગ ભવાન્ સાધુગુણાન્વિતઃ ।
તેનાઽહં તૃપ્તિમાયાતઃ પૂરયિષ્યામિ વાઞ્છિતમ્ ॥ ૩૩॥

એવં બ્રુવન્તમાદ્યં તં મુનિમાનમ્ય શૌનકઃ ।
જગાદ હર્ષસંયુક્તો ભૃગું યોગતપોનિધિમ્ ॥ ૩૪॥

શૌનક ઉવાચ ।
યોગશાન્તિપ્રદં પૂર્ણં બ્રૂહિ યોગં મહામુને ।
તેનાઽહં તૃપ્તિમત્યન્તં યાસ્યામિ ત્વદનુગ્રહાત્ ॥ ૩૫॥

ભૃગુરુવાચ ।
યોગશાન્તિમયં વિદ્ધિ ગણેશં બ્રહ્મનાયકમ્ ।
તં ભજસ્વ વિધાનેન તેન શાન્તો ભવિષ્યસિ ॥ ૩૬॥

ચિત્તં પઞ્ચવિધં તાત તત્ર ચિન્તામણિઃ સ્થિતઃ ।
તં જ્ઞાત્વા બ્રહ્મભૂતાશ્ચાઽભવન્ બ્રહ્માદયઃ સુત ॥ ૩૭॥

ચિત્તેન જ્ઞાયતે યદ્વૈ તત્ર મોહઃ પ્રવર્તતે ।
મોહં ચિત્તં પરિત્યજ્ય ભવ ચિન્તામણિઃ સ્વયમ્ ॥ ૩૮॥

મનોવાણીમયં ચિત્તં મનોવાણીવિવર્જિતમ્ ।
ચિત્તં જાનીહિ પુત્ર ત્વં તત્ત્યક્ત્વા ચ સુખી ભવ ॥ ૩૯॥

એવમુક્ત્વા ગણેશસ્ય ગણાનાં ત્વા મનું દદૌ ।
શૌનકાય મહાયોગી ભૃગુશ્ચાન્તર્હિતોઽભવત્ ॥ ૪૦॥

શૌનક ઉવાચ ।

ભૃગુણૈવમહં રાજન્ ઉપદિષ્ટોઽભજં પરમ્ ।
ગણેશં યોગભાવેન ચિત્તનિગ્રહણે રતઃ ॥ ૪૧॥

ક્રમેણ યોગિવન્દ્યોઽહં જાતસ્તસ્ય મહાત્મનઃ ।
કૃપયા ગણરાજસ્ય તથાપિ સ્મ ભજામિ તમ્ ॥ ૪૨॥

(Page ખં. ૪ અ. ૧૨ પાન ૩૮)
તતો મે વરદો જાતો ગણેશો ભક્તવત્સલઃ ।
ગાણપત્યં ચકારાઽસૌ તદહાત્ ગણપોઽભવમ્ ॥ ૪૩॥

એવમુક્ત્વા સ રાજેન્દ્રં ગણાનાં ત્વા મનું દદૌ ।
શૌનકો મુનિશાર્દૂલો વિધિયુક્તં વિધાનવિત્ ॥ ૪૪॥

શૌનકં પ્રણનામાઽઽજ્ઞાં ગૃહીત્વા રાજસત્તમઃ ।
આયયૌ સ્વગૃહે તત્ર પ્રધાનૈરભિનન્દિતઃ ॥ ૪૫॥

નાગરૈઃ સહ સોમશ્ચ માઘે શુક્લચતુર્થિકા ।
સમ્પ્રાપ્તા સાઽઽદિકાલે સ ચકાર વ્રતમુત્તમમ્ ॥ ૪૬॥

તતસ્તેન પ્રવિખ્યાતં કૃતં ભૂમિતલે નૃપ ।
શુક્લકૃષ્ણચતુર્થીજં વ્રતં ચક્રુર્જના ભુવિ ॥ ૪૭॥

વ્રતાચરણપુણ્યેન વૃષ્ટિસ્તત્ર બભૂવ ચ ।
સર્વે હર્ષયુતા લોકા ગણેશભજને રતાઃ ॥ ૪૮॥

ગણેશભજનં સોમશ્ચકાર પ્રેમસંયુતઃ ।
ગણેશપ્રીતયે તત્રાઽકરોદ્દેવાલયં તથા ॥ ૪૯॥

મહામૌલ્યં નૃપાધ્યક્ષઃ સ્થાપયામાસ વિઘ્નપમ્ ।
ગણેશં વરદાખ્યં સોઽપૂજયન્નિત્યમાદરાત્ ॥ ૫૦॥

પુત્રપૌત્રયુતો રાજા સ ચક્રે રાજ્યમુત્તમમ્ ।
લોકાઃ સર્વે સુખે મગ્ના રોગવન્ધ્યત્વવર્જિતાઃ ॥ ૫૧॥

સ્વધર્મનિરતા નિત્યમભજન્ ગણનાયકમ્ ।
ન ગણેશસમં કિઞ્ચિદ્ધારયામાસુરાદરાત્ ॥ ૫૨॥

સોમશ્ચાન્તે ગણેશાનં યયૌ લોકસમન્વિતઃ ।
સ્વાનન્દે તં પ્રણમ્યાઽસૌ બ્રહ્મભૂતો બભૂવ હ ॥ ૫૩॥

એતત્તે કથિતં ભૂપ તથાઽન્યચ્છૃણુ સુન્દરમ્ ।

ચરિત્રં વ્રતસમ્ભૂતં સર્વપાપપ્રણાશનમ્ ॥ ૫૪॥

કોઽપ્યન્ત્યજો વિદર્ભે વૈ કૌણ્ડિન્યે નગરેઽવસત્ ।
ભાનુનામા મહાપાપી દુષ્ટકર્મપરાયણઃ ॥ ૫૫॥

પરસ્ત્રીલમ્પટોઽત્યન્તં મદ્યદ્યૂતરતઃ સદા ।
માર્ગે જનાન્ જઘાનાઽસૌ દ્રવ્યલોભી વિશેષતઃ ॥ ૫૬॥

જીવં દૃષ્ટ્વા દુષ્ટકર્મા જઘાન સ ચ ભૂમિપ ।
કાર્યહીનતયા પાપી બ્રાહ્મણાનાં વધે રતઃ ॥ ૫૭॥

ઇત્યાદિદોષબાહુલ્યયુક્તઃ પરમદારુણઃ ।
કદાચિદ્દૈવયોગેન વને બભ્રામ સોઽન્ત્યજઃ ॥ ૫૮॥

તસ્મિન્ દિને સમાયાતા માઘી શૌક્લી ચતુર્થિકા ।
તત્રાન્નજલહીનોઽયં પર્વતાન્તરગોઽભવત્ ॥ ૫૯॥

ન પ્રાપ્તવાન્ વને કિઞ્ચિદ્ દુષ્ટસ્તેન સુદુઃખિતઃ ।
ક્ષુધાર્તસ્તૃષ્ણયા યુક્તસ્તત્રૈવ નિશિ સંસ્થિતઃ ॥ ૬૦॥

પ્રભાતે વિમલે સદ્યઃ સમુત્થાય ગૃહાગતઃ ।
તૃષિતઃ સ જલં તત્ર પપાવત્યન્તમાદરાત્ ॥ ૬૧॥

તતોઽકસ્માત્ સુદુઃખેન વમિત્વા તજ્જલં નૃપ ।
મમાર તં ગૃહીત્વા તે ગાણેશા ગણપં યયુઃ ॥ ૬૨॥

ગણેશદર્શનેનૈવ નિષ્પાપો જ્ઞાનસંયુતઃ ।
સાયુજ્યં ગણનાથસ્ય લેભે વૈ તત્પ્રભાવતઃ ॥ ૬૩॥

અજ્ઞાનવ્રતજેનૈવ પુણ્યેનાન્ત્યજજાતિજઃ ।
બ્રહ્મભૂતો મહાપાપી બભૂવે સૂર્યવંશજ ॥ ૬૪॥

એતાદૃશી મહાપુણ્યા ચતુર્થી શુક્લગા મતા ।
માઘી તસ્યાશ્ચ માહાત્મ્યં કથિતું ન ક્ષમો ભવેત્ ॥ ૬૫॥

એવં નાના જના ભૂપ બ્રહ્મભૂતા બભૂવિરે ।
કથિતું ન પ્રશક્યં યચ્ચરિત્રં તત્સમુદ્ભવમ્ ॥ ૬૬॥

માઘે શુક્લચતુર્થ્યાં યો મહિમાનં શ‍ૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય ભો રાજન્ સિદ્ધિદં સુભવિષ્યતિ ॥ ૬૭॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે માઘશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૪.૧૨
(Page  ખં. ૪ અ. ૧૩ પાન ૩૯)

## ૪.૧૩ ફાલ્ગુનશુક્લચતુર્થીચરિત્રવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
અધુના બ્રૂહિ મે વિપ્ર માહાત્મ્યં ફાલ્ગુનોદ્ભવમ્ ।
પુણ્યં શુક્લચતુર્થીજં ન તૃપ્યામિ કથામૃતાત્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ફાલ્ગુને શુક્લપક્ષે યા ચતુર્થી વરદા ભવેત્ ।
તસ્યા માહાત્મ્યમાદ્યં તે સઙ્ક્ષેપેણ બ્રવીમ્યહમ્ ॥ ૨॥

માલવે નગરં ખ્યાતં સર્વશોભાસમન્વિતમ્ ।
ભારકં સર્વધર્મજ્ઞૈર્લૌકૈસ્તત્ સઙ્કુલં બભૌ ॥ ૩॥

તત્ર હેમાઙ્ગદો રાજા ચકાર રાજ્યમુત્તમમ્ ।
જિત્વા ભૂમણ્ડલં સર્વં શસ્ત્રાસ્ત્રજ્ઞો વિચક્ષણઃ ॥ ૪॥

પ્રધાનૈ રાજભિઃ સર્વૈર્માન્યોઽભૂત્ સર્વસમ્મતઃ ।
પુત્રૈસ્તેજોયુતૈર્યુક્તો દ્વિજદેવાતિથિપ્રિયઃ ॥ ૫॥

તતોઽકસ્માત્ સ રાજર્ષિઃ શૂલયુક્તો બભૂવ હ ।
ઉદરે શસ્ત્રસમ્પાતૈરિવ યુક્તો રુરોદ હ ॥ ૬॥

નાનાયત્નાઃ કૃતાઃ સર્વૈઃ શૂલનાશાર્થમાદરાત્ ।
મન્ત્રૈશ્ચૌષધિભિઃ શૂલં પિપીડાતિતરાં નૃપમ્ ॥ ૭॥

તીર્થદેવાદિકં સોઽપિ બ્રાહ્મણૈર્વેદપારગૈઃ ।
અસેવત તતસ્તસ્ય શૂલમુગ્રં બભૂવ વૈ ॥ ૮॥

તતઃ શૂલેન રાજાઽતિપીડિતો દારુણેન વૈ ।
વિષાદિભિર્મતિં ચક્રે દેહત્યાગે વિશેષતઃ ॥ ૯॥

તતોઽકસ્માન્ મહાયોગી પર્વતઃ સહસાઽઽગતઃ ।
તસ્ય ગેહે તં નનામ સ રાજા દુઃખસંયુતઃ ॥ ૧૦॥

બ્રાહ્મણૈઃ પૂજયામાસ તં સર્વજ્ઞં વિશેષતઃ ।
ઉવાચ દુઃખસંયુક્તઃ શૂલપીડાં નિયમ્ય સઃ ॥ ૧૧॥

હેમાઙ્ગદ ઉવાચ ।
ધન્યં મે જન્મ દાનાદિ પિતા માતા કુલાદિકમ્ ।
સ્વધર્મપુત્રદારાદિ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૨॥

તતોઽતિપીડયા યુક્તઃ પપાત ધરણીતલે ।
રુરોદ દારુણં રાજા તત્ દૃષ્ટ્વા વિસ્મિતો દ્વિજઃ ॥ ૧૩॥

પપ્રચ્છ સચિવાન્ વિપ્રો મુનીનાં પર્વતો વરઃ ।
કિમિદં દુઃખમુગ્રં વૈ રાજ્ઞા પ્રાપ્તં પ્રકથ્યતામ્ ॥ ૧૪॥

સચિવા ઊચુઃ ।
શૂલમુગ્રં બભૂવાસ્યાનિવાર્યં ત્વૌષધાદિભિઃ ।
તીર્થમન્ત્રપ્રયોગૈશ્ચ નાનાયત્નૈર્મહામુને ॥ ૧૫॥

શ્રુત્વા તેષાં વચઃ ક્રૂરં પર્વતો ધ્યાનમાસ્થિતઃ ।
જ્ઞાત્વા પાપં મહાયોગી રાજ્ઞઃ સર્વાનુવાચ હ ॥ ૧૬॥

પર્વત ઉવાચ ।
શ ૃણુ રાજંસ્ત્વદીયે યદ્રાજ્યે પાપં સુદારુણમ્ ।
વર્તતે ત્વં તતઃ પૂર્ણશૂલયુક્તોઽસિ સામ્પ્રતમ્ ॥ ૧૭॥

ચતુર્થ્યાસ્તે વ્રતં મુખ્યં રાજ્યે નષ્ટં વિશેષતઃ ।
તેન દોષસમૂહેન સજનસ્ત્વં સુદુઃખિતઃ ॥ ૧૮॥

પર્વતસ્ય વચઃ શ્રુત્વા રાજા તં હર્ષિતોઽવદત્ ।
કૃત્વા કરપુટં ભૂપ વિનયાવનતો વચઃ ॥ ૧૯॥

હેમાઙ્ગદ ઉવાચ ।
કીદૃશં તદ્વ્રતં સ્વામિન્ કેન સઞ્ચરિતં પુરા ।
કસ્યૈવ પૂજનં તત્ર વદ મે સર્વમઞ્જસા ॥ ૨૦॥

પર્વત ઉવાચ ।
સર્વસિદ્ધિકરં રાજન્ વ્રતં ગાણેશ્વરં પરમ્ ।
ચતુર્ણાં પુરુષાર્થાનાં સાધનં સર્વસમ્મતમ્ ॥ ૨૧॥

તતશ્ચતુર્થીમાહાત્મ્યં કથયામાસ વિસ્તરાત્ ।

તેન સંહર્ષિતો રાજા શ્રુત્વા તં પુનરબ્રવીત્ ॥ ૨૨॥

કીદૃશોઽયં ગણાધીશો વદ તસ્ય સ્વરૂપકમ્ ।
જ્ઞાત્વા તં દેવદેવેશં ભજિષ્યામિ વિશેષતઃ ॥ ૨૩॥

પર્વત ઉવાચ ।
પુરા વૃત્તં ગણેશસ્ય ચરિત્રં યન્મયા શ્રુતમ્ ।
તદેવ કથયિષ્યામિ નિદાઘાત્ સર્વદં પરમ્ ॥ ૨૪॥

અહં તપસિ સન્તિષ્ઠન્નાનાયત્નપરાયણઃ ।
(Page ખં. ૪ અ. ૧૩ પાન ૪૦)
સંવ્યાપ્તં તપસા સર્વં મદીયેન મહામતે ॥ ૨૫॥

ઇન્દ્રઃ પ્રક્ષુભિતોઽત્યન્તં કામમપ્સરસા યુતમ્ ।
પ્રેષયામાસ વિઘ્નાર્થં તપસો મે મદાન્વિતઃ ॥ ૨૬॥

તતઃ સોઽપિ ભયોદ્વિગ્નઃ કામો દાહસમન્વિતઃ ।
તપસસ્તેજસા સત્યં પલાયત સ સૈનિકઃ ॥ ૨૭॥

તતોઽહં તપસા યુક્તોઽતર્નિષ્ઠશ્ચાઽભવં નૃપ ।
તપસ્ત્યક્ત્વા મહાબાહો શમદમપરાયણઃ ॥ ૨૮॥

નાનાભૂમિપરો જાતસ્તતોઽતિભાગ્ય ગૌરવાત્ ।
નિદાઘઃ સહસા તત્રાઽઽગતોઽવધૂતમાર્ગવિત્ ॥ ૨૯॥

દૃષ્ટ્વા તં યોગિનં પૂર્ણં પ્રણતોઽહં વિશેષતઃ ।
અપૂજયં વિધાનેન તતસ્તં સ્મ વદામિ વૈ ॥ ૩૦॥

ધન્યો મે જનકો માતા તપો ધન્યં જનુસ્તથા ।
બ્રહ્મભૂયપ્રદસ્યાઽપિ પાદપદ્મસ્ય દર્શનાત્ ॥ ૩૧॥

અધુના વદ મે નાથ યોગં શાન્તિપ્રદાયકમ્ ।
યેનાઽહં યોગિવન્દ્યશ્ચ ભવેયં સાધનાન્ મુને ॥ ૩૨॥

વસિષ્ઠ ઉવાચ ।
ઇતિ પૃષ્ટો મહાતેજા નિદાઘસ્તમુવાચ હ ।
પર્વતં તપસા શુદ્ધં પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૩૩॥

નિદાઘ ઉવાચ ।
શ઼ૃણુ વૃત્તં મદીયં તે કથયામિ પુરાતનમ્ ।

યેન યોગીન્દ્ર વન્દ્યશ્ચ જાતોઽહં યોગસેવયા ॥ ૩૪॥

અહં યોગાર્થમત્યન્તં યોગભૂમિપરાયણઃ ।
અસાધયં મહાયોગં બ્રહ્મભૂયકરં પરમ્ ॥ ૩૫॥

તતોંઽતેઽહં સદાનન્દે સમઃ સ્વાનન્દકેઽભવમ્ ।
સંસ્થિતસ્તત્ર ભો રાજન્ દૃષ્ટમાનન્દરૂપકમ્ ॥ ૩૬॥

દ્વન્દ્વૈઃ સર્વત્ર સંવ્યાપ્તં દ્વન્દ્વે તદ્ યોગરૂપિ ચ ।
તેન શાન્તિર્ગતા મેઽભૂત્તતો વિષ્ણું ગતોઽભવમ્ ॥ ૩૭॥

તં પ્રણમ્ય મહાત્માનમવદં વદ શાન્તિદમ્ ।
યોગં વિષ્ણો મહાયોગિન્ યેન શાન્તો ભવામ્યહમ્ ॥ ૩૮॥

વિષ્ણુરુવાચ ।
યોગશાન્તિપ્રદં તાત ગણેશં વિદ્ધિ માનદ ।
તં જ્ઞાત્વા શાન્તિમાપન્ના વયં સર્વે ચ યોગિનઃ ॥ ૩૯॥

મનોવાણીમયં વિદ્ધિ ગકારં ચ તયોઃ પરમ્ ।
મનોવાણીવિહીનં તં ણકારં યોગિસમ્મતમ્ ॥ ૪૦॥

તયોઃ સ્વામી ગણાધીશસ્તં ભજસ્વ વિધાનતઃ ।
તતઃ શાન્તિં મહાભાગ લભસે નાઽત્ર સંશયઃ ॥ ૪૧॥

એવમુક્ત્વા મહાવિષ્ણુર્વિરરામ સ્વયં તતઃ ।
તં પ્રણમ્ય વને ગત્વા યોગાભ્યાસપરોઽભવમ્ ॥ ૪૨॥

એકાક્ષરસ્ય મન્ત્રસ્ય સન્તુષ્ટોઽભૂદ્ગજાનનઃ ।
ગતેષુ દશ વર્ષેષુ જપેન સહસાઽઽગતઃ ॥ ૪૩॥

ધ્યાનસ્થં માં સમાલોક્ય જગાદ વૃણુ વાઞ્છિતમ્ ।
તતોઽહં તં પ્રણમ્યૈવાપૂજ્ય સ્તોતું પ્રચક્રમે ॥ ૪૪॥

સ્તોત્રં યત્ સામવેદોક્તં તચ્છ્રુત્વા તુષ્ટિમાગતઃ ।
યોગશાન્તિં ગણેશાનો દત્ત્વા મે પ્રજગામ હ ॥ ૪૫॥

તદાદિ ગાણપત્યોઽહં જાતસ્તં પ્રભજામિ વૈ ।
ભજસ્વ ગણરાજં ત્વમતસ્તં શાન્તિદં પરમ્ ॥ ૪૬॥

એવમુક્ત્વા નિદાઘઃ સં દદૌ તસ્મૈ મહામનુમ્ ।
એકાક્ષરં વિધાનેન તતઃ સોંઽતર્હિતોઽભવત્ ॥ ૪૭॥

પર્વત ઉવાચ ।
ભજામિ ગણનાથં સ્મ તતોઽહં નિત્યમાદરાત્ ।
તેનોક્તવિધિના રાજન્ શાન્તિં પ્રાપ્તો વિશેષતઃ ॥ ૪૮॥

અપૂજયં હિ ગણપં તતો નિત્યં તપોન્વિતઃ ।
તતો માં દર્શયામાસ રૂપં યોગમયં પ્રભુઃ ॥ ૪૯॥

સ્તુતઃ સમ્પૂજિતો મે સ ભક્તિં દત્ત્વા મહામતે ।
સ્વાનન્દે સ ગતો રાજન્ ભક્તાનન્દવિવર્ધનઃ ॥ ૫૦॥

(Page ખં. ૪ અ. ૧૩ પાન ૪૧)
એવમુક્ત્વા પર્વતસ્તં દદૌ મન્ત્રં દશાક્ષરમ્ ।
ગણેશસ્ય મહારાજ તતશ્ચાન્તર્હિતોઽભવત્ ॥ ૫૧॥

રાજા સર્વજનૈરાદૌ વ્રતં ચક્રે સ હર્ષિતઃ ।
ફાલ્ગુને ભૂપ શુક્લસ્થચતુર્થીસંજ્ઞકં પરમ્ ॥ ૫૨॥

તતો રાજ્ઞાઽપિ સર્વત્ર કૃતો ઘોષો જનૈર્નૃપ ।
શૌક્લં કાર્ષ્ણં વ્રતં ભૂમૌ ક્રિયતાં ભાવસંયુતૈઃ ॥ ૫૩॥

તતઃ શુલવ્યથાહીનો બભૂવે રાજસત્તમઃ ।
દુઃખહીના જનાઃ સર્વે જાતા વ્રતપ્રભાવતઃ ॥ ૫૪॥

પુત્રપૌત્રાદિસંયુક્તા રોગાદ્યભિવિવર્જિતાઃ ।
ધનધાન્યાદિભિઃ સર્વે મુમુદુર્ભૂમિમણ્ડલે ॥ ૫૫॥

તતો હેમાઙ્ગદો રાજા ભક્ત્યા વિઘ્નેશમુત્તમૈઃ ।
ઉપચારૈઃ પ્રપૂજ્યાઽપિ સિષેવે નિત્યમાદરાત્ ॥ ૫૬॥

પુત્રં રાજ્યે નિધાયાઽસૌ સસ્ત્રીકઃ શાન્તિસંયુતઃ ।
ગણેશં સર્વભાવેનાન્તે ચ તન્મયતામયાત્ ॥ ૫૭॥

ક્રમેણ ભૂમિસંસ્થા યે નરાઃ સ્વાનન્દગા બભુઃ ।
ભુક્ત્વા ભોગાન્ વિશેષેણ વ્રતપુણ્યપ્રભાવતઃ ॥ ૫૮॥

અધુના શ‌ૃણુ ચાન્યત્ત્વં માહાત્મ્યં વ્રતસંશ્રિતમ્ ।
ભાકરે નગરે વિપ્રો વસદ્વૈ જાતિદૂષણઃ ॥ ૫૯॥

બાલ્યાત્પ્રભૃતિ તેનૈવ કૃતં કર્મ સુદુઃખદમ્ ।

હિંસાદિસંયુતં રાજન્ ચૌર્યં ક્લેશવિવર્ધનમ્ ॥ ૬૦॥

પરસ્ત્રીલમ્પટો નિત્યં યૌવને સોઽતિદારુણઃ ।
પતિવ્રતા હઠેનૈવ વ્રતભ્રષ્ટાશ્ચકાર હ ॥ ૬૧॥

શસ્ત્રધારી વને ગત્વા જન્તૂન્ જઘ્ને સ નિત્યશઃ ।
દ્વિજાદીન્ દ્રવ્યલુબ્ધશ્ચ માનવાન્ મનુજપ્રિય ॥ ૬૨॥

એવં પાપસમાચારો વને કસ્મિન્ દિને સ્થિતઃ ।
વૈશ્યં દૃષ્ટ્વા ચ તં હન્તુમધાવત્ સ વધપ્રિયઃ ॥ ૬૩॥

પલતા વૈશ્યપુત્રેણ નાદસ્તત્ર કૃતો મહાન્ ।
તં શ્રુત્વા માર્ગસંસ્થાશ્ચ ચત્વારઃ પુરુષાઽઽયયુઃ ॥ ૬૪॥

તે ધૃત્વા રાજદૂતાસ્તં તાડયામાસુરુલ્બણમ્ ।
રાજાનં દર્શયામાસુશ્ચૌરં બદ્ધં જનાસ્તતઃ ॥ ૬૫॥

રાજ્ઞાઽઽજ્ઞપ્તાશ્ચ તં તત્રાતાડયંસ્તે દ્વિજાધમમ્ ।
નાવિદન્ બ્રાહ્મણં રાજંશ્ચિક્ષિપુર્નિગડે દ્વિજમ્ ॥ ૬૬॥

તતઃ ફાલ્ગુનસંસ્થા યા ચતુર્થી શુક્લગાઽઽગતા ।
બદ્ધસ્તત્ર નિરાહારો બભૂવે સ નરાધમઃ ॥ ૬૭॥

પઞ્ચમ્યાં તં મૃતં જ્ઞાત્વા તતો ગાણેશકાઽઽયયુઃ ।
દૂતા નેતું દ્વિજં તત્ર વ્રતપુણ્યપ્રભાવતઃ ॥ ૬૮॥

સ સ્વાનન્દપુરે નીતો ગાણપત્યૈર્નૃપાત્મજ ।
તત્ર વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૬૯॥

એવં નાના જનાશ્ચૈવ બ્રહ્મભૂતા બભૂવિરે ।
તેષાં ચરિત્રકં સર્વં વક્તું તે ન પ્રશક્યતે ॥ ૭૦॥

ફાલ્ગુને વરદાયાસ્તુ ચરિત્રં યઃ શૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય વિઘ્નેશઃ સર્વાન્ કામાન્ દદાતિ હિ ॥ ૭૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ફાલ્ગુનશુક્લચતુર્થીચરિત્રવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૪.૧૩
(Page ખં. ૪ અ. ૧૪ પાન ૪૨)

# ૪.૧૪ ચૈત્રશુક્લચતુર્થીવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રુતં ચરિત્રં મુખ્યં યચ્ચતુર્થ્યાઃ ફાલ્ગુને મયા ।
શુક્લાયાઃ સર્વદં યોગિન્ ન તૃપ્તોઽહં ભવામિ તુ ॥ ૧॥

અતો માં ચૈત્રગાયા યદ્વરદાયાશ્ચરિત્રકમ્ ।
ગુરો સુદયયા બ્રૂહિ પાવનં સર્વજન્મિનામ્ ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
બઙ્ગાલં નગરં ખ્યાતં શોભાભદ્રાખ્યમુત્તમમ્ ।
તત્ર ચન્દ્રપ્રિયો રાજા પ્રચક્રે રાજ્યમુત્તમમ્ ॥ ૩॥

શસ્ત્રાસ્ત્રૈઃ શત્રુસઙ્ઘાતાન્ જિત્વા વીરશ્રિયા યુતઃ ।
સાગરાન્તાં ધરિત્રીં સ ચકાર વશવર્તિનીમ્ ॥ ૪॥

સામન્તા વશગાઃ સર્વે ચક્રુઃ સેવાદિકં નૃપાઃ ।
તસ્ય રાજ્યે પ્રજાઃ સર્વાઃ સ્વસ્વધર્મપરાયણાઃ ॥ ૫॥

સ્વયં ધર્મપરો રાજા નીત્યા વર્ણાશ્રમાદિષુ ।
સંસ્થિતાન્ રક્ષયંશ્ચૈવ સદા હીનાનદણ્ડયત્ ॥ ૬॥

ચૌરાણાં ન ભયં તત્ર સ્વસ્વવ્યાપારકારિણામ્ ।
તથાપિ રોગસંયુક્તા નરા નાર્યોઽભવન્ હિ વૈ ॥ ૭॥

વન્ધ્યાદિદોષસંયુક્તા જનાઃ સર્વે સમાયયુઃ ।
રાજાનં સર્વનીતિજ્ઞં પપ્રચ્છુશ્ચેષ્ટિતં મહત્ ॥ ૮॥

નાગરાદય ઊચુઃ ।
વયં રાજન્ સ્વધર્મસ્થા ત્વદાજ્ઞાવશવર્તિનઃ ।
અપિ ત્વં ધર્મસંયુક્તઃ પ્રધાનાદિભિરાદરાત્ ॥ ૯॥

તથાપિ રોગદોષૈશ્ચ વન્ધ્યદોષૈર્વિશેષતઃ ।
ધનધાન્યવિહીનાશ્ચ પીડિતા વયમુત્કટમ્ ॥ ૧૦॥

પૃથિવી રસહીના વૈ ફલહીના મહીરુહાઃ ।
ગાવો દુગ્ધવિહીનાશ્ચ તવ રાજ્યે મહામતે ॥ ૧૧॥

ધર્મશીલે નૃપે રાજન્ સર્વે સુખયુતા જનાઃ ।

વિપરીતં મહારાજ ત્વયિ રાજ્યં પ્રશાસતિ ॥ ૧૨॥

અતોઽસ્માન્ રક્ષ ભૂપાલ રોગાદિભિઃ પ્રપીડિતાન્ ।
અસ્માકં બલમત્યન્તં ત્વમેવ પરમં મતમ્ ॥ ૧૩॥

વસિષ્ઠ ઉવાચ ।
ચન્દ્રપ્રિયો વચઃ શ્રુત્વા તેષામેવં સુદુઃખિતઃ ।
પ્રધાનેષુ સમાક્ષિપ્ય રાજ્યં નિહતકણ્ટકમ્ ॥ ૧૪॥

વને ગન્તું મનશ્ચક્રે તતસ્તત્રાઽઽજગામ હ ।
અષ્ટાવક્રો મહાયોગી તં દૃષ્ટ્વા પ્રણનામ સઃ ॥ ૧૫॥

સમ્પૂજ્ય ભોજયામાસ પાદસંવાહને રતઃ ।
સ્વયં સ્થિતો મહાવિપ્રમૂચેઽસૌ દુઃખસંયુતઃ ॥ ૧૬॥

ચન્દ્રપ્રિય ઉવાચ ।
ધન્યં મે જન્મ કર્માદિ પિતા માતા તપો યશઃ ।
દાનં જ્ઞાનં તથા યોગિન્ ત્વત્પાદયુગદર્શનાત્ ॥ ૧૭॥

તતઃ સર્વં સ્વવૃત્તાન્તં કથયામાસ યત્નતઃ ।
અષ્ટાવક્રશ્ચ સંશ્રુત્ય તં જગાદ નરાધિપમ્ ॥ ૧૮॥

અષ્ટાવક્ર ઉવાચ ।
રાજન્ રાજ્યે ત્વદીયે યત્ મહત્પાપં પ્રવર્તતે ।
તેન દુઃખયુતા સર્વા પ્રજા જાતા ન સંશયઃ ॥ ૧૯॥

ચતુર્ણાં પુરુષાર્થાનાં પ્રાપકં યન્મહાવ્રતમ્ ।
ચતુર્થીસંજ્ઞકં નષ્ટં તવ રાજ્યે નૃપાધમ ॥ ૨૦॥

પુરુષાર્થૈર્નરાસ્તેન હીનાઃ સર્વેઽધુના પરમ્ ।
અન્તે નરકગા રાજન્ ભવિષ્યન્તિ ત્વયા સહ ॥ ૨૧॥

અષ્ટાવક્રવચઃ શ્રુત્વા તં પ્રણમ્ય મહીપતિઃ ।
ઉવાચ દુઃખસંયુક્તો વચનં સ્વહિતપ્રદમ્ ॥ ૨૨॥

ચન્દ્રપ્રિય ઉવાચ ।
બ્રહ્મન્ દયાનિધે સ્વામિન્ વદ મે વ્રતમુત્તમમ્ ।
કીદૃશં કસ્ય દેવસ્ય પ્રિયમિત્યાદિકં પ્રભો ॥ ૨૩॥

અષ્ટાવક્ર ઉવાચ ।

કૃષ્ણશુક્લચતુર્થીજં વ્રતં ગાણેશ્વરં નૃપ ।
સર્વાદૌ તત્ પ્રકર્તવ્યં ધર્મકામાર્થમુક્તયે ॥ ૨૪॥

ઇત્યુક્ત્વા કથયામાસ ચરિત્રં સકલં દ્વિજઃ ।
(Page ખં. ૪ અ. ૧૪ પાન ૪૩)
ચતુર્થીસમ્ભવં તાત શ્રુત્વા રાજા સુવિસ્મિતઃ ॥ ૨૫॥

પુનઃ પપ્રચ્છ તં વિપ્રં વિનયેન સમન્વિતઃ ।
કીદૃશો ગણરાજોઽયં વ્રતં યસ્ય મહાદ્ભુતમ્ ॥ ૨૬॥

વદ તસ્ય સ્વરૂપં મે જ્ઞાત્વા તં સર્વભાવતઃ ।
વ્રતયુક્તો ભજિષ્યામિ ગણેશં સર્વસિદ્ધિદમ્ ॥ ૨૭॥

અષ્ટાવક્ર ઉવાચ ।
ગણેશસ્ય સ્વરૂપં તુ મયા વક્તું ન શક્યતે ।
તથાપિ શ ૃણુ ભૂપાલ યેન ત્વં જ્ઞાસ્યસિ પ્રભુમ્ ॥ ૨૮॥

પુરાઽહં તપસિ પ્રાજ્ઞ સંસ્થિતો યત્નધારકઃ ।
સુરૂપકા અપ્સરસો યાતાશ્ચલયિતું તતઃ ॥ ૨૯॥

તાસામત્યાગ્રહં દૃષ્ટ્વા કુપિતઃ સ્મ શપામિ તાઃ ।
મૃત્યુલોકે પતધ્વં વૈ ચૌરગ્રસ્તા ભવેત હિ ॥ ૩૦॥

ઇતિ મદ્ગિરમાકર્ણ્ય ભયભીતાઃ સમન્તતઃ ।
તા માં પ્રસાદયામાસુસ્તતોઽહં દયયા યુતઃ ॥ ૩૧॥

અવદં તત્ર વિષ્ણુર્વૈ યાદવેષુ ભવિષ્યતિ ।
તસ્ય પત્ન્યો ભવિષ્યન્ત્યોઽતે ચૌરાણાં ભવિષ્યથ ॥ ૩૨॥

ગતા અપ્સરસો રાજંસ્તતોઽહં તપ આચરમ્ ।
પ્રભાવેણાતિતપસોઽતજ્ઞાનં મેઽભવત્ પરમ્ ॥ ૩૩॥

તતોઽહં તપ ઉત્સૃજ્ય શમી દમપરોઽભવમ્ ।
નાનાયોગવિચારેણ સમાધિં સાધયન્નૃપ ॥ ૩૪॥

એવમન્તે સમાનન્દે સંસ્થિતોઽહં વિશેષતઃ ।
તત્ર મોહં સમાલોક્ય સમરૂપે સુવિસ્મિતઃ ॥ ૩૫॥

તતઃ શાન્ત્યર્થમત્યન્તં ક્લિશ્યામિ સ્મ મહામતે ।
તતોઽકસ્માન્ મહાયોગી ઋભુસ્તત્ર સમાગતઃ ॥ ૩૬॥

વર્ણાશ્રમવિહીનં તં દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
પ્રણમ્યાઽહં વિશેષેણાપૂજ્યોવાચં મહામુનિમ્ ॥ ૩૭॥

ધન્યં મે તપ ઉગ્રં યજ્જન્મ જ્ઞાનાદિકં તથા ।
તવ પાદસ્ય યોગેન કૃતકૃત્યોઽસ્મિ સામ્પ્રતમ્ ॥ ૩૮॥

એવં મદીયં વાક્યં સ શ્રુત્વોવાચ મહામુનિઃ ।
કિં વાઞ્છસિ મહાપ્રાજ્ઞ વદસ્વાઽહં કરોમિ તત્ ॥ ૩૯॥

તતસ્તં પ્રણતો ભૂત્વા કૃતાઞ્જલિપુટઃ પુનઃ ।
અવદં યોગશાન્તિં મે વદ યોગીન્દ્રસત્તમ ॥ ૪૦॥

ઋભુરુવાચ ।
સંયોગઃ પઞ્ચધા તાત સદસત્સમનેતિતઃ ।
સ્વસંવેદ્યમયેનૈવ મુને યોગેન લભ્યતે ॥ ૪૧॥

અયોગઃ પઞ્ચભિર્હીનો નિવૃત્યા લભ્યતે જનૈઃ ।
તયોર્યોગે ભવેદ્યોગો લભ્યતે શાન્તિમાર્ગતઃ ॥ ૪૨॥

તમેવ ગણરાજં ત્વં જ્ઞાત્વા ભજ મહામતે ।
તેન શાન્તિભવં સૌખ્યં લભસે નાન્યથા ક્વચિત્ ॥ ૪૩॥

સંયોગો હિ ગકારશ્ચ ણકારોઽયોગવાચકઃ ।
તયોઃ સ્વામી ગણેશાનઃ પશ્ય વેદે મહામતે ॥ ૪૪॥

અહં પુરા યુતો ભ્રાન્ત્યા નાનાયોગપરાયણઃ ।
અભવં તત્ર ભો વિપ્ર સહજેન સમાશ્રિતઃ ॥ ૪૫॥

સ્વાધીનત્વમહો દૃષ્ટ્વા તત્ર તેન સુવિસ્મિતઃ ।
શરણં શઙ્કરસ્યૈવ ગતોઽહં યોગકામ્યયા ॥ ૪૬॥

શઙ્કરેણોપદિષ્ટઃ સ્મ ભજામિ ગણનાયકમ્ ।
એકાક્ષરવિધાનેન તેન શાન્તિં ગતોઽભવમ્ ॥ ૪૭॥

એવમુક્ત્વા ગણેશસ્ય મહ્યં મન્ત્રં દદૌ ઋભુઃ ।
એકાક્ષરસ્ય મન્ત્રસ્ય જપૈઃ શાન્તિં ગતોઽભવમ્ ॥ ૪૮॥

અષ્ટાવક્રઃ પ્રસન્નાત્મા યોગિવન્દ્યો મહાયશાઃ ।
તસ્મૈ નૃપાય મન્ત્રં સ દદૌ દ્વાદશવર્ણકમ્ ॥ ૪૯॥

સવિધિં મન્ત્રરાજં તં દત્ત્વા ચાન્તર્હિતોઽભવત્ ।

(Page ખં. ૪ અ. ૧૫ પાન ૪૪)
રાજા વિઘ્નેશ્વરસ્યૈવ ભજને તત્પરોઽભવત્ ॥ ૫૦॥

તત્રાદૌ ચૈત્રમાસે યા નૃપ શુક્લા સમાગતા ।
ચતુર્થી સા કૃતા તેન નાગરૈઃ સ્વજનૈઃ પુરા ॥ ૫૧॥

તતઃ સ ઘોષયામાસ વ્રતં જનપદેષુ તત્ ।
શૌક્લં કાર્ષ્ણં વિશેષેણ ચક્રુઃ સર્વે જનાસ્તથા ॥ ૫૨॥

તતો રોગાદિભિર્હીના બભૂવુઃ પુત્રસંયુતાઃ ।
નાનાદોષવિહીનાસ્તે વિહારં ચક્રુરાદરાત્ ॥ ૫૩॥

ચન્દ્રપ્રિયો ગણેશાનમભજન્નાન્યચેતસા ।
પુત્રે રાજ્યં નિવેદ્યૈવ સસ્ત્રીકો વનગોઽભવત્ ॥ ૫૪॥

તતઃ સ્વલ્પેન કાલેન સસ્ત્રીકો નૃપસત્તમઃ ।
સ્વાનન્દે ગણપં ગત્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૫૫॥

ક્રમેણ ભૂમિસંસ્થા યે વ્રતપુણ્યપ્રભાવતઃ ।
બ્રહ્મભૂતા બભૂવુસ્તે દૃષ્ટ્વા ગણપતિં નૃપ ॥ ૫૬॥

અન્યત્ત્વં શ‍ૃણુ ચૈત્રે વૈ શુક્લપક્ષે ચતુર્થિકા ।
તસ્યાશ્ચરિત્રં પાપઘ્નં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૭॥

માલવે શૂદ્રજઃ પાપી કોઽવસન્ વનગોચરાન્ ।
જઘાન પથિકાન્ દુષ્ટો દ્રવ્યલોભી નરાધમઃ ॥ ૫૮॥

તસ્ય પાપસ્ય સઙ્ખ્યાનં કર્તું નૈવ ભવામ્યહમ્ ।
સમર્થો ગણના ત્યક્તા ગ્રન્થબાહુલ્યદોષતઃ ॥ ૫૯॥

તં કદાચિદ્વને સંસ્થં વૃક્ષાગ્રે શસ્ત્રધારકમ્ ।
વઞ્ચયિત્વા જનાન્ ઘ્નન્તં તત્ર સર્પો દદંશ હ ॥ ૬૦॥

તતઃ સોઽપિ ભયોદ્વિગ્નઃ સ્વગૃહં પ્રત્યપદ્યત ।
તતો વિષેણ રાજેન્દ્ર પીડિતો મૂર્ચ્છિતોઽભવત્ ॥ ૬૧॥

દૈવયોગેન તસ્યાપિ ચતુર્થી શુક્લગા નૃપ ।
ચૈત્રે પ્રાપ્તા ચ શૂદ્રોઽભૂત્ પીડયાઽન્નવિવર્જિતઃ ॥ ૬૨॥

પઞ્ચમ્યાં સ મૃતઃ પાપી ગતઃ સ્વાનન્દકે પુરે ।
વ્રતપુણ્યપ્રભાવેણાઽજ્ઞાનેનાઽપિ નૃપાત્મજ ॥ ૬૩॥

એવં નાનાવિધા રાજન્ બ્રહ્મભૂતા બભૂવિરે ।
તેષાં ચરિત્રકં વક્તું શક્યતે ન મયા કદા ॥ ૬૪॥

ઇદં ચૈત્રચતુર્થ્યાસ્તુ શુક્લાયાઃ સંશ‍ૃણોતિ ચેત્ ।
માહાત્મ્યં સ લભેત્ કામાનીપ્સિતાન્ પઠતે યદા ॥ ૬૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચૈત્રશુક્લચતુર્થીવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૪.૧૪

## ૪.૧૫ વૈશાખશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
અધુના શુક્લગાયાસ્તુ વૈશાખે ચરિતં વદ ।
ચતુર્થ્યાઃ શુભદં પૂર્ણં ન તૃપ્યામિ કથામૃતાત્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ગુર્જરે સર્વશોભાઢ્યં નગરં ભદ્રકં પરમ્ ।
તત્ર રાજ્યં ચકારૈવ રાજા બ્રહ્મપ્રિયો મહાન્ ॥ ૨॥

સર્વશાસ્ત્રાર્થસમ્પન્નો યજ્વા દાનપ્રિયઃ સદા ।
દેવદ્વિજાતિથિપ્રેપ્સુઃ શસ્ત્રાસ્ત્રે પારગોઽભવત્ ॥ ૩॥

સર્વાન્ રાજ્ઞો વશે કૃત્વા પૃથિવીમણ્ડલાધિપઃ ।
બભૂવ બલસમ્પન્નઃ સર્વમાન્યો મહામતિઃ ॥ ૪॥

તસ્ય પત્ની મૃતા સદ્યો રજો દર્શનમાત્રતઃ ।
દ્વિતીયા ચ કૃતા પત્ની સમશીલા નૃપેણ હ ॥ ૫॥

સાઽપિ તદ્વન્ મૃતા રાજન્નેવં પઞ્ચ મૃતાસ્તતઃ ।
પત્ન્યોઽભવન્ સુદુઃખાર્તો રાજા બ્રહ્મપ્રિયોઽભવત્ ॥ ૬॥

(Page ખં. ૪ અ. ૧૫ પાન ૪૫)
રાજ્યં નિક્ષિપ્ય રાજર્ષિઃ પ્રધાનેષુ યયૌ વનમ્ ।
સ્વગુરું શ્વેતકેતું સ પ્રણમ્ય પુરતઃ સ્થિતઃ ॥ ૭॥

શ્વેતકેતુઃ સ્વશિષ્યં તમાસનાદિષુ માનદમ્ ।

સંસ્થાપ્ય કુશલત્વેન માનયામાસ હર્ષિતઃ ॥ ૮॥

ભોજયિત્વા સ રાજાનં મહત્ પપ્રચ્છ કારણમ્ ।
કિમર્થં રાજશાર્દૂલ કૃતમાગમનં ત્વયા ॥ ૯॥

વદ તત્ કારણં મુખ્યં તત્ કરિષ્યેઽહમાદરાત્ ।
(Page ખં. ૪ અ. ૧૫ પાન ૪૫)
મમાશ્રમે ત્વમેકાકી રાજ્યં ત્યક્ત્વા સમાગતઃ ॥ ૧૦॥

એવં પૃષ્ટઃ સ રાજર્ષિસ્તં પ્રણમ્ય કૃતાઞ્જલિઃ ।
જગાદ સર્વં વૃત્તાન્તં પત્નીનાશાત્મકં સ્વયમ્ ॥ ૧૧॥

તચ્છ્રુત્વા ગાણપત્યશ્ચ શ્વેતકેતુર્મહાતપાઃ ।
ધ્યાનેનાલોક્ય તં ભૂપં જગાદ ક્રોધસંયુતઃ ॥ ૧૨॥

શ્વેતકેતુરુવાચ ।
નૃપાધમ મહાપાપિન્ શૃણુ મે વચનં હિતમ્ ।
વ્રતં મુખ્યં ચતુર્થ્યાસ્તે રાજ્યે નષ્ટં વિશેષતઃ ॥ ૧૩॥

ચતુર્થીવ્રતહીનસ્ય કર્મ સર્વં સુનિષ્ફલમ્ ।
નારકી ચ ભવત્યન્તે સ નરો નાત્ર સંશયઃ ॥ ૧૪॥

ચતુર્ભિઃ પુરુષાર્થૈસ્ત્વં વર્જિતો નિતરાં નૃપ ।
ચતુઃપદાર્થદાતૃત્વાચ્ચતુર્થી કથિતા બુધૈઃ ॥ ૧૫॥

શ્વેતકેતુવચઃ શ્રુત્વા કોપયુક્તં મહીપતિઃ ।
પ્રણમ્ય તમુવાચાઽથ લજ્જિતઃ ખેદસંયુતઃ ॥ ૧૬॥

બ્રહ્મપ્રિય ઉવાચ ।
અજ્ઞાનેન કૃતં વિપ્ર સર્વદસ્ય વ્રતસ્ય યત્ ।
અનાચરણકં તેન ક્ષમસ્વ કરુણાનિધે ॥ ૧૭॥

વદ માં કીદૃશં સ્વામિન્ વ્રતં સર્વાર્થદં પરમ્ ।
પૂજનં કસ્ય વા કાર્યં વિધિયુક્તં ચ તત્ર વૈ ॥ ૧૮॥

એવં પૃષ્ટો મહાતેજાઃ શ્વેતકેતુસ્તમબ્રવીત્ ।
માહાત્મ્યં વ્રતમુખ્યસ્ય શ્રુત્વા સોઽપિ તમબ્રવીત્ ॥ ૧૯॥

બ્રહ્મપ્રિય ઉવાચ ।
કીદૃશોઽયં ગણાધીશો વ્રતં યસ્ય મહાદ્ભુતમ્ ।

સ્વરૂપં વદ મે તસ્ય ભજિષ્યામિ તમાદરાત્ ॥ ૨૦॥

શ્વેતકેતુરુવાચ ।
શ્ૃણુ રાજન્ પુરાવૃત્તં કથયામિ સમાસતઃ ।
મદીયં ચેષ્ટિતં તેન ગણેશં જ્ઞાસ્યસે પરમ્ ॥ ૨૧॥

અહં પુરા તપોનિષ્ઠો બભૂવાતિતરાં નૃપ ।
ઉદ્દાલકં પ્રણમ્યૈવ પિતરં સાધને રતઃ ॥ ૨૨॥

તતોઽતિતપસા યુક્તં દૃષ્ટ્વા માં જનકો વચઃ ।
જગાદ સ્નેહસંયુક્તઃ શાન્તિદાતા મહાયશાઃ ॥ ૨૩॥

ઉદ્દાલક ઉવાચ ।
પુત્ર શાન્ત્યર્થમેવ ત્વં તપસ્ત્યક્ત્વા મહામતે ।
કુરુ શ્રમં વિશેષેણ બ્રહ્માહમિતિ ધારયન્ ॥ ૨૪॥

કોઽસિ ત્વં કુત આયાતો કુત્ર ગચ્છસિ માં વદ ।
ચિત્તે ચિન્તામણિં તાત પશ્ય પશ્ય વિશેષતઃ ॥ ૨૫॥

પિતુર્વચનમાકર્ણ્ય તમહં પુનરબ્રવમ્ ।
વદ તાત સ્વપુત્રાય જ્ઞાનં શાન્તિપ્રદં મહત્ ॥ ૨૬॥

ચિત્તં ચ કીદૃશં તાત તત્ર ચિન્તામણિઃ કથમ્ ।
સોઽપિ તિષ્ઠતિ વિપ્રેશ કથં જ્ઞેયો મહાત્મભિઃ ॥ ૨૭॥

વસિષ્ઠ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી તમારુણિરુવાચ હ ।
હર્ષેણ મહતા યુક્તો ગાણપત્યસ્વભાવવાન્ ॥ ૨૮॥

ઉદ્દાલક ઉવાચ ।
શ્ૃણુ પુત્ર મહાભાગ યોગશાન્તિપ્રદાયકમ્ ।
યેન ત્વં સર્વયોગજ્ઞો બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૨૯॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં ક્ષિપ્તં મૂઢં મહામતે ।
વિક્ષિપ્તં ચ તથૈકાગ્રં નિરોધં ભૂમિસંજ્ઞિતમ્ ॥ ૩૦॥

તત્ર પ્રકાશકર્તાઽસૌ હૃદિ ચિન્તામણિઃ સ્થિતઃ ।
સાક્ષાદ્યોગેન યોગજ્ઞૈર્લભ્યતે ભૂમિનાશનાત્ ॥ ૩૧॥

(Page ખં. ૪ અ. ૧૫ પાન ૪૬)

ચિત્તરૂપા સ્વયં બુદ્ધિશ્ચિત્તભ્રાન્તિકરી મતા ।
સિદ્ધિર્માયે ગણેશસ્ય માયાખેલક ઉચ્યતે ॥ ૩૨॥

અતો ગણેશમન્ત્રેણ ગણેશં ભજ પુત્રક ।
તેન ત્વં બ્રહ્મભૂતત્વં શાન્ત્યા યોગેન યાસ્યસિ ॥ ૩૩॥

ઇત્યુક્ત્વા ગણરાજસ્ય દદૌ મન્ત્રં તથાऽऽરુણિઃ ।
એકાક્ષરં સ્વપુત્રાય નૃપ ધ્યાનાદિસંયુતમ્ ॥ ૩૪॥

તેનાऽહં સાધયામિ સ્મ ગણેશં સર્વસિદ્ધિદમ્ ।
ક્રમેણ શાન્તિમાપન્નો યોગિવન્દ્યોऽભવં તતઃ ॥ ૩૫॥

અતસ્ત્વમપિ રાજેન્દ્ર ભજસ્વ ગણનાયકમ્ ।
તેનેહપરલોકસ્થસુખં પ્રાપ્સ્યસિ શાશ્વતમ્ ॥ ૩૬॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ત્વં ભવિષ્યસિ ન સંશયઃ ।
એવમુક્ત્વા સ દ્વાત્રિંશદક્ષરસ્થં દદૌ મનુમ્ ॥ ૩૭॥

વિધિયુક્તં મનું રાજાऽऽગૃહ્ય સ્વગૃહમાયયૌ ।
શ્વેતકેતું પ્રણમ્યૈવ હર્ષયુક્તેન ચેતસા ॥ ૩૮॥

તત્રાऽऽદૌ શુક્લપક્ષસ્થા વૈશાખી ચ સમાગતા ।
ચતુર્થી તાં ચકારાऽસૌ નાગરૈર્હર્ષસંયુતઃ ॥ ૩૯॥

તેન સર્વત્ર ઘોષશ્ચ વ્રતસ્ય પ્રકૃતો મહાન્ ।
શૌક્લં કાર્ષ્ણં વ્રતં ચક્રુર્ભૂમિસંસ્થા જના નૃપ ॥ ૪૦॥

રાજા સ્વસ્ત્રીસમાયુક્તોऽભજત્તં ગણનાયકમ્ ।
પુત્રં રાજ્યે સમાસ્થાપ્ય નિવૃત્ત્યા સંયુતોऽભવત્ ॥ ૪૧॥

મન્ત્રં જજાપ વિઘ્નેશં ધ્યાત્વા પૂજાપરાયણઃ ।
વ્રતયુક્તસ્તથાંऽતે સ બ્રહ્મભૂતો બભૂવ હ ॥ ૪૨॥

બ્રહ્મપ્રિયેતિ નામાऽભૂત્ તદેવં સાર્થકં કૃતમ્ ।
તેન રાજ્ઞા મહાભાગ ગાણપત્યસ્વભાવતઃ ॥ ૪૩॥

તસ્ય રાજ્યે જનાઃ સર્વે વ્રતપુણ્યેન ભૂમિપ ।
ક્રમેણ બ્રહ્મભૂતાસ્તેऽભવન્ સ્વાનન્દકે પુરે ॥ ૪૪॥

ઉદ્દાલકશ્વેતકેતૂ ગાણપત્યસ્વભાવતઃ ।
અવધૂતૌ તુ વિખ્યાતૌ બભૂવાતે મહાપ્રભૂ ॥ ૪૫॥

શ્વેતકેતુદ્વિજેનાઽપિ મર્યાદા પ્રકૃતા બલાત્ ।
સર્વેભ્યઃ સુખદાઽત્યન્તં તાં શ‍ૃણુષ્વ વિશેષતઃ ॥ ૪૬॥

કદાચિદારુણિસ્તત્ર સસ્ત્રીકઃ સ્વાશ્રમે સ્થિતઃ ।
આજગામ દ્વિજઃ કશ્ચિત્ સર્વશાસ્ત્રવિશારદઃ ॥ ૪૭॥

જગાદ સ્ત્રિયમેવં સ આરુણેઃ કામવિહ્વલઃ ।
મૈથુનાય સમાગચ્છ મયા સહ સુરૂપિણિ ॥ ૪૮॥

તચ્છ્રુત્વા શ્વેતકેતું તં ક્રુદ્ધમારુણિરબ્રવીત્ ।
મા ક્રોધં કુરુ પુત્ર ત્વમવૃતાસ્તુ સ્ત્રિયો મતાઃ ॥ ૪૯॥

તચ્છ્રુત્વા પિતરં પ્રાહ શ્વેતકેતૂ રુષા યુતઃ ।
એવં ચેત્ પતિમેકં વૃણોતિ સા કામિની કથમ્ ॥ ૫૦॥

અતો વૈ વેધસા સ્વામિન્ન કૃતં કર્મ શાશ્વતમ્ ।
અસમઞ્જસકં મત્વા મર્યાદાં કારયામ્યહમ્ ॥ ૫૧॥

અદ્યપ્રભૃતિ રાગેણ સ્પૃશેદ્યશ્ચ પરસ્ત્રિયમ્ ।
સ્ત્રીહત્યાં લભતાં તત્ર પુરુષઃ સ ન સંશયઃ ॥ ૫૨॥

અથવા પુરુષં કઞ્ચિત્ પતિં ત્યક્ત્વા ચ કામિની ।
ગચ્છેન્ મૈથુનભાવાર્થં પતિહત્યાં તુ સા લભેત્ ॥ ૫૩॥

યદ્યહં ગણરાજસ્ય ભક્તશ્ચેદ્વિઘ્નનાયક ।
તદા મે વચનં સત્યં ભવેત્તત્તે નમો નમઃ ॥ ૫૪॥

તદાદિ સંવૃતા સ્ત્રી સા સેવતે ભાવતઃ પતિમ્ ।
વિનાયકપ્રસાદેન તેનેયં સ્થાપિતાઽભવત્ ॥ ૫૫॥

પ્રસઙ્ગાત્તે મયા ખ્યાતમુદ્દાલકવિચેષ્ટિતમ્ ।
માહાત્મ્યમન્યદધુના ચતુર્થીસમ્ભવં શ‍ૃણુ ॥ ૫૬॥

મહારાષ્ટ્રે દ્વિજઃ કશ્ચિત્ પરસ્ત્રીલમ્પટોઽભવત્ ।
(Page  ખં. ૪ અ. ૧૬ પાન ૪૭)
તદર્થં તેન મદ્યસ્ય કૃતં પાનં વિશેષતઃ ॥ ૫૭॥

ચૌર્યેણ ધનમાદાય હિંસાકર્મપરાયણઃ ।
નાનાપાપરતો ભૂત્વા પરસ્ત્રિયમસેવત ॥ ૫૮॥

જગામ શૂદ્રગેહે સ એકદા કામવિહ્વલઃ ।
ધનં ગૃહીત્વા સ્વં લબ્ધં ધનં દત્ત્વા રરામ હ ॥ ૫૯॥

એવં કિઞ્ચિદ્ગતે કાલે શૂદ્રઃ સ્વગૃહમાગતઃ ।
તેન શસ્ત્રાભિઘાતેન હતોઽભૂત્સ દ્વિજાધમઃ ॥ ૬૦॥

તસ્મિન્ દિને સમાયાતા ચતુર્થી દૈવયોગતઃ ।
તત્ર શસ્ત્રાભિઘાતસ્ય પીડયા સંયુતોઽભવત્ ॥ ૬૧॥

અન્નાદિભિર્વિહીનશ્ચ પઞ્ચમ્યાં સ મમાર હ ।
તતઃ સ્વાનન્દકે લોકે જગામ ભૃશપૂજિતઃ ॥ ૬૨॥

વૈશાખશુક્લપક્ષસ્ય ચતુર્થીવ્રતયોગતઃ ।
બ્રહ્મભૂતઃ સ વૈ જાતો મહાપાપપરાયણઃ ॥ ૬૩॥

અજ્ઞાનવ્રતજેનૈવ પુણ્યેનાઽસૌ દ્વિજાઽધમઃ ।
બ્રહ્મભૂતશ્ચ સઞ્જાતો જ્ઞાનિનાં તત્ર કા કથા ॥ ૬૪॥

નાના જના વ્રતં કૃત્વા જ્ઞાનતોઽજ્ઞાનતો નૃપ ।
બભૂવુર્બ્રહ્મભૂતાશ્ચ મયા વક્તું ન શક્યતે ॥ ૬૫॥

એતદ્ વૈશાખશુક્લાયાશ્ચતુર્થ્યાઃ શ્ ૃણુયાત્તુ યઃ ।
માહાત્મ્યં પ્રપઠેદ્વાઽપિ સ લભેદીપ્સિતં ફલમ્ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે વૈશાખશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૪.૧૫

## ૪.૧૬ જ્યેષ્ઠશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રુતં વૈશાખમાસે વૈ શુક્લાયાઃ ફલમુત્તમમ્ ।
ચતુર્થ્યા અધુના યોગિન્ જ્યેષ્ઠશુક્લાં વદ પ્રભો ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
આન્ધ્રે શેષપુરે રાજન્ રાજાઽભૂત્ કર્દમાભિધઃ ।
શસ્ત્રાસ્ત્રનિપુણોઽત્યન્તં નાનાધર્મપરાયણઃ ॥ ૨॥

વશં ભૂમણ્ડલં યસ્ય સમુદ્રાન્તં બભૂવ હ ।

તેજસા ધર્મનીત્યા વૈ હ્યતુલો યશસાઽભવત્ ॥ ૩॥

દૈવયોગેન તસ્યાઽભૂત્ પ્રમેહશ્ચાઽતિદારુણઃ ।
અગ્નિવદ્ દાહકો દેહે પાપેન પ્રેરિતઃ પરઃ ॥ ૪॥

તેનાતિપીડિતો રાજા મૂત્રિતું ન શશાક સઃ ।
રુરોદ કર્દમો ભૂત્વા સદા દાહયુતો ભૃશમ્ ॥ ૫॥

નાનોપાયાઃ કૃતાસ્તેન શાન્તો રોગો બભૂવ ન ।
તતો રાજ્યં પરિત્યજ્ય સસ્ત્રીકઃ સ યયૌ વનમ્ ॥ ૬॥

વનાદ્વનાન્તરં ગત્વા મહોગ્રં ભયવર્ધનમ્ ।
સિંહવ્યાઘ્રાદિયુક્તં ચ મરણાય રુરોદ હ ॥ ૭॥

તત્રાઽઽજગામ વિપ્રેન્દ્રો ભરદ્વાજો મહાયશાઃ ।
તં દૃષ્ટ્વા સહસોત્થાય સસ્ત્રીકઃ પ્રણનામ સઃ ॥ ૮॥

સ હિ બધ્વા કરપુટં તત્પુરઃ સંસ્થિતોઽભવત્ ।
તતોઽતિદાહસંયુક્તઃ પપાત ચ રુરોદ સઃ ॥ ૯॥

તાદૃશં નૃપનાથં સ દૃષ્ટ્વા યોગીન્દ્રસત્તમઃ ।
ધ્યાનેનાલોક્ય રાજાનમુવાચ દયયા યુતમ્ ॥ ૧૦॥

ભરદ્વાજ ઉવાચ ।
શૃણુ કર્દમ રાજેન્દ્ર વચનં મે હિતાવહમ્ ।
યેન દુઃખવિહીનસ્ત્વં ભવિષ્યસિ મહામતે ॥ ૧૧॥

(Page ખં. ૪ અ. ૧૬ પાન ૪૮)
ચતુર્થીવ્રતમત્યન્તં નષ્ટં રાજ્યે ત્વદીયકે ।
તેન પાપસમાયુક્તસ્ત્વં જાતોઽસિ નૃપાધમઃ ॥ ૧૨॥

અતસ્ત્વં જનસંયુક્તો વ્રતં કુરુ મહામતે ।
પુણ્યેન તેન રાજેન્દ્ર દુઃખહીનો ભવિષ્યસિ ॥ ૧૩॥

ભરદ્વાજવચઃ શ્રુત્વા તં પપ્રચ્છ પ્રણમ્ય સઃ ।
કર્દમો હર્ષસંયુક્તો વ્રતસ્યાઽઽચરણાય ચ ॥ ૧૪॥

કર્દમ ઉવાચ ।
ભગવન્ સર્વતત્ત્વજ્ઞ ત્વયાઽહમનુકમ્પિતઃ ।
વ્રતસ્ય વદ માહાત્મ્યમધુના તત્ કરોમ્યહમ્ ॥ ૧૫॥

ભરદ્વાજ ઉવાચ ।
સઙ્કષ્ટે વરદં કૃષ્ણે ચતુર્થીજં ચ શુક્લકે ।
વ્રતં સર્વાર્થદં પૂર્ણં ચતુર્ણાં સાધકં મતમ્ ॥ ૧૬॥

સર્વાદૌ તન્નરઃ કુર્યાત્તદા સર્વં નરાધિપ ।
ચતુર્ણાં પુરુષાર્થાનાં દાતૃકર્મફલં લભેત્ ॥ ૧૭॥

અતો હીનશ્ચતુર્ભિસ્ત્વં સ જનો નરકે નૃપ ।
પતિષ્યસિ ન સન્દેહસ્તદર્થં યત્નમાચર ॥ ૧૮॥

એવમુક્ત્વા સ માહાત્મ્યં ચતુર્થીસમ્ભવં નૃપ ।
કથયામાસ ભૂપાય શ્રુત્વા રાજા નનન્દ હ ॥ ૧૯॥

પુનઃ પપ્રચ્છ તં વિપ્રં ભરદ્વાજં સ કર્દમઃ ।
ગણેશસ્ય સ્વરૂપં મે વદ સર્વજ્ઞ તે નમઃ ॥ ૨૦॥

ભરદ્વાજ ઉવાચ ।
ગણેશસ્ય સ્વરૂપં તુ વક્તું વેદાદિકા નૃપ ।
ન સમર્થાસ્તથાऽપિ ત્વં શ‍ૃણુ સારં સુખપ્રદમ્ ॥ ૨૧॥

પુરાऽહં તપસા યુક્તોऽતપં ચ તપ ઉત્તમમ્ ।
સર્વં ચરાચરં રાજન્ મદધીનં બભૂવ હ ॥ ૨૨॥

તથાऽપિ તપસોગ્રેણાऽસાધયં તુ તપઃ પુનઃ ।
તતોંऽતર્જ્ઞાનભાવે મે મતિર્જાતા સુપુણ્યતઃ ॥ ૨૩॥

તપસ્ત્યક્ત્વા તતોऽહં તુ શમી દમપરોऽભવમ્ ।
જડોન્મત્તાદિજે માર્ગે સંસ્થિતો યોગકારણાત્ ॥ ૨૪॥

તતઃ ક્રમેણ ભો રાજન્નસત્સ્વાનન્દગોऽભવમ્ ।
તત્ર સમ્પૂર્ણયોગેન શાન્તિં પ્રાપ્તો વિશેષતઃ ॥ ૨૫॥

તસ્માદ્ભેદાદિકં સર્વમુત્પન્નં તુ વિશેષતઃ ।
તદ્ દૃષ્ટ્વા ક્ષુભિતોऽત્યન્તં શાન્તિહીનો યથાऽભવમ્ ॥ ૨૬॥

તતોऽકસ્માદ્રૈવતો યો મહાયોગી સમાગતઃ ।
આશ્રમે મે ચ તં દૃષ્ટ્વા પ્રણતોऽહં સુપૂજયન્ ॥ ૨૭॥

સ્વાસને સુખમાસીનમબ્રવં તં મહામુનિમ્ ।
અદ્યાऽહં કૃતકૃત્યશ્ચ જાતસ્તે દર્શનેન વૈ ॥ ૨૮॥

વદ મે યોગશાન્તિં ત્વં યોગીન્દ્રાણાં ગુરુર્ભવાન્ ।
તિષ્ઠામિ શાન્તિગો ભૂત્વા યયાऽહં યોગધારકઃ ॥ ૨૯॥

રૈવત ઉવાચ ।
સ્વાનન્દઃ પઞ્ચધા પ્રોક્તઃ સદસત્સમનેતિતઃ ।
ચતુર્ણાં ચૈવ સંયોગે સ્વસ્વરૂપઃ પ્રકીર્તિતઃ ॥ ૩૦॥

અયોગઃ સ્વસ્વરૂપેણ હીનઃ સર્વત્ર સમ્મતઃ ।
તયોર્યોગો ભરદ્વાજ યોગશાન્તિપ્રદાયકઃ ॥ ૩૧॥

સ્વસંવેદ્યો ગકારશ્ચ ણકારો યોગ ઉચ્યતે ।
તયોઃ સ્વામી ગણેશોऽયં બ્રહ્મણસ્પતિવાચકઃ ॥ ૩૨॥

તં ભજસ્વ મહાભાગ તતઃ શાન્તિમવાપ્સ્યસિ ।
નાન્યથા શતવર્ષૈસ્ત્વં ભ્રમયુક્તો ભવિષ્યસિ ॥ ૩૩॥

એતદ્વિષ્ણુમુખાદ્બ્રહ્મન્ શ્રુત્વા જ્ઞાનં મહત્ પુરા ।
તેનાऽહં શાન્તિમાપન્નો ગાણપત્યશ્ચરામિ વૈ ॥ ૩૪॥

એવમુક્ત્વા દદૌ તસ્મૈ સ્વમન્ત્રં સિદ્ધિદાયકમ્ ।
એકાક્ષરં ગણેશસ્ય સવિધિં ન્યાસસંયુતમ્ ॥ ૩૫॥

પૂજિતો રૈવતસ્તેન જગામ સ્વેચ્છયા ચરન્ ।
ભરદ્વાજો ગણેશાનમભજન્નાન્યચેતસા ॥ ૩૬॥

તતઃ શાન્તિં સમાપન્નો તથાપિ ભજને રતઃ ।
(Page ખં. ૪ અ. ૧૬ પાન ૪૯)
ગતેષુ દશવર્ષેષુ વિઘ્નેશસ્તં સમાયયૌ ॥ ૩૭॥

તં દૃષ્ટ્વા પૂજયામાસ ભરદ્વાજઃ પ્રતાપવાન્ ।
સ સામ્નામષ્ટનામાર્થસ્તોત્રેણ પ્રણનામ હ ॥ ૩૮॥

તતો માં ગાણપત્યં સ કૃત્વા સ્વાનન્દગોऽભવત્ ।
ગણેશસ્તં વિશેષેણાऽહં ભજામિ સુભક્તિતઃ ॥ ૩૯॥

એવમુક્ત્વા દદૌ તસ્મૈ કર્દમાય મહામનુમ્ ।
અષ્ટાક્ષરં ગણેશસ્ય વિધિયુક્તં વિધાનવિત્ ॥ ૪૦॥

તતશ્ચાન્તર્હિતો રાજન્ ભરદ્વાજો મહામુનિઃ ।
કર્દમઃ સ્વગૃહે ગત્વા હર્ષયુક્તઃ પુપૂજ તમ્ ॥ ૪૧॥

તત્રાऽऽદૌ જ્યેષ્ઠમાસે યા નૃપ શુક્લા સમાગતા ।
ચતુર્થી સા કૃતા તેન નાગરૈર્હર્ષસંયુતઃ ॥ ૪૨॥

વરદં સફુટં શુક્લે ચતુર્થીજં ચ કૃષ્ણકે ।
ન કરોતિ નરો યઃ સ સન્તાડ્યો નગરાદ્બહિઃ ॥ ૪૩॥

પ્રકાશિતં તતસ્તેન સર્વત્ર વ્રતમુત્તમમ્ ।
કૃતં ભૂમિતલે રાજન્ ચક્રુઃ સર્વે જના વ્રતમ્ ॥ ૪૪॥

પ્રમેહદુઃખનિર્મુક્તો બભૂવે રાજસત્તમઃ ।
કર્દમઃ સ સ્વકીયં વૈ રાજ્યં પુત્રાય સન્દદૌ ॥ ૪૫॥

વાટિકાયાં સ્થિતો રાજા સસ્ત્રીકો હ્યભજત્ સદા ।
ગણેશં સર્વભાવેન સોંऽતે તન્મયતામયાત્ ॥ ૪૬॥

તસ્ય રાજ્યે જનાઃ સર્વે તે ક્રમેણ મહામતે ।
અભવન્ બ્રહ્મભૂતાશ્ચ વ્રતપુણ્યપ્રભાવતઃ ॥ ૪૭॥

કથાં રમ્યાં દશરથ અન્યાં શ઼ૃણુ સુસિદ્ધિદામ્ ।
ગૌડદેશેંऽત્યજઃ કશ્ચિદ્બભૂવે પાપકારકઃ ॥ ૪૮॥

વને ગત્વા જઘાનાऽસૌ દ્રવ્યલોભી જનાન્ સદા ।
યોનિલમ્પટભાવેન દૂષિતામકરોત્ સ્ત્રિયમ્ ॥ ૪૯॥

વન એકાકિનીં દૃષ્ટ્વા બ્રાહ્મણીં ક્ષત્રિયાં તથા ।
ધૃત્વાऽયભત્ સ વેગેન શૂદ્રીં વૈશ્યસ્ત્રિયં ખલઃ ॥ ૫૦॥

એવં નાનાસ્વભાવેન પાપં ચક્રે સ નિત્યશઃ ।
એકદા બ્રાહ્મણં કચ્ચિદ્ દૃષ્ટ્વા હન્તું તમાયયૌ ॥ ૫૧॥

પલાયત ભયોદ્વિગ્નો હાહાકારપરાયણઃ ।
તસ્ય નાદં સમાકર્ણ્ય પુરુષાઃ પઞ્ચ આયયુઃ ॥ ૫૨॥

તૈર્હતઃ શસ્ત્રઘાતેન પપાત ધરણીતલે ।
તસ્મિન્ દિને સમાયાતા જ્યેષ્ઠી શુક્લા ચતુર્થિકા ॥ ૫૩॥

સ ઉપોષણયુક્તશ્ચ બભૂવે દૈવયોગતઃ ।
મમાર પીડયા યુક્તઃ પઞ્ચમ્યાં પાપરૂપકઃ ॥ ૫૪॥

અજ્ઞાનવ્રતપુણ્યેન બ્રહ્મભૂતો બભૂવ હ ।
ચાણ્ડાલઃ કિં પુનર્ભૂપ જ્ઞાનિનાં ચિત્રમેવ ચ ॥ ૫૫॥

એવં નાનાવિધા રાજન્ વ્રતપુણ્યપ્રભાવતઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દગા બભુઃ ॥ ૫૬॥

તત્રૈવં કતિ ભૂપાલ બ્રૂયાં વક્તું ન શક્યતે ।
અપારમહિમા તસ્માદાનન્ત્યં કથિતં દ્વિજૈઃ ॥ ૫૭॥

ઇદં જ્યેષ્ઠચતુર્થ્યા યન્ માહાત્મ્યં સંશ્ૃણોતિ સઃ ।
પઠેદ્વા યો લભેત્ સર્વં શુક્લાયા મનસીપ્સિતમ્ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે જ્યેષ્ઠશુક્લચતુર્થીમાહાત્મ્યવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૪.૧૬
(Page ખં. ૪ અ. ૧૭ પાન ૫૦)

## ૪.૧૭ આષાઢશુક્લ ચતુર્થીચરિતવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
વદ બ્રહ્મંશ્ચ શુક્લાયા આષાઢે ચરિતં મહત્ ।
ચતુર્થ્યા નૈવ તૃપ્યામિ કથાં શ્રુત્વા સુસિદ્ધિદામ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
મૈથિલે વિષયે રાજન્નગરં ગણ્ડકી મહત્ ।
તત્ર રાજ્યં ભદ્રસેનશ્ચકારામિતતેજસા ॥ ૨॥

શસ્ત્રાસ્ત્રનિપુણોઽત્યન્તં પરરાષ્ટ્રાવમર્દનઃ ।
જિત્વા ભૂમણ્ડલં સર્વં સમુદ્રવલયાઙ્કિતમ્ ॥ ૩॥

રાજ્યં ચકાર ધર્મેણ નીત્યા દણ્ડેન ભૂમિપ ।
યજ્વા વિનીતકો માની દ્વિજદેવાતિથિપ્રિયઃ ॥ ૪॥

વશગાઃ સર્વરાજાનઃ સેવન્તે સ્મ નરાધિપમ્ ।
અપારસેનયા યુક્તં કરદા ઇતરેઽભવન્ ॥ ૫॥

તસ્ય રાજ્યે શુકા રાજન્ શલભા મૂષકાસ્તથા ।
અપારા ભક્ષયન્તિ સ્મ ધાન્યં વસ્ત્રાદિકં બલાત્ ॥ ૬॥

તેષાં નાશાર્થમત્યન્તં ભદ્રસેનઃ પ્રતાપવાન્ ।

અસ્ત્રૈર્યત્નપરો ભૂત્વા મારયામાસ તાન્ બહૂન્ ॥ ૭॥

અગ્ન્યસ્ત્રેણ સમન્તાત્તાન્ દગ્ધાનપિ ચ તાદૃશાન્ ।
દદર્શ પુનરુત્પન્નાંસ્તતો રાજાઽતિવિસ્મિતઃ ॥ ૮॥

યત્ર તત્ર ગૃહાન્તેષુ ચેરુસ્તે શલભાદયઃ ।
અશક્તઃ સ વને ગત્વા બભૂવ હ સુદુઃખિતઃ ॥ ૯॥

ઉપોષણપરો રાજા તતાપ તપ ઉત્તમમ્ ।
શિવં સ્મૃત્વા સ તુષ્ટાવાપૂજ્ય રૌદ્રેણ ભાવતઃ ॥ ૧૦॥

ગતે વર્ષે મહાયોગી બકદાલ્ભ્યઃ સમાયયૌ ।
તં દેશં દૈવયોગેન દદર્શાઽસૌ ભ્રમન્નૃપમ્ ॥ ૧૧॥

રાજા તં પૂજયામાસ સમ્ભોજ્ય નયસંયુતઃ ।
પપ્રચ્છ યોગિનં તત્ર દુઃખયુક્તેન ચેતસા ॥ ૧૨॥

ભદ્રસેન સ્વાચ ।
સ્વામિન્ રાજ્યે મદીયે વૈ મૂષકાઃ શલભાઃ શુકાઃ ।
અત્યન્તં પીડયન્તિ સ્મ જનાન્માં ભક્ષણે રતાઃ ॥ ૧૩॥

તત્રોપાયાઃ કૃતા વિપ્રાઽભવન્ સર્વે સુનિષ્ફલાઃ ।
રાજ્યં ત્યક્ત્વા વનેઽહં ચ સંસ્થિતો દુઃખકારણાત્ ॥ ૧૪॥

શઙ્કરં સમ્ભજંસ્તત્ર દર્શનં તે મહામતે ।
પ્રાપ્તસ્તપઃ પ્રભાવેણ તત્રોપાયં વદ પ્રભો ॥ ૧૫॥

વસિષ્ઠ ઉવાચ ।
ભદ્રસેનવચઃ શ્રુત્વા ગાણપત્યો મહાયશાઃ ।
જગાદ બકદાલ્ભ્યઃ સ તં ભૂપં હર્ષયન્નિવ ॥ ૧૬॥

બકદાલ્ભ્ય ઉવાચ ।
શિવેન પ્રેષિતોઽત્રાઽહં ત્વદર્થં રાજસત્તમ ।
શ ૃણુ મે પરમં વાક્યં દુઃખનાશકરં મહત્ ॥ ૧૭॥

રાજ્યે તે ભદ્રસેનાઽદ્ય વ્રતં નષ્ટં બભૂવ હ ।
ચતુર્થી સંજ્ઞકં તેન વિઘ્નયુક્તોઽસિ સામ્પ્રતમ્ ॥ ૧૮॥

પ્રજાઃ સર્વા ભયોદ્વિગ્ના જાતા દુષ્ટે નરાધિપે ।
રાજ્યકર્તરિ રે પાપિન્ નરકે ગચ્છસિ હ્યતઃ ॥ ૧૯॥

સર્વાદૌ તદ્વ્રતં સર્વૈઃ કર્તવ્યં નિત્યવત્પ્રભો ।
ચતુર્ણાં પુરુષાર્થાનાં દાયકં વિઘ્નહારકમ્ ॥ ૨૦॥

ન કૃતં ચેત્તદા સર્વં કૃતં કર્મ નિરર્થકમ્ ।
ચતુઃપદાર્થહીનત્વાદ્વિચારય મહામતે ॥ ૨૧॥

એવમુક્ત્વા ચતુર્થ્યા યન્ માહાત્મ્યં બકદાલ્ભ્યકઃ ।
કથયામાસ રાજ્ઞે વૈ શ્રુત્વા તં સોઽબ્રવીદ્વચઃ ॥ ૨૨॥

ભદ્રસેન ઉવાચ ।
કીદૃશોઽયં ગણાધીશો વદ તસ્ય સ્વરૂપકમ્ ।
જ્ઞાત્વા તં સર્વદેવેશં ભજિષ્યામિ વિશેષતઃ ॥ ૨૩॥

બકદાલ્ભ્ય ઉવાચ ।
પુરાવૃત્તં મદીયં યચ્ચેષ્ટિતં શ્ૃણુ ભૂમિપ ।
તેન ત્વં ગણરાજસ્ય જ્ઞાને સુનિપુણો ભવેઃ ॥ ૨૪॥

પુરાઽહં તપસા યુક્તો વાયુમાત્રાશનોઽભવમ્ ।
(Page ખં. ૪ અ. ૧૭ પાન ૫૧)
ચરાચરં તતો મત્તેજસા વ્યાપ્તં ભયાતુરમ્ ॥ ૨૫॥

તથાપિ તપસા રાજન્ યુક્તોઽહં તત્ર મેઽદ્ભુતમ્ ।
બભૂવ વિશ્વરૂપસ્ય દર્શનં સર્વગં પરમ્ ॥ ૨૬॥

તેનાઽહં જ્ઞાનભાવેન સંસ્થિતો યોગકારણાત્ ।
તપસ્ત્યક્ત્વા વિશેષેણ જડોન્મત્તાદિકે રતઃ ॥ ૨૭॥

શમી દમપરો ભૂત્વા યોગં પૂર્ણસુખપ્રદમ્ ।
અસાધયં સદાઽત્યન્તં મનોનિગ્રહતત્પરઃ ॥ ૨૮॥

એવં ક્રમેણ ભૂપાલ સહજે બ્રહ્મણિ હ્યહમ્ ।
બ્રહ્મભૂતસ્વભાવેન સંસ્થિતો હર્ષવાંસ્તદા ॥ ૨૯॥

તતો મયાઽતિમોહેન શૂન્યં સ્વાધીનરૂપકમ્ ।
દૃષ્ટં તેનાઽભવં ભ્રાન્તો બ્રહ્મણિ ત્વીદૃશં કથમ્ ॥ ૩૦॥

તતોઽહં શરણં શમ્ભું ગત્વા તં સ્તુતવાન્ સ્તવૈઃ ।
પ્રસન્નં શઙ્કરં દૃષ્ટ્વાઽવદં યોગં વદ પ્રભો ॥ ૩૧॥

શિવ ઉવાચ ।

સત્યાસત્યસમાનાનિ સહજેન યુતાનિ વૈ ।
નિજાત્મબોધતો વિદ્ધિ સ્વાનન્દાદુદ્ભવાનિ ચ ॥ ૩૨॥

સંયોગે સ્વસ્વરૂપત્વં જ્ઞાતવ્યં વેદવાદતઃ ।
અયોગે સર્વસંયોગો નશ્યત્યત્ર ન સંશયઃ ॥ ૩૩॥

સંયોગશ્ચ તથા યોગસ્તયોર્યોગો મહામતે ।
યોગશાન્તિપ્રદઃ પ્રોક્તો યોગિભિર્યોગસેવયા ॥ ૩૪॥

યોગશાન્તિમયં વિદ્ધિ ગણેશં બ્રહ્મનાયકમ્ ।
તં ભજસ્વ વિધાનેન બ્રહ્મભૂતો ભવિષ્યસિ ॥ ૩૫॥

સંયોગશ્ચ ગકારાખ્યો ણકારો યોગવાચકઃ ।
તયોઃ સ્વામી ગણાધીશઃ પશ્ય વેદે વિશેષતઃ ॥ ૩૬॥

એવમુક્ત્વા મહાદેવો દદૌ મન્ત્રં દ્વિજાય મે ।
એકાક્ષરં ગણેશસ્ય વિધિયુક્તં સુયોગદમ્ ॥ ૩૭॥

પ્રણમ્ય શઙ્કરં ભૂપ ગતોઽહં વનમેવ ચ ।
અભજં ગણરાજં તં ધ્યાત્વા જપપરાયણઃ ॥ ૩૮॥

તતસ્તત્કૃપયા શાન્તિર્મયા પ્રાપ્તા વિશેષતઃ ।
તથાઽપિ પૂજને સક્તસ્તં ધ્યાયામિ સ્મ ચેતસા ॥ ૩૯॥

તતો માં દર્શયામાસ રૂપં શુણ્ડાવિરાજિતમ્ ।
દૃષ્ટ્વા તં પ્રણમામિ સ્મ સ્તૌમિ હર્ષસમન્વિતઃ ॥ ૪૦॥

ભક્તિં દત્ત્વા ગણાધીશો હ્યન્તર્ધાનં ચકાર મે ।
તદારભ્ય મહાભાગ ગાણપત્યોઽહમાદરાત્ ॥ ૪૧॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રં પઞ્ચાક્ષરં મુનિઃ ।
અન્તર્ધાનં ગણેશસ્ય સ ચકાર દ્વિજોત્તમઃ ॥ ૪૨॥

બકદાલ્ભ્યં ગતં દૃષ્ટ્વા રાજા હર્ષસમન્વિતઃ ।
ચકાર સ્વપુરે રાજ્યં પુનરાગત્ય ધર્મતઃ ॥ ૪૩॥

તતઃ સ નાગરૈઃ સાર્ધં ચકાર વ્રતમુત્તમમ્ ।
આષાઢે શુક્લપક્ષે વૈ ચતુર્થીજં સુભક્તિતઃ ॥ ૪૪॥

તતઃ સર્વત્ર તેનૈવ પ્રશસ્તં તદ્વ્રતં કૃતમ્ ।
શુક્લકૃષ્ણચતુર્થીજં વ્રતં ચક્રુર્જના નૃપ ॥ ૪૫॥

શુકાશ્ચ મૂષકાસ્તત્ર શલભા નાશમાયયુઃ ।
ધનધાન્યયુતા લોકાઃ પુષ્ટિં લેભુઃ સુહર્ષતઃ ॥ ૪૬॥

નાનાદુઃખં પરિત્યજ્યાનન્દેનૈવ સમાવૃતાઃ ।
અન્તે સ્વાનન્દગાઃ સર્વે બ્રહ્મભૂતા બભૂવિરે ॥ ૪૭॥

રાજ્યેઽભિષિચ્ય પુત્રં સ્વં સપત્નીકો યયૌ વનમ્ ।
તત્ર તં ગણરાજં સોઽભજતાનન્યભાવતઃ ॥ ૪૮॥

અન્તે સ્વાનન્દગો ભૂત્વા સસ્ત્રીકોઽજસમુદ્ભવ ।
બ્રહ્મભૂતો વ્રતસ્યાસ્ય પ્રસાદેન બભૂવ હ ॥ ૪૯॥

અન્યચ્છૃણુ ચરિત્રં તદ્વ્રતજં પુણ્યવર્ધનમ્ ।
આષાઢે વરદાયાશ્ચ ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૫૦॥

(Page  ખં. ૪ અ. ૧૭ પાન ૫૨)
બઙ્ગદેશે સમુત્પન્નો વાણિજઃ પાપકારકઃ ।
સ્વધર્મં સ પરિત્યજ્ય દૃષ્ટકર્મરતોઽભવત્ ॥ ૫૧॥

દ્યૂતમદ્યાદિકં નિત્યં હિંસયાઽસેવતાન્વિતઃ ।
બલાત્ ધૃત્વાઽભુઙ્ક્ત પરસ્ત્રિયં વશમનાગતામ્ ॥ ૫૨॥

તસ્ય કર્મ દુરાચારં જ્ઞાત્વા પિત્રા તિરસ્કૃતઃ ।
અસકૃત્તેન સ ક્ષુબ્ધો વિષં પિત્રે દદૌ ખલઃ ॥ ૫૩॥

વિષબાધાસમાયુક્તઃ સ મમાર દદાહ તમ્ ।
તતો માતરમાગમ્ય ધનં જગ્રાહ વૈ બલાત્ ॥ ૫૪॥

લોકાઃ સર્વે તતો જ્ઞાત્વા ચેષ્ટિતં દુઃખદં પરમ્ ।
તસ્ય દુષ્ટસ્ય તે તત્ર વ્યથિતાઃ સમ્બભૂવિરે ॥ ૫૫॥

જનાઃ શ્રેષ્ઠા નૃપં ગત્વાઽકથયંસ્તદ્વિશેષતઃ ।
ચેષ્ટિતં ક્ષુભિતો રાજા શ્રુત્વા તં તત્ર ચાનયત્ ॥ ૫૬॥

શૂલે નૃપ નરૈઃ પ્રોતો દુર્મતિઃ સ નૃપાજ્ઞયા ।
તદ્દિને દૈવયોગેનાષાઢી શુક્લા બભૂવ હ ॥ ૫૭॥

તત્રાઽયં જલહીનશ્ચ નિરાહારઃ સ્થિતોઽભવત્ ।
પઞ્ચમ્યાં પીડયા યુક્તો મમાર નૃપ દુષ્ટધીઃ ॥ ૫૮॥

અજ્ઞાનવ્રતપુણ્યેન સ સ્વાનન્દગતોઽભવત્ ।
મહાપાપી વ્રતસ્યૈવ પ્રભાવેણ મહીપતે ॥ ૫૯॥

સ્વાનન્દે ગણપં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ।
એવં વ્રતપ્રભાવેણ જના બ્રહ્મ પ્રલેભિરે ॥ ૬૦॥

તત્રૈવં કતિ સઙ્ખ્યાતું શક્યતે ન કદાચન ।
વર્ષાયુતૈર્મહારાજાઽખિલં કેનાઽપિ યોગિના ॥ ૬૧॥

યદિ જ્ઞાનેન સા દેવી ચતુર્થી સાધિતા ભવેત્ ।
વરદા તત્ર કિં ચિત્રં તસ્મૈ બ્રહ્મપ્રદા ભવેત્ ॥ ૬૨॥

ઇદમાષાઢગાયાશ્ચ ચતુર્થ્યાશ્ચરિતં પઠેત્ ।
શ ृણુયાદ્વરદાયાશ્ચેત્ સ લભેદીપ્સિતં ફલમ્ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે આષાઢશુક્લ ચતુર્થીચરિતવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૪.૧૭

## ૪.૧૮ શ્રાવણશુક્લચતુર્થીવ્રતકથનં નામાષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રાવણે વરદાયાશ્ચ માહાત્મ્યં વદ વિસ્તરાત્ ।
ન તૃપ્યામિ કથાં શ્રુત્વા બ્રહ્મભૂયપ્રદાં પ્રભો ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અઙ્ગદેશે પુરં શ્રીમચ્છતતારં બભૂવ હ ।
રાજા રાજ્યં ચકારાશ્વસેનસંજ્ઞોઽપિ તત્ર હિ ॥ ૨॥

ધર્મેણ નીતિયુક્તેન નાનાદાનપરાયણઃ ।
દેવવિપ્રાતિથિપ્રેપ્સુર્બભૂવાતિપરાક્રમી ॥ ૩॥

નાનાવ્રતપરો રાજા યજ્વા તેજસ્વિનાં વરઃ ।
શસ્ત્રાસ્ત્રૈઃ પૃથિવીં સર્વાં જિગ્યે બલસમન્વિતઃ ॥ ૪॥

સાર્વભૌમઃ સ વિખ્યાતસ્ત્રિલોકીકીર્તિકારકઃ ।
રાજ્ઞઃ સર્વાન્ વશે ચક્રે સેવકાન્ કરદાયિનઃ ॥ ૫॥

એવં રાજ્યં વશં કૃત્વા ભૂતલં સ ચકાર હ ।

તતોઽકસ્માજ્જ્વરસ્તસ્ય સમુત્પન્નોઽતિદાહકઃ ॥ ૬॥

જ્વરેણ પીડિતોઽત્યન્તં નિશિ નિદ્રાં ન ચાઽલભત્ ।
નાનોપાયાંશ્ચકારાઽસૌ જ્વરહીનો બભૂવ ન ॥ ૭॥

એવં વર્ષે ગતે પૂર્ણે સોઽસ્થિચર્માવશેષિતઃ ।
અત્યન્તદુઃખિતો રાજા વિલલાપ ભૃશાતુરઃ ॥ ૮॥

વિષેણ દેહપાતાર્થમુદ્યતોઽભૂન્ મહીપતિઃ ।
જગામ સહસા તત્ર દેવલો યોગિસત્તમઃ ॥ ૯॥

(Page ખં. ૪ અ. ૧૮ પાન ૫૩)
તં દૃષ્ટ્વા પ્રણનામાથ પૂજયામાસ બાન્ધવૈઃ ।
ભુક્ત્વા તૃપ્તં જગાદેદં વચનં સાધુમાર્ગવિત્ ॥ ૧૦॥

અશ્વસેન ઉવાચ ।
ધન્યં મે જન્મ કર્માઽપિ પિતા માતા વ્રતાદિકમ્ ।
અધુના સફલં દાનં યેન તે દર્શનં મુને ॥ ૧૧॥

જ્વરેણ પીડિતોઽત્યન્તં વિષપાને મહામુને ।
તત્પરોઽહં પ્રપશ્યામ્યાગતં ત્વાં યોગિસત્તમ ॥ ૧૨॥

મૃતોઽહં વિષપાનેનાત્મહત્યાં ન લભે કદા ।
તવ દર્શનમાત્રેણ મુક્તો યાસ્યામિ ધામ તત્ ॥ ૧૩॥

એવમુક્ત્વા રુરોદાઽપિ તતસ્તં દેવલો મુનિઃ ।
ઉવાચ ભાવગમ્ભીરઃ સર્વશાસ્ત્રાર્થતત્ત્વવિત્ ॥ ૧૪॥

દેવલ ઉવાચ ।
રાજ્યે નષ્ટે ત્વદીયે યચ્ચતુર્થીસંજ્ઞિતં વ્રતમ્ ।
તેન ત્વં રોગયુક્તોઽસિ મૃતો ગચ્છસિ નારકે ॥ ૧૫॥

ચતુઃપદાર્થદં પૂર્ણં સર્વાદૌ સમ્મતં પરમ્ ।
ન કૃતં ચેત્ ફલૈર્હીનં કર્મ સર્વં ભવેન્નૃપ ॥ ૧૬॥

ત્વયા યચ્ચ કૃતં કર્મ નાનાપુણ્યાત્મકં મહત્ ।
ચતુઃપદાર્થહીનં તચ્ચતુર્થીવ્રતહીનકમ્ ॥ ૧૭॥

એવમુક્ત્વા મહાયોગી ચતુર્થીવ્રતસંશ્રિતામ્ ।
કથાં સંશ્રાવયામાસ રાજા શ્રુત્વા તમબ્રવીત્ ॥ ૧૮॥

અશ્વસેન ઉવાચ ।
અહો વ્રતસ્ય માહાત્મ્યં સંશ્રુતં પરમાદ્ભુતમ્ ।
અધુના વદ માહાત્મ્યં ગણેશસ્ય મહામુને ॥ ૧૯॥

દેવલ ઉવાચ ।
ગણેશ્વરસ્ય માહાત્મ્યં મયા વક્તું ન શક્યતે ।
ઉપાધિના યુતં રાજન્ વદિષ્યામિ સ્વરૂપકમ્ ॥ ૨૦॥

અસિતાન્ મે પિતુર્વક્ત્રાચ્છ્રુતં તત્તે વદામ્યહમ્ ।
સર્વસિદ્ધિકરં પૂર્ણં બ્રહ્મયોગપ્રકાશકમ્ ॥ ૨૧॥

પુરાઽહં તપસા યુક્તોઽભવંસ્તત્ર સમાગતઃ ।
જૈગીષવ્યો મહાયોગી શૈવઃ સહજગો બભૌ ॥ ૨૨॥

મયા સુસત્કૃતો યોગી સંસ્થિતઃ પૂજિતઃ સ્તુતઃ ।
મમાશ્રમે ન કિઞ્ચિન્ માઽવદત્ સોઽપિ મહાયશાઃ ॥ ૨૩॥

તસ્ય ચિહ્નં સમાલોક્ય મનસા ધારયામ્યહમ્ ।
અકર્મકારકશ્ચ સ્મ દેહરક્ષણતત્પરઃ ॥ ૨૪॥

ધ્યાનાદિશૂન્યભાવેન તિષ્ઠતિ ભ્રષ્ટ એવ ચ ।
શાન્તિયોગેન હીનઃ સ્મ તથા યોગિસ્વરૂપધૃક્ ॥ ૨૫॥

તતોઽહં તં ગૃહે ત્યક્ત્વા ગતઃ સામુદ્રકે જલે ।
મદીયચિત્તગં જ્ઞાત્વા સ તત્રૈવ સમાયયૌ ॥ ૨૬॥

અહો કેનૈવ માર્ગેણાઽઽગતોઽયં યોગિસત્તમઃ ।
તાપસેન મયાઽઽકાશે ગચ્છતા નાવલોકિતઃ ॥ ૨૭॥

ત્યક્ત્વા તતસ્તં તત્રાહમગમં સ્વર્ગમણ્ડલમ્ ।
તત્રાપિ જૈગીષવ્યશ્ચ મયા દૃષ્ટો મહામતે ॥ ૨૮॥

એવં નાનાવિધૈર્માર્ગૈઃ સ્વર્ગેષુ ગતવાનહમ્ ।
મયા તેષુ મહાયોગી દૃષ્ટઃ સમ્પૂજિતોઽમરૈઃ ॥ ૨૯॥

તતોઽકસ્માન્ મહાયોગી સોઽન્તર્ધાનં ચકાર હ ।
તદ્ દૃષ્ટ્વા સિદ્ધસઙ્ઘાંશ્ચાપૃચ્છં તૈઃ કથિતં નૃપ ॥ ૩૦॥

બ્રહ્મલોકે ગતઃ સોઽપિ તત્ર તેન ગતિર્ભવેત્ ।
તતોઽહં ખેદસંયુક્તઃ સ્વાશ્રમં પુનરાગમમ્ ॥ ૩૧॥

તત્રાપિ ગૃહમધ્યેઽસૌ મયા દૃષ્ટો મહાયશાઃ ।
સમ્પૂજ્ય પ્રણતો ભૂત્વાઽવદં યોગપરાયણઃ ॥ ૩૨॥

તારયસ્વ મહાયોગિન્ સંસારાન્ માં કુશિષ્યકમ્ ।
છલનાયાં સમાયુક્તં દયયા ત્વં દયાનિધે ॥ ૩૩॥

જૈગીષવ્ય ઉવાચ ।
હિંસાત્મકં કુરુષ્વ ત્વં કર્મ મા યત્નધારકઃ ।
(Page ખં. ૪ અ. ૧૮ પાન ૫૪)
બ્રહ્માહમિતિ બોધેન શમી દમપરો ભવ ॥ ૩૪॥

યદાજ્ઞાવશગં સર્વં વર્તતે તં ભજસ્વ ચ ।
તેન યોગી ત્વમેવેહ ભવિષ્યસિ ન સંશયઃ ॥ ૩૫॥

જૈગીષવ્યશ્ચૈવમુક્ત્વા તત્રૈવાન્તરધીયત ।
અહં તત્ર સમાસીનો હિંસાં ત્યક્ત્વા તથાઽભવમ્ ॥ ૩૬॥

તતઃ સ્મ પિતરઃ સર્વે મહત્ કુર્વન્તિ રોદનમ્ ।
અહો કર્મ પરિત્યજ્ય દેવલો ન ઉપેક્ષતે ॥ ૩૭॥

અસ્માન્ કઃ પુષ્યતિ પ્રાજ્ઞો નિરાધારા વયં કૃતાઃ ।
દેવલેન ન સન્દેહઃ ક્ષુધાવિષ્ટાસ્તૃષા યુતાઃ ॥ ૩૮॥

તાન્ દૃષ્ટ્વા દુઃખિતોઽહં વૈ કર્મ કર્તું સમુદ્યતઃ ।
મયા દૃષ્ટા ઓષધયો મહત્ કુર્વન્તિ રોદનમ્ ॥ ૩૯॥

અસ્માનહોઽભયં દત્વા દેવલઃ ક્રૌર્યમાશ્રિતઃ ।
નિર્લજ્જઃ પુનરેવાઽસૌ છેદયિષ્યતિ દુર્મતિઃ ॥ ૪૦॥

તતોઽહં નિતરાં ખિન્નો હ્યુભયત્રૈવ સઙ્કટાત્ ।
વિચાર્ય સ્વહિતે સક્તઃ શમી દમપરોઽભવમ્ ॥ ૪૧॥

સર્વાભયસ્વભાવેન કર્મણા યોગસેવયા ।
ક્રમેણ સહજે યોગ્યઽહં બ્રહ્મણિ પરોઽભવમ્ ॥ ૪૨॥

તત્ર સ્વાધીનતાં દૃષ્ટ્વા શાન્તિહીનોઽભવં પુનઃ ।
અગમં પિતરં તત્ર યોગીન્દ્રૈર્વન્દિતં સ્તુતમ્ ॥ ૪૩॥

તત્રાઽસિતં પ્રણમ્યૈવાઽપૃચ્છં બ્રહ્મ સનાતનમ્ ।
યોગશાન્તિપ્રદં પૂર્ણં તતો માં સોઽબ્રવીદ્વચઃ ॥ ૪૪॥

અસિત ઉવાચ ।
સંયોગાદ્વિધ્દિ પુત્ર ત્વં સ્વસંવેદ્યાત્મકાત્ કિલ ।
ચતુર્વિધં સમુત્પન્નં તત્ત્યજસ્વ સમાધિદમ્ ॥ ૪૫॥

અયોગેન ચ સંયોગો દૃશ્યતે યોગિભિઃ કદા ।
સંયોગાયોગયોર્યોગો યોગશાન્તિપ્રદો મતઃ ॥ ૪૬॥

ભજસ્વ ગણરાજં ત્વં તદર્થં નિત્યમાદરાત્ ।
સદા યોગસ્વરૂપં તં શાન્તિદં યોગિનોઽબ્રુવન્ ॥ ૪૭॥

સંયોગેઽયં ગકારાખ્યો ણકારાખ્યસ્ત્વયોગકે ।
તયોર્યોગે ગણાધીશો જ્ઞાતવ્યો વિબુધૈઃ સદા ॥ ૪૮॥

એવમુક્ત્વા દદૌ મન્ત્રં મહ્યમેકાક્ષરં પરમ્ ।
ગાણપત્યઃ પ્રસન્નાત્મા પિતા મે ગણપં ભજન્ ॥ ૪૯॥

તતસ્તં પ્રણિપત્યૈવ ગતોઽહં સ્વાશ્રમે નૃપ ।
ગણેશં પૂજયામિ સ્મ ધ્યાત્વા જપપરોઽભવમ્ ॥ ૫૦॥

તતઃ સ્વલ્પેન કાલેન શાન્તિં પ્રાપ્તોઽહમેવ ચ ।
યોગિવન્દ્યોઽભવં રાજંસ્તથાપિ ગણપં ભજે ॥ ૫૧॥

ગતે વર્ષે સમાયાતો ગણેશો ભક્તવત્સલઃ ।
સ્તુતઃ સમ્પૂજિતસ્તત્ર મયા હૃષ્ટેન ચેતસા ॥ ૫૨॥

તતો માં ગાણપત્યં સ પિતૃતુલ્યં મહોદરઃ ।
કૃત્વા સ્વાનન્દકે ધામ્નિ ગતો બ્રહ્મપતિઃ પ્રભુઃ ॥ ૫૩॥

ઉક્ત્વા દશાક્ષરં મન્ત્રં દદાવેવં નૃપાય ચ ।
અન્તર્ધાય સ્વમાત્માનં દેવલઃ સ્વાશ્રમેઽગમત્ ॥ ૫૪॥

તતઃ સ રાજશાર્દૂલો ગણેશભજને રતઃ ।
તત્રાઽઽદૌ શ્રાવણી પ્રાપ્તા વરદા યા ચતુર્થિકા ॥ ૫૫॥

તાં ચકાર જનૈઃ સર્વૈઃ પુરવાસિભિરાદરાત્ ।
ઉપોષણસમાયુક્તઃ પઞ્ચમ્યાં પારણે રતઃ ॥ ૫૬॥

તતો દાહવિનિર્મુક્તો જ્વરહીનો બભૂવ હ ।
જનાઃ સર્વે ચ રોગાદ્યૈર્હીના જાતાસ્તદદ્ભુતમ્ ॥ ૫૭॥

તતસ્તેન મહીપૃષ્ઠે વિખ્યાતં તદ્વ્રતં કૃતમ્ ।

શુક્લકૃષ્ણભવં ચક્રુર્વ્રતં સર્વે ધરાતલે ॥ ૫૮॥

આરોગ્યાદિસમાયુક્તા હૃષ્ટપુષ્ટા જનાઃ બભુઃ ।
વ્રતસ્ય પુણ્યયોગેન પુત્રપૌત્રધનાન્વિતાઃ ॥ ૫૯॥

(Page ખં. ૪ અ. ૧૯ પાન ૫૫)
પુત્રે રાજ્યં પરિત્યજ્ય રાજા શાન્તિપરાયણઃ ।
સસ્ત્રીક એકાન્તે સોઽભૂદભજદ્ગણનાયકમ્ ॥ ૬૦॥

અન્તે સ્વાનન્દગો રાજા બ્રહ્મભૂતો બભૂવ હ ।
ક્રમેણ સર્વે લોકા વૈ બ્રહ્મભૂતા બભૂવિરે ॥ ૬૧॥

એવં વ્રતસ્ય માહાત્મ્યં સર્વસિદ્ધિપ્રદાયકમ્ ।
કથિતં તે મહારાજ પુનઃ શૃણુ કથાનકમ્ ॥ ૬૨॥

ગુર્જરે પાપકર્માકઃ ક્ષત્રિયો દુર્બલોઽભવત્ ।
બાલ્યાત્ પ્રારભ્ય દુષ્ટાત્મા પાપકર્મપરાયણઃ ॥ ૬૩॥

સ્ત્રીમાંસમદિરાસક્તો જનાનાં ચ પશોસ્તથા ।
વધે રતો ગુરું ચૈવ મારયામાસ મન્દધીઃ ॥ ૬૪॥

ગુરોર્દ્રવ્યં ગૃહીત્વા સ વનગશ્ચ બભૂવ હ ।
એવં નાનાવિધં પાપં ચકાર નિત્યમાદરાત્ ॥ ૬૫॥

એકદા જ્વરયુક્તઃ સ બભૂવ ક્ષત્રિયાધમઃ ।
અત્યન્તં વ્યાકુલો જાતો દેહશુદ્ધિં ન ચાસ્મરત્ ॥ ૬૬॥

દૈવયોગેન શુક્લા સા શ્રાવણે સુસમાગતા ।
ચતુર્થી તત્ર તેનૈવાન્નં જલં ભક્ષિતં ન ચ ॥ ૬૭॥

પઞ્ચમ્યાં તેન કિઞ્ચિદ્વૈ ભક્ષિતં ત્વન્નમાદરાત્ ।
રોગહીનો બભૂવાઽપિ પુનઃ પાપં સમાચરત્ ॥ ૬૮॥

કાલેન નિધનં પ્રાપ્તં તં નેતું ચ સમાગતાઃ ।
દુષ્ટં સઙ્ગૃહ્ય ગાણેશા બ્રહ્મભૂતં પ્રચક્રિરે ॥ ૬૯॥

અજ્ઞાનવ્રતજેનૈવ પુણ્યેન ક્ષત્રિયો યયૌ ।
સ્વાનન્દં કિં પુનર્જ્ઞાનિનાં કથા કા નૃપાત્મજ ॥ ૭૦॥

એવં નાના જનાદ્યાશ્ચ ચતુર્થીવ્રતપુણ્યતઃ ।
બ્રહ્મભૂતા મયા વક્તું ન શક્યાસ્તે બભૂવિરે ॥ ૭૧॥

ઇદં શ્રાવણગાયાશ્ચ વરદાયાઃ પઠેન્નરઃ ।
માહાત્મ્યં શ‍ૃણુયાચ્ચેદ્વા સ સર્વં સંલ્લભેત્ ફલમ્ ॥ ૭૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શ્રાવણશુક્લચતુર્થીવ્રતકથનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૪.૧૮

## ૪.૧૯ મલમાસશુક્લચતુર્થીચરિતવર્ણનં નામ એકોનવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
વદ બ્રહ્મન્ મલે માસે ચતુર્થી યા સમાગતા ।
વરદા ચરિતં તસ્યાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
ચતુર્થી મહિમાયુક્તં શ્રવણાત્ સર્વદં પરમ્ ॥ ૨॥

આન્ધ્રે રાજા સુષેણશ્ચ ચકાર રાજ્યમુત્તમમ્ ।
નગરે ચમ્પકે ભૂપ શસ્ત્રાસ્ત્રે પારગો મતઃ ॥ ૩॥

નીત્યા ધર્મેણ કીર્ત્યા ચ દાનેન યશ આર્જયત્ ।
દેવવિપ્રાતિથિપ્રેપ્સુર્યજ્વા વ્રતપરાયણઃ ॥ ૪॥

જિત્વા ભૂમણ્ડલં સર્વં રાજ્યં ચકાર ધર્મતઃ ।
રાજાનઃ કરદાઃ સર્વે સેવાં ચક્રુર્મહીપતેઃ ॥ ૫॥

તસ્ય રાજ્યે મહા સર્પા બભક્ષુસ્તજ્જનાન્ સદા ।
યત્ર તત્રાઽચરન્ ક્ષુબ્ધાઃ સર્પાઃ પરમદારુણાઃ ॥ ૬॥

જનૈઃ કુત્ર મહીપાલ પ્રગન્તું નૈવ શક્યતે ।
તથૈવ દુઃખિતૈઃ સ્થાતું વનેષુ ચ ગૃહેષુ ચ ॥ ૭॥

રાજા તથૈવ દુઃખાર્તો મહાભયપરાયણઃ ।
(Page ખં. ૪ અ. ૧૯ પાન ૫૬)
નાગાનાં શાન્તયે સર્વૈઃ પઞ્ચમી સાધિતાઽભવત્ ॥ ૮॥

તથા સ્મ ન શમં યાન્તિ નાગાઃ પરમદારુણાઃ ।

નાનાપુણ્યાનિ તીર્થાનિ જનાશ્ચક્રુર્વિશેષતઃ ॥ ૯॥

તથાઽધિકં યયુઃ ક્રૂરા નાગાઃ સર્વત્ર ભૂમિષુ ।
રાજેન્દ્રઃ ખગુરું તત્ર જૈમિનિં શરણં યયૌ ॥ ૧૦॥

તં પ્રણમ્ય પુરસ્તસ્ય સંસ્થિતઃ સ કૃતાઞ્જલિઃ ।
તં મુનિર્માનયામાસાઽઽસનદાનાદ્વિશેષતઃ ॥ ૧૧॥

પપ્રચ્છ વિનયેનૈવ યુક્તં કિમર્થમાગતઃ ।
સુષેણઃ સ તથોવાચ નિઃશ્વસ્ય મુનિપુઙ્ગવમ્ ॥ ૧૨॥

સુષેણ ઉવાચ ।
સ્વામિન્ સર્પા અપારાશ્ચ ધર્ષન્તશ્ચ સદા જનાન્ ।
ન સ્થાતું શક્યતે તત્ર ભયસઙ્કુલિતૈર્મુને ॥ ૧૩॥

નાનોપાયાઃ કૃતાસ્તત્ર ન શાન્તિં લેભિરે તતઃ ।
તદર્થં ત્વાં મહાભાગ પ્રષ્ટુમત્ર સમાગતઃ ॥ ૧૪॥

વદ સર્પગણાનાં ચ શાન્તયે કિં કરોમ્યહમ્ ।
વિપ્ર નો ચેત્ ત્વત્સમીપે દેહત્યાગં કરોમિ વૈ ॥ ૧૫॥

વસિષ્ઠ ઉવાચ ।
એવં પૃષ્ટો મહાતેજા જૈમિનિસ્તમુવાચ હ ।
સ્વશિષ્યં નિન્દયન્ રાજંસ્તચ્છૃણુષ્વ સમાહિતઃ ॥ ૧૬॥

જૈમિનિરુવાચ ।
ચતુર્થીજં મહાપાપિન્નષ્ટં રાજ્યે તવ વ્રતમ્ ।
તેન ત્વં ચ મૃતૈઃ સર્વૈર્નરકે પ્રપતિષ્યસિ ॥ ૧૭॥

ચતુર્ણાં પુરુષાર્થાનાં દાતૃત્વાદ્વરદા મતા ।
તથા સઙ્કટનાશિત્વાત્ સઙ્કષ્ટી સા પ્રકીર્તિતા ॥ ૧૮॥

યદિ વ્રતં ચ સર્વાદૌ ન કૃતં ચેન્નિરર્થકમ્ ।
કર્મહીનં ચતુર્ભિસ્તન્નિત્યં કાર્યા તતઃ પ્રભો ॥ ૧૯॥

એવમુક્ત્વા ચતુર્થ્યાશ્ચ માહાત્મ્યં મુનિસત્તમઃ ।
કથયામાસ તચ્છ્રુત્વા સુષેણસ્તં તથાઽબ્રવીત્ ॥ ૨૦॥

સુષેણ ઉવાચ ।
કીદૃશોઽયં ગણેશાનો વ્રતં યસ્ય મહાદ્ભુતમ્ ।

વદ તસ્ય સ્વરૂપં મે ભજિષ્યામિ મહાપ્રભુમ્ ॥ ૨૧॥

જૈમિનિરુવાચ ।
ન વક્તું શક્યતે રાજન્ કેનાપ્યેતત્ સ્વરૂપકમ્ ।
ઉપાધિના યુતં દુણ્ઢિં વદામિ શ‍ૃણુ તત્ત્વતઃ ॥ ૨૨॥

અહં પુરા સુશાન્ત્યર્થં વ્યાસં ચ શરણં ગતઃ ।
મહ્યં સઙ્કથિતં તેન સાક્ષાન્નારાયણેન ચ ॥ ૨૩॥

તદેવ ત્વાં વદિષ્યામિ સ્વશિષ્યં ચ નૃપાધમમ્ ।
યદિ તં ભજસિ હ્યદ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૪॥

દેહદેહિમયં સર્વં ગકારાક્ષરવાચકમ્ ।
ણકારવાચકં બ્રહ્મ સંયોગાયોગરૂપકમ્ ॥ ૨૫॥

તયોઃ સ્વામી ગણેશસ્તુ પશ્ય વેદે મહામતે ।
ચિત્તે નિવાસકત્વાચ્ચિન્તામણિર્વૈ સ કથ્યતે ॥ ૨૬॥

ચિત્તરૂપા સ્વયં બુદ્ધિર્ભ્રાન્તિરૂપા મહીપતે ।
સિદ્ધિસ્તત્ર તયોર્યોગે પ્રલભ્યેત તયોઃ પતિઃ ॥ ૨૭॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં ષડક્ષરમ્ ।
સુષેણાય યથાન્યાયં વિધિયુક્તં વિશેષતઃ ॥ ૨૮॥

તતસ્તેનાભ્યનુજ્ઞાતઃ સ્વપુરં સ જગામ હ ।
તત્રાઽઽદૌ મલમાસશ્ચ સમ્પ્રાપ્તસ્તેન ભૂમિપ ॥ ૨૯॥

મલમાસે ગણેશસ્ય વરદાખ્યં સમાગતમ્ ।
સોઽપિ શુક્લે ચતુર્થીજં વ્રતં ચક્રે સુભક્તિતઃ ॥ ૩૦॥

નાગરૈર્વિવિધૈર્લોકૈઃ સમીપગ્રામસંસ્થિતૈઃ ।
તત્કૃતં વિધિના રાજન્ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩૧॥

તતસ્તેન સુષેણેન પ્રશસ્તં ભૂમિમણ્ડલે ।
કૃતં તતો જનાઃ સર્વે ચક્રુર્હર્ષસમન્વિતાઃ ॥ ૩૨॥

અભવન્ વ્રતપુણ્યેન સર્પા અન્તર્હિતા બભુઃ ।
લોકા રોગાદિભિઃ સર્વે વર્જિતા હર્ષસંયુતાઃ ॥ ૩૩॥

(Page ખં. ૪ અ. ૨૦ પાન ૫૭)
પુત્રપૌત્રાદિસંયુક્તા ધનધાન્યસમન્વિતાઃ ।

નાનાસુખેષુ સંસક્તા અભવંસ્તત્ર તે તતઃ ॥ ૩૪॥

રાજા ગણપતિં નિત્યમભજન્નાન્યચેતસા ।
ષડક્ષરેણ મન્ત્રેણ વિધિયુક્તેન પૂજયન્ ॥ ૩૫॥

પુત્રે રાજ્યં વિનિક્ષિપ્ય સસ્ત્રીકઃ સ વનં યયૌ ।
તત્ર વિઘ્નેશમેવં સોઽપૂજયજ્જપતત્પરઃ ॥ ૩૬॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ।
જનાઃ સર્વે વ્રતે સંસ્થાઃ શુક્લકૃષ્ણભવે પરે ॥ ૩૭॥

સ્વાન્તે ક્રમેણ તે સર્વે બ્રહ્મભૂતા બભૂવિરે ।
વ્રતસ્યૈવ પ્રભાવેણ ન કિઞ્ચિદ્ દુર્લભં ભવેત્ ॥ ૩૮॥

અન્યચ્છૃણુ મહીપાલ ચરિતં મલમાસગમ્ ।
પુણ્યં શુક્લચતુર્થીજં શ્રવણાત્ સર્વદં ભવેત્ ॥ ૩૯॥

હસ્તિનાપુરવાસી ચ ક્ષત્રિયઃ કઃ સુદારુણઃ ।
બાલ્યાત્ પ્રભૃતિ વૈ સોઽપિ પાપાચારો બભૂવ હ ॥ ૪૦॥

દ્રવ્યલોભાર્થમેવં સ્વજનકં સ જઘાન હ ।
પરસ્ત્રીલાલસઃ પૂર્ણશ્ચૌરકર્મપરોઽભવત્ ॥ ૪૧॥

એવં નાનાવિધં પાપં ચક્રેઽસૌ દુર્મતિઃ સદા ।
વને સ્થિતઃ કદાચિદ્વૈ જનાન્ જઘ્ને મહાખલઃ ॥ ૪૨॥

એતસ્મિન્નન્તરે તત્ર સર્પેણૈવ મહીપતે ।
દષ્ટઃ સોઽપિ ભયોદ્વિગ્નો ગૃહે ગન્તું મનો દધે ॥ ૪૩॥

તતો વિષેણ સંવ્યાપ્તો દેહસ્તેન પપાત હ ।
દૈવયોગેન તત્રાઽસૌ જલાન્નરહિતોઽભવત્ ॥ ૪૪॥

શુક્લપક્ષે મલે માસે ચતુર્થી સા તિથિસ્તદા ।
તેન પ્રાપ્તા તત્ર ભૂપ અજ્ઞાનેન વ્રતં કૃતમ્ ॥ ૪૫॥

પઞ્ચમ્યાં સ મૃતસ્તત્ર વને ઘોરે મહાખલઃ ।
સ્વાનન્દે ગણપં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૪૬॥

નાના જના વ્રતેનૈવ બ્રહ્મભૂતા બભૂવિરે ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે વક્તું ન શક્યતે ॥ ૪૭॥

ઇદં ચતુર્થીમાહાત્મ્યં મલમાસે શ‍ૃણોતિ ચેત્ ।
શુક્લપક્ષે લભેત્ સોઽપિ પઠેદ્વા સર્વમઞ્જસા ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે મલમાસશુક્લચતુર્થીચરિતવર્ણનં નામ એકોનવિંશોઽધ્યાયઃ ॥ ૪.૧૯

## ૪.૨૦ માઘકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
સંશ્રુત્ય વરદાયા વૈ માહાત્મ્યં સર્વદં પરમ્ ।
અત્યન્તં કૃતકૃત્યોઽહં જાતો નાસ્ત્યત્ર સંશયઃ ॥ ૧॥

નાનેન સદૃશં કિઞ્ચિદ્વ્રતં સર્વાર્થદં પરમ્ ।
ધન્યાસ્તે પુરુષા વિપ્ર ચતુર્થીવ્રતકારકાઃ ॥ ૨॥

અધુના સઙ્કટાયાશ્ચ માહાત્મ્યં વદ વિસ્તરાત્ ।
ન તૃપ્યામિ સુધારૂપાં કથાં શ્રુત્વા સમાસતઃ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી વસિષ્ઠસ્તમુવાચ હ ।
તચ્છૃણુષ્વ પ્રજાનાથ શ્રવણાનન્દદાયકમ્ ॥ ૪॥

વસિષ્ઠ ઉવાચ ।
તવ ભાવં વિદિત્વાઽહં સન્તુષ્ટો નૃપસત્તમ ।
પુણ્યવાનસિ યેન ત્વં ગણેશે ભક્તિમાનસિ ॥ ૫॥

ન હ્યલ્પપુણ્યયોગેન ગણેશસ્ય મહાત્મનઃ ।
કથાયાં જાયતે પ્રીતિર્ધન્યોઽસ્યત્ર ન સંશયઃ ॥ ૬॥

કથાં શ‍ૃણુ મહાભાગ ચતુર્થીસંશ્રિતાં પરામ્ ।
કૃષ્ણપક્ષે મહાપુણ્યાં સર્વસિદ્ધિપ્રદાયિનીમ્ ॥ ૭॥

(Page ખં. ૪ અ. ૨૦ પાન ૫૮)
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
મહાપુણ્યપ્રદઃ પૂર્ણશ્રવણાત્ પઠનાદ્ભવેત્ ॥ ૮॥

સહસ્રાખ્યે પુરે રાજન્ શૂરસેનો મહીપતિઃ ।

સભાયાં ગાનસંયુક્તો બભૂવે ભૂપસેવિતઃ ॥ ૯॥

તત્રાઽકસ્માદ્વિમાનં વૈ પતિતં જ્વલનપ્રભમ્ ।
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં જ્ઞાતું દૂતાનચોદયત્ ॥ ૧૦॥

દૂતૈઃ સંજ્ઞાપિતો રાજા વિમાનં દ્રષ્ટુમુત્સુકઃ ।
સ યયૌ નગરપ્રાન્તે પુરવાસિભિરાવૃતઃ ॥ ૧૧॥

તત્રેન્દ્રં દેવયુક્તં સ દૃષ્ટ્વા વિસ્મિતમાનસઃ ।
પ્રણનામ પદા ગત્વા દણ્ડવત્ પૃથિવીતલે ॥ ૧૨॥

પુનરુત્થાય રાજાઽસૌ કૃત્વા કરપુટં શનૈઃ ।
હર્ષયુક્ત ઉવાચેદં વચનં ભક્તિસંયુતઃ ॥ ૧૩॥

શૂરસેન ઉવાચ ।
ધન્યં જન્મ વયો દાનં પિતરૌ નગરાદિકમ્ ।
કૃતકૃત્યોઽસ્મિ દેવેન્દ્ર દર્શનાત્તે સહાનુગઃ ॥ ૧૪॥

વદ કુત્ર વિભો ગન્તું કુતો વ્રજસિ વા સ્થલાત્ ।
લાલસસ્તે વિમાનં ચ કથં નિપતિતં ભુવિ ॥ ૧૫॥

ન જાને કેન પુણ્યેન સર્વેષાં દર્શનં ચ તે ।
જાતં દેવસમૂહેન વદાજ્ઞાં કિં કરોમ્યહમ્ ॥ ૧૬॥

વિમાનચલને યત્નં કુરુ ત્વં દેવનાયક ।
કેન પાપેન તે યાનં પતિતં તદ્વદસ્વ મે ॥ ૧૭॥

એવં પૃષ્ટો મહાતેજા મહેન્દ્રસ્તમુવાચ હ ।
વિનીતં ભક્તિસંયુક્તં રાજેન્દ્ર હર્ષસંયુતઃ ॥ ૧૮॥

ઇન્દ્ર ઉવાચ ।
કૈવર્તકો મહાપાપી નામા વિઘ્નેશમાભજત્ ।
મુદ્ગલેનોપદિષ્ટશ્ચ નામમન્ત્રપરાયણઃ ॥ ૧૯॥

સહસ્રે તદ્વરેણાઽસૌ વર્ષેષુ બ્રાહ્મણોત્તમઃ ।
ભ્રૂમધ્યાન્નિઃસૃતા શુણ્ડા ભૃશુણ્ડી ચાઽભવન્ મુનિઃ ॥ ૨૦॥

તસ્ય દર્શનમાત્રેણ પુનર્જન્મ ન વિદ્યતે ।
દર્શનાર્થં ગતોઽહં તુ સમ્પૂજ્યેહ સમાગમમ્ ॥ ૨૧॥

અત્રાપિ પાપરૂપસ્ય દૃશા વૈશ્યસ્ય કુષ્ઠિનઃ ।

વિમાનં પતિતં ભૂમૌ તવ દૂતસ્ય માનદ ॥ ૨૨॥

યદિ સઙ્કષ્ટિકા રાજંશ્ચતુર્થી કૃષ્ણપક્ષગા ।
સાધિતા વ્રત ભાવન તસ્યાઃ પુણ્યં પ્રદીયતામ્ ॥ ૨૩॥

તદા વિમાનમેવેદં ચલેદત્ર ન સંશયઃ ।
નાન્યથા પુરુષાર્થૈશ્ચ વિમાનચલનં ભવેત્ ॥ ૨૪॥

એતસ્મિન્નન્તરે તત્ર વિમાનં ચ દ્વિતીયકમ્ ।
સમાગતં ગણેશસ્ય દૂતયુક્તં મહાદ્ભતમ્ ॥ ૨૫॥

તત્રૈવ નગરે ભૂપ ચાણ્ડાલી પાપકારિણી ।
અન્ધા કુષ્ઠયુતાઽત્યન્તં કૃમિભારસમાકુલા ॥ ૨૬॥

પૂયશોણિતદિગ્ધાઙ્ગા દુર્ગંધેન સમાવૃતા ।
બભૂવ ભિક્ષયા સા વૈરતા જઠરપોષણે ॥ ૨૭॥

પૌષકૃષ્ણતૃતીયાયાં નિશા કિઞ્ચાવશેષિતા ।
મદ્યપાનં તયા તત્ર કૃતં સુષ્વાપ નિર્ભયા ॥ ૨૮॥

મદ્યપાનબલેનૈવ નિદ્રાં લેભે તથાંઽત્યજા ।
ચતુર્થ્યામુદિતે ચન્દ્રે જાતે જાગરિતાઽભવત્ ॥ ૨૯॥

તતોઽપિ ક્ષુધયાઽઽવિષ્ટા રાત્રી ભિક્ષાર્થમેવ ચ ।
બભ્રામ તત્ર કેનાઽપિ દત્તાન્નં બુભુજે ચ સા ॥ ૩૦॥

પઞ્ચમ્યાં સા મૃતા તત્ર નૃપ સઙ્ગૃહ્ય ગાણપાઃ ।
વિમાનેન યયુસ્તે વૈ સ્વાનન્દે વ્રતકારિણીમ્ ॥ ૩૧॥

ગચ્છન્તી વાયુના સ્પૃષ્ટા વિમાનેન્ત્યજજા નૃપ ।
સ વાયુઃ સહસા ગત્યા સ્પૃશદિન્દ્રવિમાનકમ્ ॥ ૩૨॥

વ્રતકારિશરીરસ્ય સ્પૃષ્ટો વાયુઃ સુપુણ્યવાન્ ।
વિમાનં ચાલયામાસ દેવેન્દ્રસ્ય મહાદ્ભુતમ્ ॥ ૩૩॥

(Page ખં. ૪ અ. ૨૦ પાન ૫૯)
તદ્ દૃષ્ટ્વા વિસ્મિતાઃ સર્વે દેવા મુનિગણાદયઃ ।
જ્ઞાનદૃષ્ટયા ચ તજ્જ્ઞાત્વા શશંસૂ રાજસત્તમમ્ ॥ ૩૪॥

ઇન્દ્રે સ્વર્ગં ગતે દેવૈ રાજા સ્વનગરં યયૌ ।
વિસ્મિતસ્તં પ્રણમ્યૈવ વસિષ્ઠં માં સમાનયત્ ॥ ૩૫॥

મયા વિધિયુતં તસ્યોપદિષ્ટં મુખ્યકં વ્રતમ્ ।
ચકાર સ યથાન્યાયમઙ્ગારકયુતં પુરા ॥ ૩૬॥

માઘે કૃષ્ણચતુર્થ્યાં સ કૃત્વા વ્રતમનુત્તમમ્ ।
પુનઃ સમ્પૂજ્ય પઞ્ચમ્યાં ગણેશં સંસ્થિતોઽભવત્ ॥ ૩૭॥

એતસ્મિન્નન્તરે તત્ર વિમાનં સહસાઽઽગતમ્ ।
ગણેશદૂતસંયુક્તં શૂરસેનપુરે મહત્ ॥ ૩૮॥

વિમાનાદ્વ્રણ નાથસ્ય દૂતા ઉત્તીર્ય તં નૃપમ્ ।
જગુર્વ્રતપ્રભાવેણ ચલ રાજન્ ગણેશ્વરમ્ ॥ ૩૯॥

દૂતાનાં વચનં શ્રુત્વા રાજા વિસ્મિતમાનસઃ ।
પ્રણિપત્ય પ્રપૂજ્યૈવ તાનુવાચ સુહર્ષિતઃ ॥ ૪૦॥

શૂરસેન ઉવાચ ।
આરભ્ય જન્મતો દેવા અદ્યાવધિ મયા હઠાત્ ।
યત્કિચિન્નાગરૈઃ સાર્ધં સદા ભુક્તં શુભાશુભમ્ ॥ ૪૧॥

અધુના તાન્ પરિત્યજ્ય કથં યામિ ગજાનનમ્ ।
તતસ્તં ગણરાજસ્ય દૂતા ઊચુઃ શ ૃણુષ્વ તત્ ॥ ૪૨॥

ગાણપત્યા ઊચુઃ ।
નાગરૈઃ સહ રાજેન્દ્ર ચલ ત્વં વિઘ્નનાયકમ્ ।
યથાવિધિ વ્રતસ્યૈવ પ્રભાવેણ મહામતે ॥ ૪૩॥

યથાશાસ્ત્રં વ્રતસ્યાસ્ય મહિમા કેન ગમ્યતે ।
અતો વિશ્વસ્ય ચોદ્ધારે સમર્થસ્તુ સુપુણ્યતઃ ॥ ૪૪॥

તતોઽતિહર્ષિતો રાજા ચતુર્વર્ણજનૈઃ સહ ।
નગરસ્થૈર્વિમાનં સ સમારુહ્ય સ્થિતોઽભવત્ ॥ ૪૫॥

તતો ગાણેશકૈસ્તત્ર વિમાનં ચાલિતં નૃપ ।
ન ચચાલ જડીભૂતં ધ્યાનયુક્તા બભૂવિરે ॥ ૪૬॥

જ્ઞાત્વા તં કુષ્ઠિનં ત્યક્તું ગાણેશાશ્ચ સમાગતાઃ ।
તાન્ પ્રણમ્ય જગાદાઽસૌ રાજેન્દ્રો રોદનાકુલઃ ॥ ૪૭॥

મહાપાપી ચ વૈશ્યોઽયં યસ્ય દૃષ્ટયા પપાત હ ।

વિમાનં સુરનાથસ્ય તથાપિ શ‍ृણુત પ્રિયાઃ ॥ ૪૮॥

કિમનેન કૃતં પાપં માં તતો વદત હ્યહમ્ ।
પ્રાયશ્ચિત્તં કરિષ્યામ્યનેન ગચ્છામિ સંયુતઃ ॥ ૪૯॥

તતસ્તં ગણનાથસ્ય દૂતા ઊચુઃ પ્રહર્ષિતાઃ ।
શ‍ृણુ રાજન્નયં વૈશ્યઃ પૂર્વજન્મનિ વાડવઃ ॥ ૫૦॥

બુધનામા મહાપાપી બાલ્યાત્ પ્રારભ્ય સર્વદા ।
માતા પતિવ્રતા ચાસ્ય શાકિની પરિકીર્તિતા ॥ ૫૧॥

દૂર્વો નામ પિતા ચાસ્ય તપસ્વી વેદપારગઃ ।
પત્ની પતિવ્રતા પ્રોક્તા સાવિત્રી કુલજાઽભવત્ ॥ ૫૨॥

યૌવનસ્થઃ સ્ત્રિયં ત્યક્ત્વા પરસ્ત્રીલાલસોઽભવત્ ।
કદાચિદ્ગૌડપુર્યાં કા વેશ્યા રૂપવતી યયૌ ॥ ૨૩॥

તાં દૃષ્ટ્વા વિસ્મિતોઽત્યન્તં તયા રેમે નિરન્તરમ્ ।
હૃત્વા ગૃહસ્થં દ્રવ્યં સ દદૌ તસ્યૈ વિશેષતઃ ॥ ૫૪॥

પાત્રભૂષણ કાયં વૈ હૃત્વા પરગૃહસ્થિતમ્ ।
ચૌર્યમદ્યાદિસંયુક્તસ્તયા રેમે સુદુર્મતિઃ ॥ ૫૫॥

કદાચિત્ સ નિશાયાં વૈ નાગતઃ સ્વગૃહે નૃપ ।
તદર્થં મુનિમુખ્યોઽસૌ દૂર્વો બભ્રામ તત્પુરે ॥ ૫૬॥

જનાઃ કેઽપિ ન વિપ્રં ત્વકથયસ્તં વિશેષતઃ ।
પુત્રસ્ય દુર્વિનીતસ્ય ચરિત્રં ક્રોધભીતિતઃ ॥ ૫૭॥

ગૃહે ગૃહે સ્વપુત્રં સ નાલભચ્ચ તતો યયૌ ।
નિશીથે સ્વગૃહે પ્રાપ્તે પપ્રચ્છ વનિતાં દ્વિજઃ ॥ ૫૮॥

(Page ખં. ૪ અ. ૨૦ પાન ૬૦)
સોવાચ નાગતઃ સ્વામિન્ પુત્રો મે સ્વગૃહે પ્રભો ।
એકપુત્રલેહવશાત્ પુનસ્તં સો ગવેષયત્ ॥ ૫૯॥

નિશીથે નિદ્રિત લોકે જનાન્ પપ્રચ્છ માર્ગગાન્ ।
વુધઃ કુત્ર પ્રદૃષ્ટો મામેકં વદત પુત્રકમ્ ॥ ૬૦॥

એવં નાના જનાસ્તેન પૃષ્ટાસ્તેન જગુઃ સુતમ્ ।
તતો ભીમોઽત્યજો વૃદ્ધો મિલિતસ્તં જગાદ સઃ ॥ ૬૧॥

તેનૈવ કથિતં સ્પષ્ટં પુત્રો વેશ્યાગૃહે સ્થિતઃ ।
મદ્યપઃ કિં પૃચ્છસિ ત્વં તપસ્વિન્ જાતિદૂષણમ્ ॥ ૬૨॥

તસ્ય તદ્વચનં શ્રુત્વા વિસ્મિતો મુનિપુઙ્ગવઃ ।
વેશ્યાગૃહે સ્વપુત્રં તં દૃષ્ટ્વોવાચ મદાન્વિતમ્ ॥ ૬૩॥

કિં ત્વં મદ્યપ વેશ્યાયા ગૃહે તિષ્ઠસિ દૂષક ।
અધુના દેહમુત્સૃજ્ય વ્રજસ્વ યમમન્દિરે ॥ ૬૪॥

પુન્નામનરકાત્ ત્રાતા પુત્રસ્તેન પ્રકીર્તિતઃ ।
નરકપ્રદ એવં મે કિમર્થં પુત્ર આગતઃ ॥ ૬૫॥

એવં પિતુર્વચઃ શ્રુત્વા બુધઃ ક્રોધસમન્વિતઃ ।
લત્તયા તાડયામાસ પિતરં ચ પુનઃ પુનઃ ॥ ૬૬॥

વૃદ્ધઃ ક્ષુધાતુરઃ સોઽપિ મર્મસ્થાને પ્રહારતઃ ।
મમાર તં પ્રગૃહ્યાઽસૌ બુધશ્ચિક્ષેપ વૈ બહિઃ ॥ ૬૭॥

પ્રભાતે સ્વગૃહે પુત્રમાગતં સા બુધં તતઃ ।
જનની લેહસંયુક્તા પપ્રચ્છ ક સ્થિતં ત્વયા ॥ ૬૮॥

ગવેષિતું ચ તે પુત્ર પિતા ત્વાં પ્રજગામ હ ।
તમાનય મહાભાગ તતઃ સ્નાનં સમાચર ॥ ૬૯॥

માતુર્વચનમેવં સ બુધઃ શ્રુત્વા પુનઃ પુનઃ ।
ક્રોધયુક્તઃ સ્વયષ્ટ્યા તાં તાડયામાસ મસ્તકે ॥ ૭૦॥

મસ્તકઃ સ્ફુટિતસ્તસ્યાઃ સા મમાર તપસ્વિની ।
બહિઃ પ્રક્ષિપ્ય તાં વેશ્યાગૃહમાગાત્ સ હર્ષિતઃ ॥ ૭૧॥

અદહંસ્તૌ જનાઃ સન્તો બ્રાહ્મણી બ્રાહ્મણં તથા ।
પિતૃગૌરવભાવેન રાજા તં ન શશાસ હ ॥ ૭૨॥

પુનર્ગૃહાગતં સા તં સાવિત્રી દુઃખસંયુતા ।
ઉવાચ કિં કૃતં સ્વામિન્ પિતુર્માતુર્વધાત્મકમ્ ॥ ૭૩॥

વેશ્યાં ત્વં માં પરિત્યજ્ય કિમર્થં ગચ્છસિ પ્રભો ।
સર્વાવયવસમ્પૂર્ણા સુન્દરી ધર્મપાલિનીમ્ ॥ ૭૪॥

ચતુરા કરજેષ્વેવ નરદેહઃ સુદુર્લભઃ ।

જ્ઞાનકર્માદિસંયુક્તસ્તત્ર બ્રાહ્મણ્યકં કુતઃ ॥ ૭૨॥

બ્રાહ્મણત્વં સમાસાદ્ય પાપમિચ્છતિ દુર્મતિઃ ।
નિધિં ત્યક્ત્વા સ્વહસ્તસ્થં વિષ્ઠાભક્ષણલાલસઃ ॥ ૭૬॥

તથા કૃતં ત્વયા નાથ તેનાઽહં દુઃખિતા ભૃશમ્ ।
કાં ગતિં ચ ત્વયા સાર્ધં ગમિષ્યામિ મહામતે ॥ ૭૭॥

એવમાકર્ણ્ય દુષ્ટાત્મા તાં જઘાન સ્વયષ્ટિતઃ ।
કાષ્ઠૈઃ સા મર્મભેદેન મમાર સ્વર્ગગાઽભવત્ ॥ ૭૮॥

એવં સ્વલ્પે ગતે કાલે બુધોઽગાત્ સ્વગુરોર્ગૃહે ।
અયભદ્ગુરુપત્નીમેકાકિની તાં સુદુર્મતિઃ ॥ ૭૯॥

દારુણાનિ ચ પાપાનિ એવં નાનાવિધાનિ સઃ ।
ચકારાન્તે ગૃહે યામ્યે યાતનાં બુભુજે તતઃ ॥ ૮૦॥

ભુક્તભોગઃ સ વૈશ્યોઽયં જાતઃ કુષ્ઠસમન્વિતઃ ।
પાપાચરણમત્રાપિ કુરુતે દારુણં મહત્ ॥ ૮૧॥

દ્રવ્યલોભાર્થમેવાયં વને ગત્વા દ્વિજાદિકાન્ ।
હન્તિ નિત્યં સતીનાં ચ સ વને દૂષકોઽભવત્ ॥ ૮૨॥

શૂરસેન અતસ્ત્યક્ત્વૈનં યાહિ ત્વં ગજાનનમ્ ।
અસ્ય સ્પર્શન રાજેન્દ્ર સચૈલં સ્નાનમાપતેત્ ॥ ૮૩॥

દૂતાનાં વચનં શ્રુત્વા કમ્પિતો રાજસત્તમઃ ।
(Page ખં. ૪ અ. ૨૧ પાન ૬૧)
જગાદ તાન્ પ્રણમ્યૈવ હા હા કૃત્વા સુદારુણમ્ ॥ ૮૪॥

શૂરસેન ઉવાચ ।
પાપાનાં ગણના નાસ્તિ પ્રાયશ્ચિત્તં ન વિદ્યતે ।
અધુના તાદૃશં ચાત્ર મયા કિં ક્રિયતે ગણાઃ ॥ ૮૫॥

કૃપયા સર્વપાપાનાં પ્રાયશ્ચિત્તં મહાદ્ભુતમ્ ।
કથ્યતાં તત્ કરિષ્યામિ દેહપાતાવધિં કિલ ॥ ૮૬॥

તતસ્તં ગાણપત્યાસ્તેઽબ્રુવન્ હર્ષસમન્વિતાઃ ।
ગજાનન ઇતિ પ્રાજ્ઞ શ્રાવયસ્વ જનાધમમ્ ॥ ૮૭॥

ચતુર્વેદસમુદ્ભૂતં સારં બ્રહ્મમુખોદ્ગતમ્ ।

ચતુર્મુખૈશ્ચ સઙ્ગીતં સુયોગન ગજાનનમ્ ॥ ૮૮॥

તેષાં વચનમાકર્ણ્ય શૂરસેનઃ પ્રહર્ષિતઃ ।
ગજાનનેતિ વૈશ્યસ્યાઽજપત્ કર્ણે સ સાદરઃ ॥ ૮૯॥

શ્રુત્વા પાપવિનિર્મુક્તો વૈશ્યઃ સ્વર્ણતનુર્યથા ।
કુષ્ઠહીનઃ સ શોભાભિયુક્તો વૈ હર્ષિતોઽભવત્ ॥ ૯૦॥

તતઃ સર્વૈઃ સમાયુક્તો નગરસ્થૈવિશેષતઃ ।
ચતુરાકરજૈ રાજા યયૌ વિઘ્નેશ માદરાત્ ॥ ૯૧॥

સ્વાનન્દે ગણપં દૃષ્ટ્વા બ્રહ્મભૂતાશ્ચ જન્તવઃ ।
બભૂવુઃ સ યથા રાજા ગાણપત્યો બભૂવ હ ॥ ૯૨॥

બ્રહ્મભૂતઃ સ રાજેન્દ્રો વ્રતપુણ્યપ્રભાવતઃ ।
જન્તુભિઃ સહિતશ્ચાતઃ કોઽઓ વર્ણયિતું વ્રતમ્ ॥ ૯૩॥

ચતુર્વિધં જગત્ સર્વ સઙ્કુષ્ટં સમ્મતં નૃપ ।
તત્ત્યક્ત્વા વ્રતપુણ્યેન બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૯૪॥

ઇદં માઘચતુર્થ્યાસ્તુ સઙ્કુષ્ટયાઃ સંશ◌ૃણોતિ યઃ ।
માહાત્મ્યં વાપિ પઠતિ સર્વાર્થં લભતે પરમ્ ॥ ૯૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે માઘકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૪.૨૦

## ૪.૨૧ ફાલ્ગુનકૃષ્ણચતુર્થીવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
બ્રહ્મન્ શ્રુત્વા ચ વૈ માઘી સઙ્કુષ્ટીજં સુવિસ્મિતઃ ।
માહાત્મ્યં સર્વદં પુણ્યં સર્વસઙ્કુટહારકમ્ ॥ ૧॥

ફાલ્ગુને કૃષ્ણપક્ષે યા ચતુર્થી સઙ્કુટી મતા ।
તસ્યાશ્ચરિત્રમેવં મે કથયસ્વ કૃપાનિધે ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
પૌલસ્ત્યો રાવણઃ પ્રોક્તસ્તપસ્તપ્ત્વા સુદારુણમ્ ।
વરં લબ્ધ્વા ત્રિલોકસ્ય રાજ્યં ચક્રે મહાબલઃ ॥ ૩॥

પ્રધાનેષુ સમાક્ષિપ્ય રાજ્યં રાક્ષસસત્તમઃ ।
એકાન્તે નિર્જને ગત્વા ધ્યાનસંસ્થો બભૂવ હ ॥ ૪॥

વેદોપનિષદિ પ્રોક્તં બ્રહ્મ વેદાન્તપારગમ્ ।
ધ્યાયતિ સ્મ વિચારજ્ઞો જ્ઞાનયોગપરાયણઃ ॥ ૫॥

એવં બહૌ ગતે કાલે ન લેભે જ્ઞાનમુત્તમમ્ ।
તદા ખેદસમાયુક્તઃ સોઽતિષ્ઠચ્છઙ્કરં સ્મરન્ ॥ ૬॥

તતઃ શિવેન તત્રૈવ પ્રેષિતો નારદો મુનિઃ ।
તં દૃષ્ટ્વા નારદં રક્ષઃ પ્રણનામ કૃતાંઽજલિઃ ॥ ૭॥

પપ્રચ્છ ખેદસંયુક્તો નારદં યોગિનાં વરમ્ ।
સ્વામિન્ જ્ઞાનપ્રદં કિઞ્ચિદ્વદસ્વ કરુણાયુતઃ ॥ ૮॥

જ્ઞાનાર્થં ધ્યાનનિષ્ઠોઽહં નિત્યં તિષ્ઠામિ ચાદરાત્ ।
ન લેભે તન્ મહત્ જ્ઞાનં કિં કરોમિ મહામુને ॥ ૯॥

(Page ખં. ૪ અ. ૨૧ પાન ૬૨)
નારદ ઉવાચ ।
શિવેન પ્રેષિતોઽહં વૈ ત્વદર્થં રાક્ષસોત્તમ ।
શ્ૃણુ જ્ઞાનપ્રદં પૂર્ણં વાક્યં તત્કુરુ સાદરઃ ॥ ૧૦॥

ચતુર્વિધં જગદ્બ્રહ્મ સઙ્કષ્ટં સમ્મતં બુધૈઃ ।
તન્નાશાર્થં વ્રતં મુખ્યં સઙ્કષ્ટીસંજ્ઞકં કુરુ ॥ ૧૧॥

એવમુક્ત્વા ચતુર્થ્યાઃ સ માહાત્મ્યં નારદોઽબ્રવીત્ ।
તચ્છ્રુત્વા રાવણસ્તં ચાબ્રવીદ્ધર્ષસમન્વિતઃ ॥ ૧૨॥

રાવણ ઉવાચ ।
કીદૃશોઽયં ગણાધીશસ્તસ્ય જ્ઞાનં વદ પ્રભો ।
યસ્ય વ્રતં ચતુર્ણાં ચ પદાર્થાનાં પ્રદાયકમ્ ॥ ૧૩॥

ન કૃતં ચેચ્ચતુર્ણાં તન્નાશકં નાઽત્ર સંશયઃ ।
સર્વાદૌ સમ્મતં વિપ્ર સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૪॥

એવં પૃષ્ટો મહાયોગી નારદસ્તમુવાચ હ ।
હર્ષેણ મહતા યુક્તો રાવણં લોકરાવણમ્ ॥ ૧૫॥

નારદ ઉવાચ ।

મહજ્જ્ઞાનં કથયિતું ગણેશસ્ય ન શક્યતે ।
ઉપાધિના વદિષ્યામિ રાક્ષસાધિપ તચ્છૃણુ ॥ ૧૬॥

ગણઃ સમૂહરૂપશ્ચ સમૂહા બ્રહ્મવાચકાઃ ।
બાહ્યાન્તરાદિયોગેઽયં સમૂહો જાયતે યતઃ ॥ ૧૭॥

દેહિદેહમયં બ્રહ્મ ગકારાક્ષરવાચકમ્ ।
સંયોગાયોગરૂપં યણકારાક્ષરગં મતમ્ ॥ ૧૮॥

તયોર્યોગે ગણેશશ્ચ સ્વામી સર્વત્ર સમ્મતઃ ।
તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૧૯॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં દશાક્ષરમ્ ।
રાવણાય મહાયોગી વિધિયુક્તં તમબ્રવીત્ ॥ ૨૦॥

યદિ ત્યજસિ દૈત્યેન્દ્ર તદા ભ્રંશમવાપ્સ્યસિ ।
અતો ગણેશમન્ત્રો ન ત્યાજ્યો રક્ષઃ કદાચન ॥ ૨૧॥

એવમુક્ત્વા મહાતેજા નારદોંઽતર્દધે સ્વયમ્ ।
રાવણસ્ય તદા પ્રાપ્તા સઙ્કષ્ટી ફાલ્ગુની નૃપ ॥ ૨૨॥

સા કૃતા તેન હર્ષેણ વિધિયુક્તેન કર્મણા ।
વ્રતપુણ્યપ્રભાવેણ સ્ફૂર્તિઃ પ્રાપ્તા ચ તત્ક્ષણાત્ ॥ ૨૩॥

ચકાર સ તતઃ શુક્લાં કૃષ્ણાં વૈ રાક્ષસાધિપઃ ।
જનાન્ વિશેષેણાબોધ્ય સહ તૈર્ગણપે રતઃ ॥ ૨૪॥

તતો જ્ઞાનં સમાલબ્ધં રાવણેન મહાત્મના ।
યયૌ સ્વનગરે દૈત્યૈ રાજ્યં ચક્રે મદાન્વિતઃ ॥ ૨૫॥

દુષ્ટસઙ્ગતિયોગેન ક્રમેણ જ્ઞાનમુત્તમમ્ ।
નષ્ટં તસ્ય સુદુષ્ટસ્ય સ્ત્રીમાંસાદિપરોઽભવત્ ॥ ૨૬॥

અહં ગણેશરૂપશ્ચ નાઽન્યો જગતિ વર્તતે ।
ન પાપપુણ્યભોક્તૃત્વં કસ્ય પૂજનમાચરે ॥ ૨૭॥

તતો જ્ઞાનમદેનૈવ ત્યક્તો મન્ત્રઃ સુખપ્રદઃ ।
વ્રતં ત્યક્તમિદં પુણ્યં પૂજા ત્યક્તા વિશેષતઃ ॥ ૨૮॥

નષ્ટં જ્ઞાનં સ્થિતિર્નષ્ટા રાક્ષસો રાક્ષસોઽભવત્ ।
ધર્મલોપે રતોઽત્યન્તં ચકાર કર્મખણ્ડનમ્ ॥ ૨૯॥

તેનૈવ દોષયુક્તોઽભૂદ્ધતો રામેણ તત્ક્ષણાત્ ।
રાક્ષસૈઃ સ્વજનૈઃ સાર્ધં તવ પુત્રેણ ધીમતા ॥ ૩૦॥

દશરથ ઉવાચ ।
અહં વન્ધ્યશ્ચ વિપ્રેશ રાવણશ્ચ પ્રવર્તતે ।
કિમિદં ભાષસે સ્વામિન્ કૂટરૂપં ભ્રમપ્રદમ્ ॥ ૩૧॥

વસિષ્ઠ ઉવાચ ।
કલ્પે કલ્પે સ રામો વૈ તવ પુત્રોઽભવત્પ્રભુઃ ।
જઘાન રાવણં વીરો ગાણપત્યબલાન્વિતઃ ॥ ૩૨॥

અન્યચ્છૃણુ ચરિત્રં ત્વં ફાલ્ગુને સઙ્કટીભવમ્ ।
સર્વપાપહરં પૂર્ણં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૩૩॥

મહારાષ્ટ્રે દ્વિજઃ કશ્ચિત્ પાપકર્મા બભૂવ હ ।
બ્રાહ્મણત્વં પરિત્યજ્ય ચાણ્ડાલ્યાં નિરતોઽભવત્ ॥ ૩૪॥

(Page ખં. ૪ અ. ૨૨ પાન ૬૩)
ચાણ્ડાલૈર્યોનિસમ્બન્ધં પુત્રપુત્રીસમુદ્ભવમ્ ।
ચકાર મન્દધીઃ સોઽપિ મદ્યમાંસપરાયણઃ ॥ ૩૫॥

સ કદાચિદ્વને સંસ્થો જનાન્ હન્તું સમુદ્યતઃ ।
દ્રવ્યલોભી મહાપાપી પરસ્ત્રીલાલસોઽભવત્ ॥ ૩૬॥

તત્ર ફાલ્ગુનમાસે સા ચતુર્થી કૃષ્ણગાઽઽગતા ।
સંસ્થિતઃ પર્વતદ્રોણ્યાં બભૂવ બ્રાહ્મણોઽધમઃ ॥ ૩૭॥

તત્ર કશ્ચિન્નૃપઃ સૈન્યૈશ્ચતુરઙ્ગૈઃ સમાગતઃ ।
તદ્ભયાત્ સોઽપિ તત્રૈવ સંસ્થિતોઽન્નજલૈર્વિના ॥ ૩૮॥

મહત્ સૈન્યં નૃપસ્યૈવ માર્ગે ગમનકારકમ્ ।
કિઞ્ચિદ્દિવસશેષે તત્ સમ્પૂર્ણગતમાભવત્ ॥ ૩૯॥

તતઃ સોઽપિ બહિર્વીક્ષ્ય નિઃસૃતો ભયવર્જિતઃ ।
જગામ સ્વગૃહં ચન્દ્રોદયે દુષ્ટઃ ક્ષુધાતુરઃ ॥ ૪૦॥

બભક્ષાન્નં સ્વપુત્રૈઃ સ રાત્રૌ સુપ્તો નિજાલયે ।
તત્ર સર્પેણ દષ્ટશ્ચ મમાર નૃપ દુર્મતિઃ ॥ ૪૧॥

તતો ગણેશદૂતૈઃ સ નીતઃ સ્વાનન્દકે પુરે ।
દૃષ્ટ્વા વિઘ્નેશ્વરં તત્ર બ્રહ્મભૂતો બભૂવ હ ॥ ૪૨॥

અજ્ઞાનવ્રતપુણ્યેન વિધિહીનેન ભો નૃપ ।
મુક્તશ્ચતુર્ભિરેવં સ કિં પુનર્જ્ઞાનિનાં પરમ્ ॥ ૪૩॥

એતાદૃશા મહાભાગા વિધિયુક્તા વિધિં વિના ।
વ્રતપુણ્યપ્રભાવેણ બ્રહ્મભૂતા બભૂવિરે ॥ ૪૪॥

તત્રૈવં કતિ તે બ્રૂયાં નાલં વર્ષાયુતૈરપિ ।
ભવામિ નૃપ માહાત્મ્યં સઙ્ક્ષેપેણ નિરૂપિતમ્ ॥ ૪૫॥

ઇદં ફાલ્ગુનમાસે યા ચતુર્થી કૃષ્ણગા મતા ।
તસ્યાઃ શ ૃણોતિ માહાત્મ્યં પઠેદ્વા સર્વમાલભેત્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ફાલ્ગુનકૃષ્ણચતુર્થીવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ ॥ ૪.૨૧

## ૪.૨૨ ચૈત્રકૃષ્ણચતુર્થીચરિતવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
ચૈત્રકૃષ્ણચતુર્થી યા તાં મે વદ મહામુને ।
ન તૃપ્યામિ ગણેશસ્ય કથાં શ્રુત્વા સુખપ્રદામ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
ચતુર્થીમહિમાયુક્તં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨॥

કલિઙ્ગે નૃપવર્યશ્ચોગ્રસેનો ધર્મતત્પરઃ ।
યજ્વા દાનપરો નિત્યં ધર્માત્મા શંસિતવ્રતઃ ॥ ૩॥

શસ્ત્રાસ્ત્રકુશલો ધીમાન્ સત્યવાક્ નીતિસંયુતઃ ।
જિત્વા રાજગણાન્ સર્વાંશ્ચકાર રાજ્યમુત્તમમ્ ॥ ૪॥

તસ્ય રાજ્યે નૃપશ્રેષ્ઠ બભક્ષુઃ સર્વમાનવાન્ ।
અપારાસ્તત્પુરે વ્યાઘ્રાઃ સમાગત્ય મહાબલાઃ ॥ ૬॥

ઉગ્રસેનશ્ચ શસ્ત્રૈસ્તાન્ જઘાન નૃપસંયુતઃ ।

તથા સ્મ ન શમં યાન્તિ વ્યાઘ્રા દૈવોદ્ભવા યથા ॥ ૬॥

લોકાઃ સમ્પીડિતા વ્યાઘ્રૈર્નિનિન્દુસ્તં નૃપં તદા ।
પાપકર્મા નૃપોઽયં વૈ પ્રજાભ્યો દુઃખદાયકઃ ॥ ૭॥

ધર્મયુક્તો યદા રાજા પ્રજાસ્તત્ર સુખે રતાઃ ।
કિં કર્તવ્યં પ્રજાભિશ્ચ દુષ્ટે રાજનિ નિત્યદા ॥ ૮॥

સ રાજર્ષિર્દૂતમુખાચ્છ્રુત્વા દુઃખસમન્વિતઃ ।
યયૌ વનં પ્રધાનેષુ રાજ્યં ત્યક્ત્વા સુદારુણમ્ ॥ ૯॥

તત્ર ગત્વા સ એકાન્તે તતાપ તપ ઉત્તમમ્ ।
(Page ખં. ૪ અ. ૨૨ પાન ૬૪)
સૂર્યં ધ્યાત્વા ચ સૌરૈસ્તં તોષયામાસ નિત્યદા ॥ ૧૦॥

નિરાહારપરો રાજા ગતે વર્ષે બભૂવ હ ।
અસ્થિચર્માવશેષઃ સ તથાઽપિ તપ આચરત્ ॥ ૧૧॥

તતો બ્રાહ્મણરૂપેણ રવિસ્તં પ્રજગામ હ ।
રાજા પ્રણમ્ય તં વિપ્રં ફલૈરાપૂજયત્તતઃ ॥ ૧૨॥

ફલાનિ ભક્ષયિત્વા સ ઉવાચ રાજસત્તમમ્ ।
તપઃ કિમર્થં રાજન્ તે દેહં શોષયસે વદ ॥ ૧૩॥

ઉગ્રસેનસ્તતો વિપ્રં તમુવાચ કૃતાઞ્જલિઃ ।
દુઃખેન મહતા યુક્તો નિઃશ્વસ્ય સ પુનઃ પુનઃ ॥ ૧૪॥

ઉગ્રસેન ઉવાચ ।
કરોમિ નીતિયુક્તેન રાજ્યં ધર્મેણ નિત્યદા ।
તત્ર વ્યાઘ્રગણાઃ ક્રૂરા નરાન્ સમ્ભક્ષયન્તિ ભોઃ ॥ ૧૫॥

શાન્તયેઽત્ર મયા તેષાં નાનોપાયાઃ કૃતા મુને ।
અપરાસ્તે ભવન્તીહ તદર્થં તપ આચરમ્ ॥ ૧૬॥

રાજ્ઞો વચનમાકર્ણ્ય વિપ્રસ્તં પુનરબ્રવીત્ ।
નિન્દયન્ સર્વભાવેન સાક્ષાદ્ભાનુઃ પ્રતાપવાન્ ॥ ૧૭॥

દ્વિજ ઉવાચ ।
મહાપાપી ત્વમેવાસિ કર્મદૂષણતો નૃપ ।
ચતુર્થીજં વ્રતં મુખ્યં નષ્ટં રાજ્યે સુદુર્મતે ॥ ૧૮॥

સર્વાદૌ તત્ પ્રકર્તવ્યં સર્વસિદ્ધિપ્રદાયકમ્ ।
તદા કર્મ કૃતં ભૂપ ફલયુક્તં ભવેત્ સદા ॥ ૧૯॥

ચતુઃપદાર્થદં પૂર્ણં વ્રતાનામુત્તમં વ્રતમ્ ।
વ્યાઘ્રાસ્તદ્દોષભાવેન પીડયન્તિ ચ માનવાન્ ॥ ૨૦॥

એવમુક્ત્વા ચતુર્થીજં માહાત્મ્યં દ્વિજસત્તમઃ ।
શ્રાવયામાસ તસ્મૈ સ શ્રુત્વા સોઽભૂત્ સુવિસ્મિતઃ ॥ ૨૧॥

જગાદ હર્ષસંયુક્તસ્તં વિપ્રં જ્ઞાનદં પરમ્ ।
કૃતાઞ્જલિઃ પ્રણમ્યાઽસૌ વચનં સ્વહિતપ્રદમ્ ॥ ૨૨॥

ઉગ્રસેન ઉવાચ ।
કિં ત્વં સાક્ષાત્ સ્વયં ભાનુસ્તપસા તુષ્ટચેતસા ।
આગતોઽનુગ્રહાર્થં મે ધન્યોઽહં તે પ્રદર્શનાત્ ॥ ૨૩॥

અધુના વદ મે બ્રહ્મન્ ગણેશસ્ય સ્વરૂપકમ્ ।
જ્ઞાત્વા તં દેવદેવશં ભજિષ્યામિ વિશેષતઃ ॥ ૨૪॥

દ્વિજ ઉવાચ ।
શ ૃણુ રાજન્ ગણેશસ્ય સ્વરૂપં યોગદં પરમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં ધારિતં ચેન્નરેણ વૈ ॥ ૨૫॥

ચિત્તે ચિન્તામણિઃ સાક્ષાત્ પઞ્ચચિત્તપ્રચાલકઃ ।
પઞ્ચવૃત્તિનિરોધેન પ્રાપ્યતે યોગસેવયા ॥ ૨૬॥

અસમ્પ્રજ્ઞાતસંસ્થશ્ચ ગજશબ્દો મહામતે ।
તદેવ મસ્તકં યસ્ય દેહઃ સર્વાત્મકોઽભવત્ ॥ ૨૭॥

ભ્રાન્તિરૂપા મહામાયા સિદ્ધિર્વામાઙ્ગસંશ્રિતા ।
ભ્રાન્તિધારકરૂપા ચ બુદ્ધિઃ સા દક્ષિણાઙ્ગકે ॥ ૨૮॥

તયોઃ સ્વામી ગણેશશ્ચ માયાભ્યાં ખેલતે સદા ।
તં ભજસ્વ વિધાનેન તદા શં લભસે નૃપ ॥ ૨૯॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં દશાક્ષરમ્ ।
વિધિયુક્તં તતઃ સૂર્યોઽતર્ધાનં પ્રચકાર હ ॥ ૩૦॥

રાજા સ્વનગરે ગત્વા પ્રધાનૈરનુમોદિતઃ ।
કથયામાસ વૃત્તાન્તં સર્વેભ્યઃ સુખદાયકમ્ ॥ ૩૧॥

તત્રાદૌ ચૈત્રગા કૃષ્ણા ચતુર્થી સહસાऽऽગતા ।
તાં ચકાર વિધાનેન ગણેશે ભક્તિસંયુતઃ ॥ ૩૨॥

સમીપે નાગરાઃ સંસ્થા નરા ગ્રામાન્તરે સ્થિતાઃ ।
ચક્રુસ્તે હર્ષસંયુક્તાઃ સઙ્કષ્ટીં કષ્ટહારિણીમ્ ॥ ૩૩॥

તત્ સર્વત્ર વ્રતં મુખ્યં પ્રશસ્તં સ ચકાર હ ।
ભયાદ્હઠેન ચક્રુસ્તે જના ભૂમિસ્થિતાઃ પરે ॥ ૩૪॥

તતો વ્યાઘ્રા મહોગ્રાઃ સ્મ સર્વેઽતર્ધાનમાયયુઃ ।
રોગાદિભિર્વિનિર્મુક્તાશ્ચિક્રીડુર્હર્ષિતા જનાઃ ॥ ૩૫॥

(Page ખં. ૪ અ. ૨૩ પાન ૬૫)
રાજા ગણપતિં નિત્યમભજન્નાન્યચેતસા ।
ગુરુરૂપેણ ભાનું સ પૂજયામાસ નિત્યદા ॥ ૩૬॥

ગતે કાલે તતઃ પુત્રં સ સંસ્થાપ્ય મહામતિઃ ।
રાજ્યે નિવૃત્તિમાસ્થાય ગણેશમભજત્ પરમ્ ॥ ૩૭॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ।
તસ્ય રાજ્યે જનાઃ સર્વે ક્રમાત્તે મુક્તિમાપ્નુવન્ ॥ ૩૮॥

એવં વ્રતસ્ય માહાત્મ્યં લેશતઃ કથિતં મયા ।
અન્યચ્છૃણુ મહાભાગ પાપનાશકરં પરમ્ ॥ ૩૯॥

દ્રાવિડે ભિલ્લજાતિસ્થઃ ક્ષત્રિયઃ પાપકારકઃ ।
ભિલ્લૈઃ સંસ્કારહીનશ્ચ સમ્બન્ધં સ ચકાર હ ॥ ૪૦॥

એકદા વનસંસ્થશ્ચ દ્રવ્યલોભી દુરાત્મવાન્ ।
કઞ્ચિત્ દૃષ્ટ્વા નરં તત્રાऽધાવચ્છસ્ત્રપ્રધારકઃ ॥ ૪૧॥

પપાલ સોઽપિ દૂરં વૈ નરો ભયસમન્વિતઃ ।
ઋક્ષસ્તત્ર સમાયાતો વને કશ્ચિન્ મહાબલઃ ॥ ૪૨॥

તેનૈવ ક્ષત્રિયઃ પાપી ધૃતો વેગેન ભૂમિપ ।
ઋક્ષં સ તં સ શસ્ત્રેણ પાતયામાસ ભૂતલે ॥ ૪૩॥

ભિલ્લસ્તત્ર પપાતાऽસૌ ભૃશમૃક્ષેણ પીડિતઃ ।
નિર્જને વનમધ્યે સ વિલલાપાऽતિદારુણમ્ ॥ ૪૪॥

દૈવયોગેન સા દેવી ચૈત્રી સઙ્કષ્ટહારિણી ।

તદ્દિને તેન સમ્પ્રાપ્તા ચતુર્થી કૃષ્ણપક્ષગા ॥ ૪૫॥

જલાન્નસંવિહીનોઽયં બભૂવે પાપકારકઃ ।
ચન્દ્રોદયે ફલં તત્ર પપાત નૃપ વૃક્ષતઃ ॥ ૪૬॥

દુષ્ટેન ક્ષત્રિયેણૈવ ભક્ષિતં વિકલેન તત્ ।
પઞ્ચમ્યાં સ મૃતસ્તત્ર બ્રહ્મભૂતો બભૂવ હ ॥ ૪૭॥

એવં નાના જના રાજન્ વ્રતસ્યૈવ પ્રભાવતઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે બ્રહ્મ પ્રલેભિરે ॥ ૪૮॥

તત્ર તે કતિ શક્યં ન વક્તું વર્ષાયુતૈરપિ ।
નાનેન સદૃશં કિઞ્ચિદ્વ્રતં સર્વાર્થદાયકમ્ ॥ ૪૯॥

અજ્ઞાનેન કૃતં દુષ્ટૈર્વ્રતં ગાણેશ્વરં મહત્ ।
બ્રહ્મભૂતકરં પ્રોક્તં જ્ઞાનિનાં તત્ર કા કથા ॥ ૫૦॥

ઇદં ચૈત્રચતુર્થ્યા યો માહાત્મ્યં પ્રપઠેન્નરઃ ।
શ‍ૃણોતિ ચેચ્ચ કૃષ્ણાયાઃ સ સર્વં પ્રલભેદ્ ધ્રુવમ્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચૈત્રકૃષ્ણચતુર્થીચરિતવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૪.૨૨

## ૪.૨૩ વૈશાખકૃષ્ણચતુર્થીચરિતં નામ ત્રયોવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
વૈશાખે કૃષ્ણગાયાસ્ત્વં ચતુર્થ્યા વદ સામ્પ્રતમ્ ।
માહાત્મ્યં મુનિશાર્દૂલ ન તૃપ્યામિ સમાસતઃ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અગસ્ત્યો મુનિમુખ્યશ્ચ સમુદ્રશોષણે રતઃ ।
ન શશાક મહાતેજા બ્રહ્માણં શરણં યયૌ ॥ ૨॥

બ્રહ્મણા નોદિતઃ સોઽપિ ચકાર વ્રતમુત્તમમ્ ।
વૈશાખે કૃષ્ણપક્ષે સ ચતુર્થ્યાં વિધિપૂર્વકમ્ ॥ ૩॥

જ્ઞાત્વા માહાત્મ્યમુગ્રં સ નિત્યં મન્ત્રપરાયણઃ ।
શૌક્લં કાર્ષ્ણં વ્રતં સર્વૈશ્ચકાર મુનિસત્તમૈઃ ॥ ૪॥

દશરથ ઉવાચ ।
તપસ્તેજોયુતઃ સાક્ષાદગસ્ત્યઃ સર્વશાસ્ત્રવિત્ ।
વ્રતહીનઃ કથં સોઽપિ કુણ્ઠિતશ્ચ મહાદ્યુતિઃ ॥ ૫॥

વસિષ્ઠ ઉવાચ ।
શ‍ૃણુ રાજન્ મહાભાગ સમ્યક્ પૃષ્ટં વિચક્ષણ ।
(Page  ખં. ૪ અ. ૨૩ પાન ૬૬)
અધુના તસ્ય માહાત્મ્યં કથયામિ સમાસતઃ ॥ ૬॥

અગસ્ત્યસ્તપસા યુક્તો બભૂવાઽતીવ દારુણઃ ।
ન સમસ્તેન રાજેન્દ્ર બ્રાહ્મણેષુ તપસ્વિષુ ॥ ૭॥

ન વ્રતં તેન તદપિ કૃતમજ્ઞાનભાવતઃ ।
બ્રવીમિ કારણં તત્ર શ‍ૃણુ સંશયનાશનમ્ ॥ ૮॥

વેદશાસ્ત્રપુરાણેષુ કર્મ નાનાવિધં નૃપ ।
કથિતં તચ્ચ સર્વં તુ કર્તું કેન પ્રશક્યતે ॥ ૯॥

સ્વેચ્છયા કર્મણઃ કર્તા સ્વયં ભવતિ માનવઃ ।
તત્ર માર્ગં પ્રવક્ષ્યામિ શ‍ૃણુષ્વ સુસમાહિતઃ ॥ ૧૦॥

નિત્યં નૈમિત્તિકં કર્મ દ્વિવિધં શાસ્ત્રમાર્ગતઃ ।
તત્રાગસ્ત્યશ્ચકારાઽસૌ નિત્યં કર્મ મહીપતે ॥ ૧૧॥

અન્યવ્રતાદિકં સર્વં ત્યક્ત્વા વિધિસમન્વિતઃ ।
તપસ્સુ તત્પરો નાન્યદજાનાત્ સ તપોધનઃ ॥ ૧૨॥

અતસ્તેન વ્રતં મુખ્યં ન ધૃતં રાજસત્તમ ।
ન સમર્થેન શાસ્ત્રેઽન્યચ્છૃણુષ્વ કથયામિ તે ॥ ૧૩॥

ગણેશભજનં મુખ્યં સર્વેષાં નાત્ર સંશયઃ ।
સર્વસિદ્ધિકરં પ્રોક્તં વેદાદિષુ વિશેષતઃ ॥ ૧૪॥

રાજશાર્દૂલ તદપિ નરાઃ સંસ્કારહીનકાઃ ।
નાભજંસ્તં ગણેશાનં બ્રહ્મણાં નાયકં પરમ્ ॥ ૧૫॥

તપસા દગ્ધપાપશ્ચ પુણ્યરાશિઃ પ્રજાયતે ।
તદા રુચિર્ભવેત્તત્ર ગણેશે ભક્તિસંયુતા ॥ ૧૬॥

અતોઽયં તપસા યુક્તોઽગસ્ત્યસ્તેજસ્વિનાં વરઃ ।

જાતઃ પાત્રં વિજાનીહિ જ્ઞાને ગાણેશસંજ્ઞિતે ॥ ૧૭॥

અગસ્ત્યઃ ક્રોધસંયુક્તો નૃપ વાતાપિરક્ષકમ્ ।
સમુદ્રં તં શોષયિતું ક્ષોભયામાસ ચોદ્યતઃ ॥ ૧૮॥

તત્રાઽતિકુણ્ઠિતો જાતસ્તદર્થં વિસ્મિતઃ સ્વયમ્ ।
ગત્વા બ્રહ્માણમાનમ્ય વચનં સ જગાદ હ ॥ ૧૯॥

અગસ્ત્ય ઉવાચ ।
તપસા જલધિં બ્રહ્મન્ શોષયામિ ન સંશયઃ ।
તત્ર મે તપસઃ શક્તિઃ કુણ્ઠિતાઽભૂત્ કથં વદ ॥ ૨૦॥

બ્રહ્મોવાચ ।
શ્ઃૃણુ પુત્ર મહાભાગ કારણં કથયામિ તે ।
નિત્યકર્મપરસ્ત્વં વૈ સદા તપસિ સંસ્થિતઃ ॥ ૨૧॥

ગણેશસ્મરણં વત્સ પૂજનં નિત્યમાદરાત્ ।
કરોષિ તેન ભવતિ કર્મ તે સફલં મુને ॥ ૨૨॥

તથાપિ નિત્યવત્તાત ચતુર્થી વ્રતમુત્તમમ્ ।
કર્તવ્યં યત્ત્વયા ત્યક્તં તન્નૈમિત્તિકમાનતઃ ॥ ૨૩॥

ચતુર્ણાં પુરુષાર્થાનાં દાયકં શાસ્ત્રસમ્મતમ્ ।
તેન હીનસ્ત્વમદ્યૈવ કુણ્ઠિતો નાત્ર સંશયઃ ॥ ૨૪॥

અધુના તદ્વ્રતં મુખ્યં કુરુ ભાવસમન્વિતઃ ।
નિત્યવત્તન્ મહાભાગ સમાચર વિશેષતઃ ॥ ૨૫॥

તદા સઙ્કટહીનસ્ત્વં ચતુષ્પદસમન્વિતઃ ।
પૂર્ણયોગી ભવસિ વૈ ગાણપત્યમવાપ્સ્યસિ ॥ ૨૬॥

તતસ્તેન કૃતં રાજન્ વ્રતં ગાણેશ્વરં મહત્ ।
પુરુષાર્થસમાયુક્તસ્તેનૈવ સ બભૂવ હ ॥ ૨૭॥

સમુદ્રં શોષયામાસ વ્રતપુણ્યપ્રભાવતઃ ।
અચલાં ગણનાથસ્ય ભક્તિં ચકાર નિત્યદા ॥ ૨૮॥

તતસ્તેન મુનીન્દ્રેષુ વિખ્યાતં તત્ કૃતં વ્રતમ્ ।
નિત્યવત્તે વ્રતં મુખ્યં ચક્રુઃ સર્વાર્થસિદ્ધયે ॥ ૨૯॥

અન્યચ્ચ શ્ઃૃણુ માહાત્મ્યં પુણ્યદં શ્રવણાન્નૃણામ્ ।

અવન્તીનગરે વૈશ્યો બભૂવે પાપકારકઃ ॥ ૩૦॥

બાલ્યાત્ પ્રારભ્ય તેનૈવ કૃતં પાપં મહાદ્ભુતમ્ ।
મરણાવધિ રાજેન્દ્ર વક્તું તન્ન પ્રશક્યતે ॥ ૩૧॥

(Page ખં. ૪ અ. ૨૩ પાન ૬૭)
માતૃહા દ્રવ્યલોભાર્થં પિતૃહા સમ્બભૂવ હ ।
ગુરુદ્રોહં ચકારૈવ બ્રહ્મહત્યાં સમાચરત્ ॥ ૩૨॥

તતો લોકૈઃ સમાજ્ઞપ્તો રાજા તં નિરવાસયત્ ।
ગ્રામાદ્વનં સમાગત્ય ગુહાયાં સંસ્થિતોઽભવત્ ॥ ૩૩॥

જઘાન માર્ગગાન્ લોકાન્ જીવાન્નાનાવિધાન્ સદા ।
તત્ર પ્રયોજનેનૈવ હીનો વા યુક્ત એવ વા ॥ ૩૪॥

તતો બહુધનો જાતશ્ચૌરાઃ સમ્મિલિતાઃ પરે ।
સહ તૈસ્તત્ર તેનૈવ કૃતં દુર્ગં સુદુર્ગમમ્ ॥ ૩૫॥

પર્વતદ્રોણગં તત્ર ગૃહં ચક્રે મહાખલઃ ।
ચૌરાસ્તત્ર નિવાસાર્થમાયયુઃ સર્વતઃ સ્થિતાઃ ॥ ૩૬॥

તેષાં રાજા બભૂવાઽસૌ ભાર્યા તત્ર મહીપતે ।
સમાનીતાઽતિદુષ્ટેન પુત્રપુત્રીભિરાવૃતા ॥ ૩૭॥

યથેષ્ટં રમતે તત્ર ચૌરૈશ્ચૌર્યપરાયણઃ ।
ચકાર લેશમાત્રં સ ન પુણ્યં દુર્મતિઃ કદા ॥ ૩૮॥

માર્ગે પરસ્ત્રિયં ધૃત્વા સ સતીદૂષકોઽયભત્ ।
કાશ્ચિત્તત્ર મૃતા રાજન્ સ્ત્રિયઃ સત્યો મહાભયાત્ ॥ ૩૯॥

સોઽવન્તીપાલકો લોકૈ રાજેન્દ્રો બોધિતસ્તતઃ ।
માર્ગરોધભયાચ્ચૌરં તં હન્તું પ્રોદ્યતોઽભવત્ ॥ ૪૦॥

સર્વત્ર દશદિક્ષ્વેવ સૈનિકાઃ પ્રેષિતાસ્તતઃ ।
રાજ્ઞા ચક્રુઃ પ્રયત્નેન રુદ્ધં સર્વત્ર તં ખલમ્ ॥ ૪૧॥

તતસ્તે સન્ધૃતં ચૌરં પુત્રશ્ચૌરૈઃ સમન્વિતમ્ ।
રાજ્ઞે નિવેદયામાસુસ્તં દુષ્ટં વૈશ્યયોનિજમ્ ॥ ૪૨॥

રાજા ચૌરાન્ જઘાનાપિ જનૈઃ શસ્ત્રધરૈર્નૃપ ।
તં વૈશ્યં બન્ધને ક્ષિપ્ત્વા તાડયન્નિત્યદા ખલમ્ ॥ ૪૩॥

તતોઽકસ્માચ્ચતુર્થી સા વૈશાખી સહસાઽઽગતા ।
કૃષ્ણા તત્ર ચ વૈશ્યેન ન પ્રાપ્તં ત્વન્નભક્ષણમ્ ॥ ૪૪॥

નિત્યતાડનભાવેન દુઃખિતોઽતિતરાં ખલઃ ।
ક્ષુધયા પીડિતોઽત્યન્તં પાપી સ નિશિ ચૈકકઃ ॥ ૪૫॥

તતો દયાયુતૈસ્તત્ર રાજદૂતૈશ્ચ ભક્ષણમ્ ।
કિઞ્ચિદ્દત્તં વિધોરેવોદયે વૈશ્યો બભક્ષ સઃ ॥ ૪૬॥

પઞ્ચમ્યાં સ મૃતસ્તત્ર બન્ધને તાડિતો ભૃશમ્ ।
ગાણેશૈર્બ્રહ્મભૂતઃ સ કૃતઃ સ્વાનન્દકે પુરે ॥ ૪૭॥

એતાદૃશઃ સુદુષ્ટાત્મા વ્રતપુણ્યપ્રભાવતઃ ।
બ્રહ્મભૂતો બભૂવાઽપિ કિં પુનર્વ્રતકારિણઃ ॥ ૪૮॥

એવં વ્રતપ્રભાવેણ જના બ્રહ્મ પ્રલેભિરે ।
તેઽત્ર વક્તું ન શક્યા વૈ ભવન્તિ નૃપસત્તમ ॥ ૪૯॥

ઇદં વૈશાખમાસે વૈ ચતુર્થ્યાઃ સંશૃણોતિ ચેત્ ।
કૃષ્ણાયા વાઽપિ પઠતિ માહાત્મ્યં લભતે પરમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે વૈશાખકૃષ્ણચતુર્થીચરિતં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૪.૨૩

## ૪.૨૪ જ્યેષ્ઠકૃષ્ણચતુર્થીવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
માહાત્મ્યં તચ્છ્રુતં મુખ્યં મયા વૈશાખકે પરમ્ ।
સઙ્કષ્ટીસમ્ભવં મુખ્યં ન તૃપ્તસ્તદપિ પ્રભો ॥ ૧॥

અતો જ્યેષ્ઠે ચતુર્થી યા સઙ્કષ્ટી મુનિસત્તમ ।
તસ્યાશ્ચરિતમેવં મે વદ પૂર્ણં સમાસતઃ ॥ ૨॥

વસિષ્ઠ ઉવાચ ।
નિષધેષુ મહાભાગો નલો નામાઽભવન્નૃપઃ ।
તેજસ્વી શસ્ત્રસમ્પન્નઃ શાસ્ત્રજ્ઞશ્ચ બભૂવ હ ॥ ૩॥

રૂપવાન્ ધનસમ્પન્નશ્ચતુરઙ્ગબલાન્વિતઃ ।
શસ્ત્રાસ્ત્રૈર્ભૂમિપાલાંશ્ચ બભૌ જિત્વા મહાબલાન્ ॥ ૪॥

સામન્તા વશગા યસ્ય કરદા ઇતરે નૃપાઃ ।
સાર્વભૌમો મહારાજઃ શશાસ પૃથિવીમિમામ્ ॥ ૫॥

ધર્મેણ દાનશીલેન નીત્યા ત્યાગેન ભૂમિપઃ ।
યશસા પૂરયામાસ ત્રૈલોક્યં સ ચરાચરમ્ ॥ ૬॥

ઇન્દ્રલોકે વિધેર્લોકે કૈલાસે વૈષ્ણવે પદે ।
યસ્ય વાર્તાં પ્રચક્રુસ્તે ધર્મશીલસ્ય દેવપાઃ ॥ ૭॥

ત્રિલોકીગમને સક્તઃ સાધુદર્શનતત્પરઃ ।
દેવવિપ્રાતિથિપ્રેપ્સુર્દીનાન્ધાદીનપાલયત્ ॥ ૮॥

દમયન્તી મહાભાગા રૂપેણાઽપ્રતિમા ભુવિ ।
ભાર્યા યસ્ય વિશાલાક્ષી જગન્મોહકરી બભૌ ॥ ૯॥

ગુણા વર્ણયિતું નૈવ શક્યાસ્તસ્ય મહાત્મનઃ ।
પુણ્યશ્લોકઃ સ વૈ રાજા કલિં જિગ્યે મહાયશાઃ ॥ ૧૦॥

કદાચિદ્વનગેનૈવ ભ્રાત્રા કલિવશેન સઃ ।
જિતો દ્યૂતેન રાજ્યં ત્યક્ત્વા વનં સ જગામ હ ॥ ૧૧॥

તત્રાઽપિ કલિના મત્સ્યમિષેણૈવ મહાસતી ।
પ્રેરિતેન નલેનાઽસૌ ત્યક્તા નૃપ વનાન્તરે ॥ ૧૨॥

અર્ધવસ્ત્રધરા સાઽપિ દમયન્તી પિતુર્ગૃહે ।
નાનાદુઃખસમાયુક્તા જગામ નલવર્જિતા ॥ ૧૩॥

ગુપ્તરૂપેણ વર્ષાણિ ત્રીણિ ક્રમણલાલસઃ ।
નલો બભ્રામ તેજસ્વી વને વસ્ત્રાર્ધધારકઃ ॥ ૧૪॥

ધર્મશીલં સ રાજાનં કલિના પીડિતં પરમ્ ।
દૃષ્ટ્વા મુનિવરસ્તત્ર નારદઃ પ્રજગામ હ ॥ ૧૫॥

તં દૃષ્ટ્વા લજ્જિતો રાજા પ્રણનામ કૃતાઞ્જલિઃ ।
લજ્જિતં તં સમાજ્ઞાય નારદઃ સ ઉવાચ હ ॥ ૧૬॥

નારદ ઉવાચ ।
મા લજ્જાં કુરુ રાજેન્દ્ર કર્મણાં ગતિરીદૃશી ।

સાવધાનમના ભૂત્વા શ‍ૃણુ મે પરમં વચઃ ॥ ૧૭॥

તવ રાજ્યે મહાભાગ વ્રતં નષ્ટં મહાદ્ભુતમ્ ।
ચતુર્થીસંજ્ઞિતં તેન રાજ્યભ્રષ્ટોઽસિ સામ્પ્રતમ્ ॥ ૧૮॥

સર્વાદૌ તત્ પ્રકર્તવ્યં ચતુર્વર્ગફલપ્રદમ્ ।
ન કૃતં ચેન્ મહારાજ કર્મ સર્વં નિરર્થકમ્ ॥ ૧૯॥

ચતુઃફલવિહીનસ્ત્વં ભવસ્યત્ર ન સંશયઃ ।
અતોઽવશ્યકભાવેન કુરુ ત્વં સર્વસિદ્ધિદમ્ ॥ ૨૦॥

એવમુક્ત્વા મહાયોગી નારદઃ શ્રાવયન્નૃપમ્ ।
માહાત્મ્યં વ્રતમુખ્યસ્ય ચતુર્થ્યાઃ શાન્તિકારકમ્ ॥ ૨૧॥

તચ્છ્રુત્વા વિસ્મિતો રાજા નલસ્તં પ્રત્યુવાચ હ ।
ગણેશ્વરસ્ય માહાત્મ્યં ભજિષ્યામિ વદસ્વ મે ॥ ૨૨॥

નારદ ઉવાચ ।
ગણેશ્વરસ્ય માહાત્મ્યં શાન્તિયોગફલપ્રદમ્ ।
વક્તું ન શક્યતે રાજંસ્તથાપિ શ‍ૃણુ મે વચઃ ॥ ૨૩॥

બ્રહ્મા વિષ્ણુશ્ચ શમ્ભુશ્ચ શક્તિઃ સૂર્યોઽમરાસ્તથા ।
શેષાદિનાગમુખ્યાસ્તં ભજન્તિ કુલદૈવતમ્ ॥ ૨૪॥

અન્નપ્રાણાદિકાન્યેવ બ્રહ્માણિ નૃપસત્તમ ।
ભજન્તિ તં વિશેષેણ કુલદેવં સનાતનમ્ ॥ ૨૫॥

(Page ખં. ૪ અ. ૨૪ પાન ૬૯)
મહાવાક્યાદિભિર્વેદાસ્તં ભજન્તિ સુયોગદમ્ ।
મહાવાક્યાનિ રાજેન્દ્ર ભજન્તિ બ્રહ્મનાયકમ્ ॥ ૨૬॥

સર્વસિદ્ધિપ્રદા યસ્ય વામાઙ્ગે પ્રકૃતિઃ પરા ।
પઞ્ચચિત્તમયી બુદ્ધિર્દક્ષિણાઙ્ગે વ્યવસ્થિતા ॥ ૨૭॥

સ્વાનન્દે વસતિર્યસ્ય સર્વપૂજ્યોઽયમુચ્યતે ।
સર્વાદિર્ગણનાથશ્ચ વિપ્રૈઃ સોઽતેષુ તિષ્ઠતિ ॥ ૨૮॥

ગણાઃ સમૂહરૂપાશ્ચાન્તરબાહ્યાદિયોગતઃ ।
તેષાં સ્વામી ગણેશોઽયં તં ભજસ્વ વિધાનતઃ ॥ ૨૯॥

એવમુક્ત્વા દદૌ તસ્મૈ નૃપ મન્ત્રં ષડક્ષરમ્ ।

વિધિયુક્તં તતઃ સોંઽતર્દધે ગાણેશકો મુનિઃ ॥ ૩૦॥

તતઃ સ નૃપશાર્દૂલો ધ્યાત્વા હૃદિ ગજાનનમ્ ।
મન્ત્રં જજાપ ભાવેન સ્વાત્માનં નિન્દયન્ ભૃશમ્ ॥ ૩૧॥

તતઃ કર્કોટકેનૈવ દષ્ટસ્તેન બભૂવ હ ।
વિરૂપસ્તં દદૌ વસ્ત્રં નાગઃ પુનઃ સ્વરૂપદમ્ ॥ ૩૨॥

તેન સંહર્ષિતો ભૂપ ઋતુપર્ણં જગામ હ ।
તેનૈવ માનિતોઽત્યન્તં વિરૂપો ગુણસંયુતઃ ॥ ૩૩॥

પિતુર્ગૃહે ગતા નારી દમયન્તી મહાસતી ।
તદ્વ્રતં કારયામાસ ગત્વા તામપિ નારદઃ ॥ ૩૪॥

નલેન દમયન્ત્યા તજ્જ્યેષ્ઠમાસે સમાગતમ્ ।
પ્રથમં તદ્વ્રતં મુખ્યં સઙ્કષ્ટીસંજ્ઞકં કૃતમ્ ॥ ૩૫॥

ત્રીણિ વર્ષાણિ પૂર્ણાનિ ગુપ્તરૂપેણ સંસ્થિતઃ ।
નલશ્ચતુર્થીજેનૈવ પુણ્યેન જ્ઞાનવાનભૂત્ ॥ ૩૬॥

તતઃ શ્વશુરમાગમ્ય ઋતુપર્ણેન સંયુતઃ ।
સ્વાત્માનં નાગવસ્ત્રેણ પૂર્વરૂપં ચકાર હ ॥ ૩૭॥

દમયન્ત્યા યુતઃ સોઽપિ શ્વશુરેણ ચ સેનયા ।
ઋતુપર્ણેન રાજેન્દ્રો ગતઃ સ્વનગરે તતઃ ॥ ૩૮॥

ભ્રાત્રા સમ્માનિતોઽત્યન્તં ચકાર રાજ્યમુત્તમમ્ ।
વિઘ્નહીનઃ સ્વભાવેન હૃષ્ટપુષ્ટજનૈર્વૃતઃ ॥ ૩૯॥

તતો બહૌ ગતે કાલે પુત્રં રાજ્યેઽભિષિચ્ય સઃ ।
સપત્નીકો વને ગત્વાઽભજત્તં ગણનાયકમ્ ॥ ૪૦॥

અન્તે જગામ રાજાઽસૌ સ્વાનન્દે ગણપં નૃપ ।
તત્રૈવ બ્રહ્મભૂતઃ સ બભૂવ નલનામકઃ ॥ ૪૧॥

નલેન સમ્પ્રદિષ્ટા યે જના ભૂમિતલે તતઃ ।
શુક્લકૃષ્ણચતુર્થીજં મુખ્યં ચક્રુર્વ્રતં નૃપ ॥ ૪૨॥

તે સર્વે સુખસંયુક્તા બુભુજુઃ સુખમુત્તમમ્ ।
પુત્રપૌત્રાદિભિર્યુક્તા રોગૈઃ સંવર્જિતા નૃપ ॥ ૪૩॥

અન્તે ક્રમેણ સર્વે તે બ્રહ્મભૂતા બભૂવિરે ।
એવં કૃષ્ણે જ્યેષ્ઠમાસે માહાત્મ્યં સઙ્કટીભવમ્ ॥ ૪૪॥

કથિતં તે નૃપશ્રેષ્ઠ પુનસ્ત્વં શ‍ૃણુ સિદ્ધિદમ્ ।
જ્યેષ્ઠકૃષ્ણચતુર્થીજં સર્વસઙ્કટહારકમ્ ॥ ૪૫॥

માલવેન્ત્યજજઃ કશ્ચિત્ પાપકર્મા બભૂવ હ ।
વનં ગત્વા દ્વિજાદીન્ સ જઘાન દ્રવ્યલોલુપઃ ॥ ૪૬॥

એકાકિનીં સ્ત્રિયં દૃષ્ટ્વા બલેન બુભુજે ખલઃ ।
સતી પરનરસ્પર્શહીના તત્યાજ સા તનુમ્ ॥ ૪૭॥

એવં નાનાવિધં પાપં ચકાર જાતિદૂષણઃ ।
ન તચ્છક્યં કથયિતું પાપભોગભયાન્ મયા ॥ ૪૮॥

એકદા વનસંસ્થશ્ચ ચાણ્ડાલઃ શસ્ત્રધારકઃ ।
કઞ્ચિત્ પુરુષકં દૃષ્ટ્વાઽધાવત્ સ હનનાય તમ્ ॥ ૪૯॥

પલાયનપરઃ સોઽપિ જગામ ભયસઙ્કુલઃ ।
હાહા કૃત્વા પુરોદેશે સ તતો નિષ્ફલોઽભવત્ ॥ ૫૦॥

એતસ્મિન્નન્તરે તત્ર પુરુષાઃ શસ્ત્રધારકાઃ ।
રાજ્ઞઃ સમાગતાસ્તત્ર શ્રુત્વા કોલાહલં તયોઃ ॥ ૫૧॥

(Page ખં. ૪ અ. ૨૫ પાન ૭૦)
તે ધૃત્વા તાડયામાસુઃ પુનસ્તં રાજસેવકાઃ ।
બદ્ધ્વા રાજ્ઞે દદુર્દુષ્ટં રાજા ચિક્ષેપ બન્ધને ॥ ૫૨॥

તત્રૈવ દૈવયોગેન પ્રાપ્તા જ્યેષ્ઠચતુર્થિકા ।
કૃતા તેનાન્નહીનોઽયં બભૂવે બન્ધનાકુલઃ ॥ ૫૩॥

ચન્દ્રોદયે દયાયુક્તૈ રક્ષકૈસ્તૈર્મહામતે ।
અન્નં દત્તં તથા ભુક્તં તેન દુષ્ટેન તત્ક્ષણાત્ ॥ ૫૪॥

રાજાજ્ઞયા ચ તં દુષ્ટં પઞ્ચમ્યાં જઘ્નુરાદરાત્ ।
સ મૃતોન્ત્યજજસ્તત્ર બ્રહ્મભૂતો બભૂવ હ ॥ ૫૫॥

એવં નાના જના રાજન્ વ્રતપુણ્યપ્રભાવતઃ ।
ભુક્ત્વા ભોગાંશ્ચ તે સર્વે બ્રહ્મભૂતા બભૂવિરે ॥ ૫૬॥

અપારમાહાત્મ્યયુતં વ્રતં વક્તું ન શક્યતે ।

તથાઽપિ કથિતં ભૂપ માહાત્મ્યં સઙ્કટીભવમ્ ॥ ૫૭॥

ઇદં જ્યેષ્ઠચતુર્થ્યાસ્તુ કૃષ્ણાયાઃ સંશ‍ૃણોતિ યઃ ।
માહાત્મ્યં વા પઠતિ સ લભતે સ્વેપ્સિતં ફલમ્ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે જ્યેષ્ઠકૃષ્ણચતુર્થીવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૪.૨૪

## ૪.૨૫ આષાઢકૃષ્ણચતુર્થીવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
આષાઢે સઙ્કટી પ્રોક્તા ચતુર્થી ચરિતં શુભમ્ ।
તસ્યા વદ મહાયોગિન્ સર્વદં પાપનાશનમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
સર્વસિદ્ધિકરં પૂર્ણં સેવિતં ચેન્નૃપાત્મજ ॥ ૨॥

વૃત્રેણ પીડિતોઽત્યન્તં મહેન્દ્રશ્ચિન્તયાન્વિતઃ ।
વને વસત્તુ સન્ત્રસ્તસ્ત્યક્ત્વા રાજ્યાદિકં પુરા ॥ ૩॥

મુનયઃ શ્રુતિભિર્હીના ભ્રષ્ટાચારાઃ સમન્તતઃ ।
અતિષ્ઠંસ્તે ભયોદ્વિગ્ના વર્ણાઃ સર્વે તથા નૃપ ॥ ૪॥

કર્મખણ્ડનભાવેન દેવાઃ પરમવિહ્વલાઃ ।
ઉપોષણપરા ભૂત્વાઽતિષ્ઠંસ્તે મરણોન્મુખાઃ ॥ ૫॥

ગિરેર્ગુહાસુ સંસ્થાસ્તે દદૃશુર્મુનિપુઙ્ગવમ્ ।
વિશેષજ્ઞં ગૃત્સમદં યોગિનાં ગુરુમાગતમ્ ॥ ૬॥

તં દૃષ્ટ્વા દણ્ડવત્ સર્વે પ્રણેમુશ્ચેન્દ્રમુખ્યકાઃ ।
પપ્રચ્છુઃ પૂજયિત્વા તં સ્વાસને સંસ્થિતં મુનિમ્ ॥ ૭॥

ઇન્દ્ર ઉવાચ ।
દૃષ્ટિર્ધન્યા જન્મ ધન્યં પિતા માતા વ્રતાદિકમ્ ।
યજ્ઞો જ્ઞાનાદિકં મે વૈ ત્વદઙ્ઘ્રેર્દર્શનાત્ પ્રભો ॥ ૮॥

તવ દર્શનમાત્રેણ કલ્યાણં નો ભવિષ્યતિ ।

સાક્ષાદ્યોગીશ્વરસ્યૈવ સર્વસિદ્ધિપ્રદસ્ય ચ ॥ ૯॥

વૃત્રાસુરેણ દુષ્ટેન નિર્જિતા વયમેવ ચ ।
રાજ્યં ત્યક્ત્વા વને વિપ્ર તિષ્ઠામઃ પશવો યથા ॥ ૧૦॥

અત્રાતિકર્મનાશેનોપોષણેન સમન્વિતાઃ ।
મરિષ્યામો ન સન્દેહસ્તત્ર કિં દર્શનં ભવેત્ ॥ ૧૧॥

તથાઽપિ પુણ્યયોગેન પ્રાપ્તં તે દર્શનં પરમ્ ।
વદ બ્રહ્મન્ દયાં કૃત્વા વૃત્રનાશકરં મહત્ ॥ ૧૨॥

જગત્ સર્વં મહાયોગિન્ ભ્રષ્ટાચારં કૃતં સદા ।
(Page ખં. ૪ અ. ૨૫ પાન ૭૧)
કિં પશ્યસિ સુસંહારે પ્રાપ્તે યોગીન્દ્રસત્તમ ॥ ૧૩॥

વસિષ્ઠ ઉવાચ ।
એવં પૃષ્ટો ગૃત્સમદસ્તમુવાચ દયાન્વિતઃ ।
વિશ્વરક્ષણભાવાર્થં દુષ્ટનાશકરં વચઃ ॥ ૧૪॥

ગૃત્સમદ ઉવાચ ।
રાજ્યં પ્રાપ્ય મહાભાગ સુર ત્યક્તા ચતુર્થિકા ।
વ્રતભ્રષ્ટોઽસિ દેવેન્દ્ર અધુના તદ્વ્રતં કુરુ ॥ ૧૫॥

જ્ઞાનમદેન વિઘ્નેશમન્ત્રસ્ત્યક્તસ્તથા ત્વયા ।
કિં ચિત્રં રાજ્યહીનત્વે દુર્મતે મદલાલસ ॥ ૧૬॥

એવમુક્ત્વા ચતુર્થ્યા યન્ માહાત્મ્યં મુનિસત્તમઃ ।
કથયામાસ તસ્મૈ તત્ પુનર્મન્ત્રં દદૌ સ્વયમ્ ॥ ૧૭॥

યદૃચ્છયા ગતે રાજન્ મુનાવિન્દ્રેણ તત્તતઃ ।
વ્રતં કૃતં દ્વિજૈર્દેવૈર્ગણેશં સમ્પ્રપૂજ્ય ચ ॥ ૧૮॥

તત્રાદૌ દેવરાજેનાષાઢી કૃષ્ણા મહાતિથિઃ ।
પ્રાપ્તા ચતુર્થિકા ભૂપ સા કૃતા ભૂતિદાયિકા ॥ ૧૯॥

ગણેશં મનસા ધ્યાત્વા દધીચેરસ્થિજં મહત્ ।
વજ્રં ધૃત્વા યયૌ દેવૈર્વૃત્રં યુદ્ધપરાયણઃ ॥ ૨૦॥

ચતુર્થીવ્રતજેનાઽસૌ પ્રભાવેણ મહાસુરમ્ ।
કૃત્વા યુદ્ધં મહાઘોરં વજ્રેણૈવ જઘાન તમ્ ॥ ૨૧॥

હત્વા વૃત્રં મહાવીર્યં દેવૈઃ સહ શતક્રતુઃ ।
સ્વસ્થોઽભૂદમરાવત્યા મુમુદે સ્વજનૈર્નૃપ ॥ ૨૨॥

તતો દેવગણાઃ સર્વે સ્વસ્વસ્થાનેષુ નિત્યશઃ ।
શુક્લકૃષ્ણભવં ચક્રુશ્ચતુર્થીસંજ્ઞિતં વ્રતમ્ ॥ ૨૩॥

પૃથિવ્યાં સર્વલોકાસ્તદ્વ્રતં ચક્રુર્વિશેષતઃ ।
ઇન્દ્રેણ બોધિતં ભક્ત્યા સર્વસિદ્ધિકરં મહત્ ॥ ૨૪॥

મન્વન્તરે ગતે દેવૈરિન્દ્રઃ સ્વાનન્દગોઽભવત્ ।
દૃષ્ટ્વા વિઘ્નેશ્વરં તત્ર બ્રહ્મભૂતો બભૂવ હ ॥ ૨૫॥

ભૂમિસંસ્થા નરાઃ સર્વે ક્રમેણ પ્રયયુર્નૃપ ।
ગણેશં બ્રહ્મભૂતાસ્તે વ્રતપુણ્યપ્રભાવતઃ ॥ ૨૬॥

એતત્તે કથિતં સ્વલ્પં માહાત્મ્યં વ્રતસમ્ભવમ્ ।
પુનરન્યચ્છૃણુષ્વ ત્વં પાપકઞ્ચુકનાશનમ્ ॥ ૨૭॥

ગુર્જરે બ્રાહ્મણઃ કશ્ચિદ્ બાલ્યાત્ પાપપરાયણઃ ।
પરયોનિષુ સંસક્તો જીવઘાતં ચકાર હ ॥ ૨૮॥

એકદા ભગિની યબ્ધા તેન દુષ્ટેન ચાઽભવત્ ।
મદ્યમાંસપરેણાઽપિ ચરતા વનગહ્વરે ॥ ૨૯॥

દ્રવ્યલોભી જઘાનાઽસૌ દ્વિજાદીંશ્ચ વિશેષતઃ ।
પશુપક્ષિગણાન્ રાજન્ ભ્રષ્ટાચારઃ સુદુર્મતિઃ ॥ ૩૦॥

નિત્યં ચકાર સ ખલો યવનૈઃ સહ ભોજનમ્ ।
ન શક્યં તન્મયા તસ્ય પાપં વર્ણયિતું પરમ્ ॥ ૩૧॥

એકદા વનમધ્યસ્થો બભૂવે જાતિદૂષકઃ ।
આષાઢે કૃષ્ણપક્ષે સ ચતુર્થ્યાં પાપકારકઃ ॥ ૩૨॥

દૈવયોગેન તેનૈવ ન પ્રાપ્તં વનગહ્વરે ।
કિઞ્ચિત્તેનાઽતિદુઃખાર્તસ્તદા બભ્રામ પર્વતે ॥ ૩૩॥

તથાઽપિ નાલભત્ કિઞ્ચિત્ તતો દુઃખપરાયણઃ ।
અપરાહ્ને પુનઃ સોઽપિ સ્વગૃહં ગન્તુમુત્સુકઃ ॥ ૩૪॥

ન દદર્શ સ તત્રાઽપિ જલાન્નં દૈવયોગતઃ ।
આજગામ ક્ષુધાર્તઃ સ સ્વગૃહે શોકસંયુતઃ ॥ ૩૫॥

યવનજાં સમાલિઙ્ગ્ય નિશિ ચન્દ્રોદયે નૃપ ।
બભક્ષાન્નં સુતૈઃ સાર્ધં મોહિતો માયયા ભૃશમ્ ॥ ૩૬॥

તતો જ્વરયુતોઽકસ્માદ્બભૂવે પાપનિશ્ચયઃ ।
રાજન્ યવનજાતેન ન સ્પૃષ્ટા પાપકારિણી ॥ ૩૭॥

પઞ્ચમ્યાં સ મૃતસ્તત્ર ભૃશં દુઃખેન પીડિતઃ ।
ગાણેશાસ્તં પ્રગૃહ્યૈવ બ્રહ્મભૂતં પ્રચક્રિરે ॥ ૩૮॥

એતાદૃશા મહાપાપા ઉદ્ધરન્તિ વ્રતેન વૈ ।
(Page ખં. ૪ અ. ૨૬ પાન ૭૨)
અજ્ઞાનકૃતપુણ્યેન તત્ર કિં વર્ણયામ્યહમ્ ॥ ૩૯॥

વિધિયુક્તં વ્રતં ભૂપ યે કુર્વન્તિ નરોત્તમાઃ ।
દર્શનેન જનાનાં તે તારકાઃ સમ્ભવન્તિ હિ ॥ ૪૦॥

એવં વ્રતપ્રભાવેણ બ્રહ્મભૂતા બભૂવિરે ।
અનન્તાશ્ચરિતં તેષાં વક્તું નૈવ પ્રશક્યતે ॥ ૪૧॥

ઇદમાષાઢસઙ્કષ્ટ્યાશ્ચરિતં યઃ શ ૃણોતિ ચેત્ ।
પઠેદ્વા લભતે સોઽપિ વાઞ્છિતં નાત્ર સંશયઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે આષાઢકૃષ્ણચતુર્થીવર્ણનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૪.૨૫

## ૪.૨૬ શ્રાવણકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રાવણે કૃષ્ણપક્ષે યા ચતુર્થી સઙ્કટી ભવેત્ ।
માહાત્મ્યં વદ તસ્યા મે સર્વેભ્યઃ સુખદાયકમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ઇતિહાસં પ્રવક્ષ્યામિ શ્રાવણે સઙ્કટીભવમ્ ।
શ્રવણાત્ સુખદઃ પૂર્ણો ભવતે પઠનાત્તથા ॥ ૨॥

ચન્દ્રવંશે સમુત્પન્નો યુધિષ્ઠિરઃ પ્રતાપવાન્ ।

ધર્મશીલો વદાન્યશ્ચ માન્યાન્ માનયિતા ભૃશમ્ ॥ ૩॥

સાક્ષાદ્ધર્માવતારશ્ચ સત્યવાક્ કરુણાયુતઃ ।
પાણ્ડુપુત્રો મહાતેજાઃ પ્રજાપાલનતત્પરઃ ॥ ૪॥

દ્રૌપદ્યા ભ્રાતૃભિશ્ચૈવ સહિતઃ સર્વસમ્મતઃ ।
કુન્ત્યા માત્રા મહાભાગો વિખ્યાતઃ સર્વમણ્ડલે ॥ ૫॥

કૃષ્ણો યસ્ય સહાયોઽભૂત્ સદા વૃષ્ણિકુલોદ્ભવઃ ।
સાક્ષાન્નારાયણઃ શ્રીમાન્ ભૂભારહરણે રતઃ ॥ ૬॥

એકદા સ્વગૃહે રાજા સંસ્થિતો રાજભિર્વૃતઃ ।
રાજસૂયં મહાયજ્ઞં કૃત્વા કૃષ્ણવિવર્જિતઃ ॥ ૭॥

ધૃતરાષ્ટ્રેણ તત્રૈવ પ્રેષિતો વિદુરઃ સ્વયમ્ ।
આજગામ સ તં દૃષ્ટ્વા માનયામાસ કુન્તિજઃ ॥ ૮॥

ભોજિતં પરમાન્નેન વિદુરં સદસિ સ્થિતમ્ ।
તમુવાચ મહાભાગો હર્ષિતઃ સ યુધિષ્ઠિરઃ ॥ ૯॥

ધન્યં મે જન્મ કર્માદિ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
વયં પાલ્યાઃ સદા તાત ત્વયા ધર્મભૃતા પ્રભો ॥ ૧૦॥

કુશલં સ્વજનાનાં તે કિમર્થં ત્વં સમાગતઃ ।
વદ મે સકલં પૂર્ણં વૃત્તાન્તં ધૃતરાષ્ટ્રગમ્ ॥ ૧૧॥

વિદુર ઉવાચ ।
સર્વત્ર કુશલં વત્સ સ્વજનેષુ મહામતે ।
ધૃતરાષ્ટ્રસ્ય દુર્બુદ્ધેરાદરાદ્વચનં શ‌ૃણુ ॥ ૧૨॥

પુત્રવત્સલભાવેન દુર્યોધનસમાશ્રિતઃ ।
તેનાઽહં પ્રેષિતો ભૂપ ત્વત્સમીપે વિચક્ષણઃ ॥ ૧૩॥

ઇચ્છતિ ત્વાં વિજેતું સ પ્રભો દ્યૂતેન મન્દધીઃ ।
દુર્યોધનો મહાપાપી કુલક્લેશવિવર્ધનઃ ॥ ૧૪॥

કર્ણેન પ્રેરિતોઽત્યન્તં શકુનિના વિશેષતઃ ।
સક્તસ્તે રાજ્યહરણે દુઃશાસનસમન્વિતઃ ॥ ૧૫॥

ધૃતરાષ્ટ્રસ્તથા રાજન્ મન્યતે મનસિ ધ્રુવમ્ ।
સ ત્વામાહ્વયતે લોભી મયા ચૈવ યુધિષ્ઠિર ॥ ૧૬॥

મા ગચ્છ દુર્મતિં તાત પુત્રપક્ષસમાશ્રિતમ્ ।
ધૃતરાષ્ટ્રં ચ કુન્ત્યા ત્વં સસ્ત્રીકો ભ્રાતૃભિઃ કદા ॥ ૧૭॥

વસિષ્ઠ ઉવાચ ।
વિદુરસ્ય વચઃ શ્રુત્વા યુધિષ્ઠિરો મહાયશાઃ ।
(Page ખં. ૪ અ. ૨૬ પાન ૭૩)
ઉવાચ તં મહાભાગં નિઃશ્વસ્ય વચનં હિતમ્ ॥ ૧૮॥

યુધિષ્ઠિર ઉવાચ ।
શ‍ૃણુ તાત મદીયં ત્વં વાક્યં ધર્મયુતં મહત્ ।
રાજ્યે સુસંસ્થિતો રાજા ધૃતરાષ્ટ્રો વિશેષતઃ ॥ ૧૯॥

તદાજ્ઞાવશગાઃ સર્વે વયં ભીષ્માદયઃ કિલ ।
અતો યામિ ત્વયા સાર્ધં ભાવિ યત્તદ્ભવિષ્યતિ ॥ ૨૦॥

ધર્મયુક્તં વચઃ શ્રુત્વા વિદુરઃ ખિન્નમાનસઃ ।
ન કિઞ્ચિદુક્તવાંસ્તત્ર તં નિઃશ્વસ્ય મહાયશાઃ ॥ ૨૧॥

વિદુરેણ યુતાઃ સર્વે સસ્ત્રીકાઃ પાણ્ડવા નૃપ ।
સમાગતાશ્ચ દ્રૌપદ્યા ધૃતરાષ્ટ્રં સભાસ્થિતમ્ ॥ ૨૨॥

તેનાજ્ઞપ્તાશ્ચ તે સર્વે ભ્રાતરઃ કલહે રતાઃ ।
ચિક્રીડુર્દ્યૂતમુગ્રં વૈ દુર્યોધનમુખૈઃ પુરા ॥ ૨૩॥

શકુનિના મહોગ્રેણ તપસા સાધિતં પુરા ।
દ્યૂતં તદેવ રાજેન્દ્ર તદધીનં બભૂવ હ ॥ ૨૪॥

ક્રમેણ રાજ્યમુગ્રં તત્ સર્વં જિત્વા સુયોધનઃ ।
વનવાસે પાણ્ડવાન્ સ સ્થાપયામાસ દુર્મતિઃ ॥ ૨૫॥

દ્રૌપદી તેન દુષ્ટેન સભાયાં સર્વસન્નિધૌ ।
સમાનીતા સ તાં પ્રાહ પત્ની મે ભવ સુન્દરિ ॥ ૨૬॥

પતયઃ પઞ્ચ કુત્રાઽપિ ન દૃશ્યન્તે સ્ત્રિયાઃ ક્વચિત્ ।
અસ્માકં કુલજં સર્વં યશો નષ્ટં ત્વયા ખલે ॥ ૨૭॥

ભ્રાતા તાં હઠસંયુક્તો નગ્નાં ચક્રે મહાખલઃ ।
ભીષ્માદીંશ્ચ તિરસ્કૃત્ય દુઃશાસનસમન્વિતઃ ॥ ૨૮॥

પાણ્ડવા ધર્મરક્ષાર્થમસહંસ્તસ્ય કર્મ તત્ ।
દ્રૌપદ્યા સંસ્મૃતઃ કૃષ્ણો ગુપ્તરૂપધરો યયૌ ॥ ૨૯॥

માયયા વસ્ત્રસંયુક્તાં દ્રૌપદીં સ પુનઃ પુનઃ ।
ચકાર ચ તતઃ સર્વે ક્ષુભિતાઃ સ્વગૃહં યયુઃ ॥ ૩૦॥

દ્રૌપદી પાણ્ડવૈઃ સાર્ધં યયૌ મુક્તા વને તદા ।
તત્ર કૃષ્ણઃ સમાયાતો બલેન ક્રોધસંયુતઃ ॥ ૩૧॥

ઉવાચ રાજશાર્દૂલં યુધિષ્ઠિરં પ્રતાપવાન્ ।
કૃષ્ણ ઉવાચ ।
હત્વા દુર્યોધનં તાત સપક્ષં રાજ્યકામુકમ્ ॥ ૩૨॥

ત્વાં રાજ્યે સ્થાપયિષ્યામિ મા ગચ્છ વનમેવ ચ ।
તતસ્તં ધર્મરાજસ્તુ જગાદ વચનં હિતમ્ ॥ ૩૩॥

ક્રોધં ત્યજ મહાબાહો ધર્મં રક્ષ જનાર્દન ।
ધર્મયુક્તં ચ રાજ્યં મે દેહિ વૃષ્ણિકુલોદ્ભવ ॥ ૩૪॥

એવમુક્તો મહાતેજાઃ કૃષ્ણસ્તં પ્રત્યુવાચ હ ।
કુરુ ત્વં ભ્રાતૃભિઃ સાર્ધં ગણેશોપાસનં સ્ત્રિયા ॥ ૩૫॥

સત્યાસત્યસમાના વ્યક્તૈશ્ચતુર્ધા બભૌ પ્રભુઃ ।
સ્વાનન્દવાસકર્તાઽસાવસ્માકં કુલદૈવતમ્ ॥ ૩૬॥

એવમુક્ત્વા દદૌ તસ્મૈ પ્રભુર્મન્ત્રં દશાક્ષરમ્ ।
સ વિધિં હર્ષસંયુક્તઃ સર્વસિદ્ધિકરં પરમ્ ॥ ૩૭॥

માહાત્મ્યં વ્રતજં તત્ર શ્રાવયામાસ કેશવઃ ।
યુધિષ્ઠિરસ્ય સર્વં વૈ પુણ્યદં ભ્રાન્તિનાશનમ્ ॥ ૩૮॥

ચતુર્વિધપ્રદં પૂર્ણં સર્વાદૌ સમ્મતં વ્રતમ્ ।
કૃતં ચેત્ કર્મ તત્ સર્વં સફલં ભવતિ પ્રભો ॥ ૩૯॥

તવ રાજ્યે વ્રતં મુખ્યં નષ્ટં તેન મહામતે ।
રાજ્યભ્રષ્ટશ્ચ સઞ્જાતશ્ચતુઃપદવિવર્જિતઃ ॥ ૪૦॥

શ્રુત્વા યુધિષ્ઠિરો રાજા વિસ્મિતઃ સુમહાયશાઃ ।
ગણેશં મનસિ ધ્યાત્વા ચકાર વિધિસંયુતઃ ॥ ૪૧॥

તત્રાદૌ શ્રાવણે માસે પ્રાપ્તા સઙ્કટનાશિની ।

ચતુર્થી કૃષ્ણપક્ષે તાં સાધયામાસ સાનુજૈઃ ॥ ૪૨॥

શુક્લકૃષ્ણચતુર્થીજં વ્રતં ચક્રુશ્ચ પાણ્ડવાઃ ।
(Page ખં. ૪ અ. ૨૬ પાન ૭૪)
સસ્ત્રીકાસ્તેન તે સર્વે વનેષુ સુખિનોઽભવન્ ॥ ૪૩॥

પુનઃ સ્વરાજ્યકર્તારો બભૂવુશ્ચ સુયોધનમ્ ।
હત્વા સર્વનૃપૈર્યુક્તં કૃષ્ણેન હર્ષસંયુતઃ ॥ ૪૪॥

પુનસ્તેન પૃથિવ્યાં તદ્વિખ્યાતં પ્રકૃતં વ્રતમ્ ।
શુક્લકૃષ્ણચતુર્થીજં ચક્રુઃ સર્વે જનાસ્તતઃ ॥ ૪૫॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાન્ પૌત્રં રાજ્યેઽભિષિચ્ય તે ।
પાણ્ડવા જ્ઞાનસંયુક્તા બભુઃ સ્વાંશેષુ સઙ્ગતાઃ ॥ ૪૬॥

અન્યે જનાઃ ક્રમેણૈવ ગતા ગાણેશ્વરં પદમ્ ।
દૃષ્ટ્વા ગણેશ્વરં તત્ર બ્રહ્મભૂતા બભૂવિરે ॥ ૪૭॥

એવં વ્રતસ્ય માહાત્મ્યં કથિતં તે નૃપોત્તમ ।
અન્યચ્છૃણુ મહાભાગ મહાપુણ્યપ્રદં પરમ્ ॥ ૪૮॥

કર્ણાટે કારુકઃ કશ્ચિન્ મહાપાપપરોઽભવત્ ।
વનેષુ શસ્ત્રધારી જનાન્ જઘાન સ નિત્યદા ॥ ૪૯॥

પરસ્ત્રિયં તત્ર દૃષ્ટ્વૈકાકિનીં સ તથા દરાત્ ।
અયભદ્ધઠસંયુક્તો બલેન સ મહાખલઃ ॥ ૫૦॥

ગોવધાદિકમેવં સ બ્રાહ્મણાનાં ચ હિંસનમ્ ।
ચકાર દુષ્ટભાવેન દ્રવ્યાર્થં માંસકારણાત્ ॥ ૫૧॥

એવં નિત્યં વને ગત્વા પાપં ચક્રે સ દુર્મતિઃ ।
ચોરો ગ્રામે જનાન્ જઘ્ને ગૃહીત્વાઽર્થં વિશેષતઃ ॥ ૫૨॥

કદાચિત્ સ વને ગત્વા ગુહાયાં સંસ્થિતોઽભવત્ ।
જનાન્ હન્તું મહાચોરસ્તતો વૃષ્ટિર્બભૂવ હ ॥ ૫૩॥

અતિવૃષ્ટિપ્રભાવેન જલૈર્નદ્યશ્ચ પૂરિતાઃ ।
યત્ર તત્ર જલં પૂર્ણં ગન્તું માર્ગો ન વિદ્યતે ॥ ૫૪॥

તત્ર વૃષ્ટિભયેનૈવ સંસ્થિતઃ ક્ષુધિતો નૃપ ।
દૈવયોગેન સા દેવી ચતુર્થી તિથિરાબભૌ ॥ ૫૫॥

શ્રાવણે કૃષ્ણપક્ષે સા પ્રાપ્તા તસ્યા વ્રતં શુભમ્ ।
કૃતં તેન સુદુષ્ટેન હ્યન્નહીનપ્રભાવતઃ ॥ ૫૬॥

ચન્દ્રોદયે સમુત્પન્ને જલેનાગતમાદરાત્ ।
ફલં ચ નારિકેલં યત્તદ્બભઞ્જ બભક્ષ સઃ ॥ ૫૭॥

નિશાશેષે બહિઃ પાપી નિઃસૃતસ્તત્ર ચાયયૌ ।
વ્યાઘ્રઃ સઙ્ગૃહ્ય તં હત્વા બભક્ષ ક્ષુધિતો ભૃશમ્ ॥ ૫૮॥

ગાણપાસ્તં સમ્પ્રગૃહ્ય યયુઃ સ્વાનન્દકે પુરે ।
ચક્રુર્વ્રતપ્રભાવેણ તત્ર બ્રહ્મમયં તતઃ ॥ ૫૯॥

મહાપાપી વ્રતેનૈવાજ્ઞાનજેન નૃપાત્મજ ।
બ્રહ્મભૂતો બભૂવાઽથ વર્ણ્યે કિં મહાદ્ભુતમ્ ॥ ૬૦॥

નાનાજના વ્રતેનૈવ ભુક્ત્વા ભોગાન્ હૃદીપ્સિતાન્ ।
યયુઃ સ્વાનન્દકે વર્ણયિતું તત્ર ન શક્યતે ॥ ૬૧॥

ઇદં શ્રાવણકૃષ્ણાયાશ્ચતુર્થ્યા વર્ણનં પઠેત્ ।
માહાત્મ્યં શ‍ૃણુયાદ્યો વૈ ભુક્તિં મુક્તિં સ વિન્દતિ ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શ્રાવણકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૪.૨૬
(Page ખં. ૪ અ. ૨૭ પાન ૭૫)

## ૪.૨૭ ભાદ્રપદકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
ભાદ્રકૃષ્ણચતુર્થ્યાસ્ત્વં માહાત્મ્યં વદ ભો મુને ।
ન તૃપ્યામિ કથાં શ‍ૃણ્વન્ સર્વસિદ્ધિપ્રદાયિનીમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
દ્રાવિડે રાજશાર્દૂલો બભૂવ પરમદ્યુતિઃ ।
વીરસેનો યશોયુક્તઃ સાર્વભૌમો મહાબલઃ ॥ ૨॥

નીતિજ્ઞો નીતિયુક્તશ્ચ ચક્રે સૌરાજ્યમુત્તમમ્ ।

સર્વાન્ રાજ્ઞો વશે કૃત્વા કરભારેણ સંયુતાન્ ॥ ૩॥

ધર્મશીલઃ સદાનન્દં ચાદદાદ્ભક્તિસંયુતઃ ।
ક્ષુધિતં ન નરં નારીમસહત્ સુખકારકઃ ॥ ૪॥

પુત્રાનિવ પ્રજાઃ સર્વાઃ પાલયામાસ યત્નતઃ ।
અપુત્રો દૈવયોગેન બભૂવ પરવીરહા ॥ ૬॥

પુત્રાર્થં યત્નમત્યન્તં જપહોમાદિભિઃ સદા ।
ચકાર તીર્થક્ષેત્રાદિ વિધાને તાદૃશોઽભવત્ ॥ ૬॥

એવં બહૌ ગતે કાલે પુત્રો નાસીન્ મહીપતે ।
તતોઽતિદુઃખિતો રાજા રાજ્યં ત્યક્ત્વા યયૌ વનમ્ ॥ ૭॥

સસ્ત્રીકઃ સ વને રાજા બભ્રામ યત્ર તત્ર હ ।
તતો મહાવનં ગત્વા પપાત ક્ષુધયાન્વિતઃ ॥ ૮॥

સુમન્તુસ્તત્ર વિપ્રર્ષિઃ સમિદર્થં સમાયયૌ ।
નૃપં દૃષ્ટ્વા દયાયુક્ત આયયૌ તં નિરીક્ષિતુમ્ ॥ ૯॥

વેદવેદાઙ્ગવિત્ સાક્ષાત્ સર્વશાસ્ત્રપ્રવર્તકઃ ।
પુરાણજ્ઞો મહાયોગી વ્યાસશિષ્યઃ પ્રતાપવાન્ ॥ ૧૦॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ મહામુનિમ્ ।
વીરસેનઃ પ્રહર્ષેણ સસ્ત્રીકઃ સંયુતો નૃપઃ ॥ ૧૧॥

કરસમ્પુટમુત્થાય પુરઃ કૃત્વા મહામુનેઃ ।
તં જગાદ વિશેષજ્ઞં રાજા વચનમુત્તમમ્ ॥ ૧૨॥

વીરસેન ઉવાચ ।
ધન્યં મે કર્મ જન્માદિ પિતા માતા કુલં યશઃ ।
વિદ્યા વ્રતાદિકં સર્વં ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૧૩॥

રાજ્યં ત્યક્ત્વા વને સંસ્થઃ પુત્રાર્થં પાપવાનહમ્ ।
તત્ર તે દર્શનં પ્રાપ્તં પૂર્વપુણ્યફલોદયાત્ ॥ ૧૪॥

નાનાયત્નેન વિપ્રેશ પુત્રો મે નાઽભવત્કિલ ।
ત્વત્કૃપોપાયમેકં ચ પશ્યામિ સુખદાયકમ્ ॥ ૧૫॥

વસિષ્ઠ ઉવાચ ।
એવં તસ્ય નૃપસ્યાઽસૌ શ્રુત્વા વચનમુત્તમમ્ ।

સન્તુષ્ટસ્તં જગાદેદં સુમન્તુર્મુનિસત્તમઃ ॥ ૧૬॥

સુમન્તુરુવાચ ।
મા ચિન્તાં કુરુ રાજેન્દ્ર પુત્રસ્તે કુલતારકઃ ।
ભવિષ્યતિ ન સન્દેહઃ શ◌ૃણુ મે વચનં હિતમ્ ॥ ૧૭॥

રાજ્યે નષ્ટે ત્વદીયે તચ્ચતુર્થીજં વ્રતં મહત્ ।
તેન ત્વં પુત્રહીનોઽસિ નૃપાધમ ન બુધ્યસે ॥ ૧૮॥

સર્વાદૌ તદ્વ્રતં મુખ્યં કર્તવ્યં સર્વસિદ્ધિદમ્ ।
ચતુઃપદાર્થદં સર્વૈર્નોચેત્ સર્વં સુનિષ્ફલમ્ ॥ ૧૯॥

ત્વયા કર્મ કૃતં નાનાપુણ્યદં સર્વસમ્મતમ્ ।
ચતુર્ભિઃ પુરુષાર્થૈર્હીનં ચતુર્થીવિવર્જિતમ્ ॥ ૨૦॥

એવમુક્ત્વા નૃપાયાઽથ માહાત્મ્યં વ્રતજં મહત્ ।
શ્રાવયામાસ તં સોઽપિ શ્રુત્વા પપ્રચ્છ ભાવિકઃ ॥ ૨૧॥

વીરસેન ઉવાચ ।
વદ બ્રહ્મન્ ગણેશસ્ય જ્ઞાનં યસ્ય ચતુઃપ્રદમ્ ।
વ્રતં સર્વાદિસમ્માન્યં તં ભજિષ્યામિ નિત્યદા ॥ ૨૨॥

સુમન્તુરુવાચ ।
ગણેશસ્ય સ્વરૂપં યદ્વક્તું શક્તો ભવેત્તુ કઃ ।
ઉપાધિસંયુતં જ્ઞાનં શ◌ૃણુ રાજેન્દ્ર સર્વદમ્ ॥ ૨૩॥

અહં તપઃપ્રભાવેણ પુરા જાતો વિશેષતઃ ।
શાપાનુગ્રહણે રાજન્ સમર્થઃ સર્વમણ્ડલે ॥ ૨૪॥

તતોઽતિતપસા યુક્તોઽભવં તેન મહામતે ।
અન્તર્જ્ઞાનં સમુત્પન્નં સ દૃષ્ટ્વા વિસ્મિતો હ્યહમ્ ॥ ૨૫॥

(Page ખં. ૪ અ. ૨૭ પાન ૭૬)
તતો જડાદિકા નાના ભૂમિકાઃ સાધયંસ્તતઃ ।
નાનાબ્રહ્મવિભેદેષુ સંસ્થિતો બ્રહ્મધારકઃ ॥ ૨૬॥

એવં ક્રમેણ રાજેન્દ્ર આસં સ્વાનન્દગોઽભવમ્ ।
તત્ર શાન્તિસુખે સક્તો બ્રહ્મભૂતસ્વભાવતઃ ॥ ૨૭॥

તસ્માદ્ભેદમયં દ્વન્દ્વં દૃષ્ટ્વા શાન્તો મહામુનિમ્ ।

વ્યાસં ગત્વા પ્રણમ્યૈવાઽઽપૃચ્છં તં સ્વહિતપ્રદમ્ ॥ ૨૮॥

બ્રહ્મભૂતસ્વરૂપાં મે વદ શાન્તિં મહામુને ।
શિષ્યોઽહં તે મહાભાગ તારયસ્વ ભવાર્ણવાત્ ॥ ૨૯॥

ઇતિ પૃષ્ટો મહાયોગી મામુવાચ પ્રહર્ષિતઃ ।
તત્તેઽહં કથયિષ્યામિ ગણેશજ્ઞાનકારકમ્ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
શૃણુ પુત્ર પ્રવક્ષ્યામિ બ્રહ્મભૂતસ્વરૂપકમ્ ।
શાન્તીનાં શાન્તિરૂપં તં જ્ઞાતવ્યં યોગસેવયા ॥ ૩૧॥

સ્વત ઉત્થાનકં બ્રહ્મ ઉત્થાનં પરતસ્તથા ।
તયોરભેદભાવે ચ હ્યસત્ સ્વાનન્દ ઉચ્યતે ॥ ૩૨॥

તત્રામૃતમયં યત્તત્ સદ્રૂપં સ્વસ્વરૂપકમ્ ।
તયોરભેદભાવે ચાનન્દઃ સ્વાનન્દ ઉચ્યતે ॥ ૩૩॥

ત્રિભિર્હીનં ત્રિભિર્યુક્તમવ્યક્તં બ્રહ્મ કથ્યતે ।
ચતુર્ણામેવ સંયોગે સ્વાનન્દો બ્રહ્મ ઉચ્યતે ॥ ૩૪॥

પઞ્ચભિર્ગતિહીનં યન્મતં ચાયોગવાચકમ્ ।
ન તત્ર કસ્યચિદ્યોગસ્તતઃ કુત્રાઽપિ પુત્રક ॥ ૩૫॥

સંયોગાયોગયોર્યોગે યોગઃ શાન્તિપ્રદાયકઃ ।
સ એવ ગણરાજશ્ચ જ્ઞાતવ્યો વિબુધૈઃ સદા ॥ ૩૬॥

ગણાઃ સમૂહરૂપાશ્ચાન્તરબાહ્યાદિયોગતઃ ।
અન્નાદિબ્રહ્મરૂપાસ્તે જ્ઞાતવ્યા યોગસેવયા ॥ ૩૭॥

તેષાં સ્વામી ગણેશાનસ્તં ભજસ્વ વિધાનતઃ ।
તદા ત્વં બ્રહ્મભૂતશ્ચ ભવિષ્યસિ ન સંશયઃ ॥ ૩૮॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તદેવ બુદ્ધિવાચકમ્ ।
ચિત્તં મોહસ્વરૂપં યત્ સિદ્ધિરૂપં વદન્તિ ચ ॥ ૩૯॥

તયોઃ સ્વામી ગણાધીશો માયાભ્યાં ક્રીડતિ પ્રભુઃ ।
પઞ્ચચિત્તનિરોધેન લભ્યતે ચિત્તધારકઃ ॥ ૪૦॥

અતશ્ચિન્તામણિઃ પ્રોક્તો પશ્ય વેદેષુ પુત્રક ।
ચિત્તં ત્યક્ત્વા સમોહં ત્વં ભવ ચિન્તામણિસ્તતઃ ॥ ૪૧॥

એવમુક્ત્વા દદૌ મહ્યં મન્ત્રમેકાક્ષરં પ્રભુઃ ।
સવિધિં તં પ્રણમ્યૈવાઽઽગતોઽહં સ્વાશ્રમે પુનઃ ॥ ૪૨॥

ધ્યાત્વા ગણપતિં રાજન્ મન્ત્રે જપપરોઽભવમ્ ।
તતઃ સ્વલ્પેન કાલેન શાન્તિં પ્રાપ્તોઽહમેવ ચ ॥ ૪૩॥

તથાઽપિ ગણરાજં ત્વપૂજયન્તં વિશેષતઃ ।
તતો મે દર્શયામાસ સ્વાત્માનં વિઘ્નપઃ પ્રભુઃ ॥ ૪૪॥

સમાગતં ગણેશાનં દૃષ્ટ્વા વિસ્મિતમાનસઃ ।
અપૂજયં પ્રહર્ષેણ તં પ્રણમ્ય પુનઃ પુનઃ ॥ ૪૫॥

અથર્વોપનિષદ્ભિઃ સ સંસ્તુતો ગણનાયકઃ ।
ભક્તિં દત્ત્વા સ્વકીયાં મેંઽતર્ધાનં પ્રચકાર હ ॥ ૪૬॥

તદાદિ ગાણપત્યોઽહં પ્રભજે નિત્યમાદરાત્ ।
તં ભજસ્વ મહારાજ તતઃ સર્વં શુભં ભવેત્ ॥ ૪૭॥

એવમુક્ત્વા દદૌ તસ્મૈ સ મન્ત્રં ષોડશાક્ષરમ્ ।
સવિધિં મુનિમુખ્યઃ સોંઽતર્ધાનમગમત્તતઃ ॥ ૪૮॥

રાજાઽતિવિસ્મિતો ભૂત્વા સપત્નીકઃ પ્રણમ્ય તમ્ ।
સ્વપુરે સ સમાગત્યાઽભજત્તં ગણનાયકમ્ ॥ ૪૯॥

તત્રાઽઽદૌ ભાદ્રમાસે સા કૃષ્ણા પ્રાપ્તા ચતુર્થિકા ।
કૃતા તેન જનૈઃ સર્વૈઃ પુરવાસિભિરાદરાત્ ॥ ૫૦॥

વિશેષતસ્તતસ્તેન પ્રશસ્તં તદ્વ્રતં કૃતમ્ ।
(Page ખં. ૪ અ. ૨૭ પાન ૭૭)
શુક્લકૃષ્ણચતુર્થીજં ચક્રુઃ સર્વે ધરાતલે ॥ ૫૧॥

વ્રતપુણ્યપ્રભાવેણ રાજા પુત્રસમન્વિતઃ ।
બભૂવૂ રોગહીનાસ્તે ભૂમિપૈવં જનાસ્તથા ॥ ૫૨॥

પુત્રે રાજ્યં પરિત્યજ્ય રાજા નિર્વૃત્તિસંયુતઃ ।
સપત્નીકો ગણેશાનમભજન્નિત્યમાદરાત્ ॥ ૫૩॥

અન્તે ગણેશલોકે સ ગત્વા બ્રહ્મમયોઽભવત્ ।
ક્રમેણ સર્વલોકાશ્ચ બ્રહ્મભૂતા બભૂવિરે ॥ ૫૪॥

એતત્તે કથિતં ભૂપ માહાત્મ્યં સઙ્કટીભવમ્ ।
અન્યચ્છૃણુ ચતુર્થ્યાસ્ત્વં પાપઘ્નં સર્વદં પરમ્ ॥ ૫૫॥

આન્ધ્રે ચ ધીવરઃ કશ્ચિદ્ બભૂવે સર્વહિંસકઃ ।
બાલ્યાત્ પ્રભૃતિ સોઽત્યન્તં પાપકર્મપરાયણઃ ॥ ૫૬॥

વૃથા સાક્ષ્યપરો ભૂત્વા કલહં સોઽકરોન્ મિથઃ ।
લોકાનાં લોભશીલશ્ચ ચૌર્યદ્રવ્યં સમાહરત્ ॥ ૫૭॥

વને ગત્વા મહાપાપી માર્ગસ્થાન્ પ્રજઘાન વૈ ।
બ્રાહ્મણાદીન્ વિશેષેણ નાનાપાપપરાયણઃ ॥ ૫૮॥

ન તસ્ય કર્મ વક્તું વૈ શક્યતે પાપભીતિતઃ ।
ગ્રન્થબાહુલ્યતો ભૂપ પરસ્ત્રીલાલસોઽભવત્ ॥ ૫૯॥

ભાદ્રકૃષ્ણચતુર્થીજે વનમધ્યસ્થ એકદા ।
વ્રતે પ્રાપ્તે મહાપાપી નિરાહારો બભૂવ હ ॥ ૬૦॥

અકસ્માત્ તત્ર સમ્પ્રાપ્તો જનસઙ્ઘો મહાન્નૃપ ।
ભયાત્તસ્ય પ્રલીનોઽભૂદ્ગુહાયાં ધીવરઃ સ તુ ॥ ૬૧॥

કિઞ્ચિદ્દિનાવશેષે સ જનસઙ્ઘો ગતોઽભવત્ ।
તદા બહિર્વિનિઃસૃત્ય ગૃહે ગન્તું મનો દધે ॥ ૬૨॥

ન પ્રાપ્તં તેન દુષ્ટેન કિઞ્ચિત્તદપિ દારુણઃ ।
સ્વાત્મન્યાસ્થાય ધૈર્યં સ માર્ગસંસ્થો બભૂવ હ ॥ ૬૩॥

રાત્રૌ સમાગતો દુષ્ટઃ સ્વગૃહે રાજસત્તમ ।
ચન્દ્રોદયે સુતૈઃ સાર્ધં ભોજનં સ ચકાર હ ॥ ૬૪॥

પઞ્ચમ્યાં સર્પદંશેન મૃતઃ પાપેન નિશ્ચયઃ ।
ગણરાજસ્ય તદપિ દૂતા નેતું સમાગમન્ ॥ ૬૫॥

ગૃહીત્વા ધીવરં તેઽયુર્ગણાઃ સ્વાનન્દકે પુરે ।
ગણેશાનં સ તં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૬૬॥

વ્રતેનાઽજ્ઞાનજેનાઽયં વિધિહીનેન ભૂમિપ ।
બ્રહ્મભૂતો ધીવરશ્ચ સમ્બભૂવ વદામિ કિમ્ ॥ ૬૭॥

એવં નાના જના રાજન્ બ્રહ્મભૂતા બભૂવિરે ।
ચતુર્થ્યા વ્રતપુણ્યેન વક્તું નૈવ પ્રશક્યતે ॥ ૬૮॥

ઇદં ભાદ્રપદે કૃષ્ણચતુર્થીજં શ◌ૃણોતિ યઃ ।
માહાત્મ્યં વાઽપિ પઠતિ સ ઈપ્સિતમવાપ્નુયાત્ ॥ ૬૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ભાદ્રપદકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૪.૨૭
(Page ખં. ૪ અ. ૨૮ પાન ૭૮)

## ૪.૨૮ આશ્વિનકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ અષ્ટાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
માહાત્મ્યં યદ્વદ બ્રહ્મન્નાશ્વિને કૃષ્ણકે મહત્ ।
ચતુર્થીજં વિશેષેણ ન તૃપ્તોઽહં ભવામિ વૈ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ઇતિહાસં પ્રવક્ષ્યામિ સર્વસિદ્ધિપ્રદાયકમ્ ।
અત્ર તેન મહારાજ શ◌ૃણુ તૃપ્તો ભવિષ્યસિ ॥ ૨॥

પાર્વતીશઙ્કરાભ્યાં ચ તપસાઽઽરાધિતોઽભવત્ ।
દિવ્યવર્ષસહસ્રેણ ગણેશઃ પુત્રતાં ગતઃ ॥ ૩॥

કાર્તિકેયસ્તથા જાતઃ સ્વવીર્યાત્ સ્નેહકારકઃ ।
ન તથા પ્રીતિરુત્પન્ના ગણેશે ચ તયોરભૂત્ ॥ ૪॥

કાર્તિકેયો ગણેશાનં સ્પર્ધતે નિત્યમાદરાત્ ।
વિવાહો મે પુરા પશ્ચાત્તવાપિ સ્મ ભવિષ્યતિ ॥ ૫॥

એવં સ્પર્ધયતોર્વીક્ષ્ય પુત્રયોઃ પાર્વતીશિવૌ ।
વિચારં ચક્રતુસ્તત્ર વિવાહાર્થં મહામતે ॥ ૬॥

અયં વિઘ્નેશ્વરઃ સાક્ષાદ્બ્રહ્મરૂપો ન સંશયઃ ।
ક્ષોભિતશ્ચેત્ પદભ્રષ્ટં કરિષ્યતિ વિશેષતઃ ॥ ૭॥

સાક્ષાત્ પુત્રં સમુત્પન્નં સ્કન્દં સન્ત્યજ્ય વિઘ્નપમ્ ।
જ્યેષ્ઠં વિવાહયેચ્ચેદ્વા સેનાનીઃ કોપિતો ભવેત્ ॥ ૮॥

ત્યક્ત્વા સ્વપુત્રં સેનાન્યં વિવાહો નૈવ શોભતે ।

અતઃ કપટરૂપેણ કર્તવ્યં કાર્યમુત્તમમ્ ॥ ૯॥

તતઃ શિવો ગણેશાનં સ્કન્દં ચૈવાઽબ્રવીદ્વચઃ ।
ધરાપ્રદક્ષિણાં કૃત્વા ય આદૌ સુસમાગતઃ ॥ ૧૦॥

પૂર્વં વિવાહકં તસ્ય કરિષ્યામિ ન સંશયઃ ।
તતસ્તં ગણનાથસ્તુ જગાદ વચનં હિતમ્ ॥ ૧૧॥

જ્યેષ્ઠં માં કિં પરિત્યજ્ય પ્રભો વદસિ શઙ્કર ।
વેદહીનં તથા મેઽસ્તુ ભવદાજ્ઞાં કરોમ્યહમ્ ॥ ૧૨॥

સ્થૂલદેહધરોઽહં મે વાહનં મૂષકો મતઃ ।
પૃથ્વીપ્રદક્ષિણાં કર્તું ન શક્નોમિ સદાશિવ ॥ ૧૩॥

એવમુક્ત્વા ગણાધીશઃ સ્વગૃહે સંસ્થિતોઽભવત્ ।
જગામ સ્કન્દ આરુહ્ય મયૂરં હર્ષસંયુતઃ ॥ ૧૪॥

પૃથ્વીપ્રદક્ષિણાયાં સ રતઃ સ્કન્દઃ સ વેગવાન્ ।
ચકાર માયયા તત્ર ગણેશઃ કૌતુકં મહત્ ॥ ૧૫॥

સમ્પૂજ્ય પાર્વતીં શઙ્કરં ચકાર પ્રદક્ષિણામ્ ।
ઉવાચ શઙ્કરં તત્ર વિવાહો મે વિધીયતામ્ ॥ ૧૬॥

પ્રદક્ષિણા કૃતા યેન પિતુર્માતુઃ સદાશિવ ।
પૃથ્વીપ્રદક્ષિણા તેન કૃતા શાસ્ત્રે ન સંશયઃ ॥ ૧૭॥

શ્રુત્વા ગણપતેર્વાક્યં કમ્પિતઃ શઙ્કરોઽબ્રવીત્ ।
કરોમિ તે વિવાહં વૈ ક્રોધં મા કુરુ પુત્રક ॥ ૧૮॥

તત એકાન્તગં શમ્ભું પાર્વતી પ્રેમવિહ્વલા ।
ઉવાચ કાર્તિકેયં કિં ત્યક્ત્વા ઢુણ્ઢિઃ સ માનિતઃ ॥ ૧૯॥

તતસ્તાં શઙ્કરો વાક્યં જગાદ શ◌ૃણુ પાર્વતિ ।
અયં ક્રુદ્ધશ્ચ સર્વસ્વં હરત્યત્ર ન સંશયઃ ॥ ૨૦॥

અતઃ સ્નેહં પરિત્યજ્ય રક્ષ ધર્મં સનાતનમ્ ।
નાઽયં પુત્રો મહાદેવિ બ્રહ્મભૂતઃ સમાગતઃ ॥ ૨૧॥

એવમુક્ત્વા સતીં શમ્ભુર્વિવાહમકરોત્તતઃ ।
ગણેશસ્ય વિધાનેન હૃદયેનાવિદૂયતા ॥ ૨૨॥

સિદ્ધે વિવાહકે પૂર્ણે કાર્તિકેયઃ સમાગતઃ ।
તત્ર વિઘ્નકરો વિઘ્નં ચકાર પરમાદ્ભુતમ્ ॥ ૨૩॥

નારદઃ સહસાऽऽગત્ય કાર્તિકેયમુવાચ હ ।
વિવાહકૃત્યમેતસ્ય પિત્રા માત્રા કૃતં પુરા ॥ ૨૪॥

ત્વાં વઞ્ચયિત્વા સેનાનીઃ કૃતં કર્મ જુગુપ્સિતમ્ ।
નાવલોક્યં મુખં માતુઃ પિતુશ્ચાપિ ત્વયા કદા ॥ ૨૫॥

એવમુક્ત્વા ગતો વિપ્રો નારદઃ કલહપ્રિયઃ ।
(Page ખં. ૪ અ. ૨૮ પાન ૭૯)
સ્કન્દો નિઃશ્વસ્ય તસ્માત્ સ યયૌ શ્રીશૈલપર્વતમ્ ॥ ૨૬॥

જ્ઞાત્વા પુત્રસ્ય વૃત્તાન્તં પાર્વતીશઙ્કરાવિમમ્ ।
શોધાર્થં તત્ર શૈલે તૌ ગતૌ જ્ઞાત્વા પપાલ સઃ ॥ ૨૭॥

ક્રૌઞ્ચે સ્કન્દં સ્થિતં જ્ઞાત્વા પાર્વતીશઙ્કરૌ નૃપ ।
શોકસંવિગ્નચિત્તૌ તૌ વિલાપં ચક્રતુઃ પુરા ॥ ૨૮॥

તત્રાऽऽજગામ વિપ્રેન્દ્રો મુદ્ગલઃ સર્વમુદ્ગલઃ ।
તં દૃષ્ટ્વા સહસોત્થાય પૂજયામાસતુર્મુનિમ્ ॥ ૨૯॥

સુખાસીનં મહાભાગ ઉવાચ શોકસઙ્કુલઃ ।
ભગવન્ સર્વતત્ત્વજ્ઞ વદ માં શોકનાશનમ્ ॥ ૩૦॥

સ્કન્દસંયોગદં પૂર્ણમુપાયં તં કરોમ્યહમ્ ।
રુરોદ પાર્વતી તત્ર તતસ્તૌ મુનિરબ્રવીત્ ॥ ૩૧॥

મુદ્ગલ ઉવાચ ।
શમ્ભો શ ृણુ મહાભાગ ત્વં સાક્ષાત્ સર્વવિત્ પ્રભુઃ ।
વિદ્યારૂપેયમાદ્યા સા શક્તિઃ સર્વાર્થદાયિની ॥ ૩૨॥

તથાપિ કથયામિ ત્વાં પુત્રૌ શાસ્ત્રે પ્રકીર્તિતૌ ।
દ્વિવિધૌ તૌ ત્વયા પ્રાપ્તૌ ત્વત્સમો નૈવ દૃશ્યતે ॥ ૩૩॥

યોગાભ્યાસેન વિઘ્નેશો બ્રહ્મણાં નાયકસ્તવ ।
પુત્રઃ સમાધિજઃ પ્રોક્તસ્તતશ્ચિન્તામણિઃ સ્મૃતઃ ॥ ૩૪॥

દેહઃ શક્તિમયસ્તત્રાત્મા ત્વં પુરુષ ઉચ્યસે ।
તાભ્યાં યોગબલેનૈવ ક્રિયતે બ્રહ્મપુત્રકઃ ॥ ૩૫॥

અર્ધનારીશ્વરસ્ત્વં ચ તસ્માજ્જાતો ગજાનનઃ ।
બ્રહ્મભૂતપદસ્યાઽસૌ પાલકો નાત્ર સંશયઃ ॥ ૩૬॥

ભિન્ના શક્તિરિયં જાતા ભિન્નસ્ત્વં દેહધારકઃ ।
ભિન્નભાવાત્ સમુત્પન્નઃ પુત્રસ્તે સ્કન્દ એવ ચ ॥ ૩૭॥

દેહસૌખ્યકરઃ પ્રોક્તઃ સ્કન્દઃ સર્વત્ર સમ્મતઃ ।
શાન્તિસૌખ્યકરશ્ચૈવ ગણેશઃ પુત્રભાવતઃ ॥ ૩૮॥

તત્ર ત્વં ભિન્નભાવેન મોહિતોઽસિ ન સંશયઃ ।
સ્કન્દં સ્નેહેન શમ્ભો ત્વમધિકં મન્યસે સદા ॥ ૩૯॥

ન તથા બ્રહ્મણિ શ્રદ્ધાઽધિકા વિઘ્નેશ્વરેઽધુના ।
તેન વિઘ્નસમાયુક્તો જાતોઽસિ ચ ભજસ્વ તમ્ ॥ ૪૦॥

બ્રહ્મણિ સ્નેહભાવેન વિષયાન્નિન્દયન્ સ્થિતઃ ।
તદા વિષયતાપાસ્તે સ્વયં વશ્યા ભવન્તિ વૈ ॥ ૪૧॥

વિઘ્નેશ્વરમનાદૃત્ય સ્કન્દં વિવાહસંયુતમ્ ।
આદૌ પશ્યામિ શક્ત્યા વૈ સન્ધૃતં માનસે ત્વયા ॥ ૪૨॥

તદૈવ નિષ્ફલં સર્વં કૃતં વિઘ્નકરેણ તે ।
વિયોગશ્ચ સમુત્પન્નસ્તસ્માત્તં શરણં વ્રજ ॥ ૪૩॥

એવમુક્ત્વા મુદ્ગલસ્તં જગામ સ્વેચ્છયા ચરન્ ।
શિવઃ શક્ત્યા યુતઃ સ સ્મ મન્યતે સત્યમેવ તત્ ॥ ૪૪॥

ત્યક્ત્વા સ્કન્દભવં સ્નેહં વિઘ્નેશમભજત્ સદા ।
તત્રાદૌ સઙ્કુટી પ્રાપ્તાઽઽશ્વિની તાં તૌ પ્રચક્રતુઃ ॥ ૪૫॥

માયાં ભ્રાન્તિકરીં સર્વાં ભિન્નભાવપ્રમોહતઃ ।
ત્યક્ત્વા શિવશ્ચ શક્તિશ્ચ શાન્તિસ્થૌ તૌ બભૂવતુઃ ॥ ૪૬॥

કસ્ય પુત્રશ્ચ કા માતા પિતા કો ભ્રમદાયકમ્ ।
કૃતં વિઘ્નેશ્વરેણૈવ તમાવાં શરણં ગતૌ ॥ ૪૭॥

તતો વિઘ્નેશ્વરેણૈવ કૃતં કૌતુકમાદરાત્ ।
બુદ્ધિભેદઃ કૃતસ્તત્ર સ્કન્દસ્ય નૃપ તચ્ શૃણુ ॥ ૪૮॥

ત્યક્તૌ મયાઽતિમૂઢેન પાર્વતીશઙ્કરાવહો ।
જ્યેષ્ઠં ગણપતિં નિત્યં સ્પર્ધયામિ મહાપ્રભુમ્ ॥ ૪૯॥

શક્ત્યા શિવેન વિઘ્નેશસ્તપસાઽઽરાધિતોઽભવત્ ।
સોઽયં પુત્રસ્વરૂપેણ બભૂવ વરદાનતઃ ॥ ૫૦॥

સ્વાનન્દવાસકારી સ સિદ્ધિબુદ્ધિપતિઃ સ્વયમ્ ।
(Page ખં. ૪ અ. ૨૯ પાન ૮૦)
યોગશાન્તિસ્વરૂપોઽયં ન જાનામિ સુમૂર્ખવત્ ॥ ૫૧॥

એવં વિચાર્ય સ્કન્દઃ સ યયૌ કૈલાસમાદરાત્ ।
આદૌ પ્રણમ્ય વિઘ્નેશં પૂજયામાસ ભક્તિતઃ ॥ ૫૨॥

અથર્વશિરસા તં સ તતઃ સ્તુત્વા સદાશિવમ્ ।
ઉમાં સમ્પૂજ્ય તુષ્ટાવ પ્રણનામાઽથ દણ્ડવત્ ॥ ૫૩॥

સમ્માનિતઃ સ તૈઃ સ્કન્દોઽતિષ્ઠત્તદ્ભક્તિસંયુતઃ ।
તદાજ્ઞાવશગો ભૂત્વા શાન્તિયોગપરોઽભવત્ ॥ ૫૪॥

વિવાહાર્થં શિવેનાઽસૌ પ્રેરિતસ્તમુવાચ હ ।
સ્ત્રિયં બન્ધકરીં નાથ નેચ્છામિ ગણપે રતઃ ॥ ૫૫॥

અત્યાગ્રહયુતઃ સ્કન્દોઽભજત્તં ગણનાયકમ્ ।
માયાસુખં પરિત્યજ્ય તન્નિષ્ઠઃ સ બભૂવ હ ॥ ૫૬॥

એવં સઙ્કટહારિણ્યા ચતુર્થ્યા મહિમાદ્ભુતઃ ।
કથિતઃ શાન્તિદઃ સર્વસમ્મેલનકરોઽભવત્ ॥ ૫૭॥

અન્યચ્છૃણુ મહાભાગ ચરિત્રં પાપનાશનમ્ ।
વઙ્ગદેશે દ્વિજઃ કશ્ચિત્ પાપકર્મા બભૂવ હ ॥ ૫૮॥

ત્યક્ત્વા બ્રાહ્મણમાર્ગં સ મદ્યપાનરતોઽભવત્ ।
યવનીં સ સમાદાય યવનોઽભૂન્ મહાબલઃ ॥ ૫૯॥

વક્તું ન શક્યતે તસ્ય કર્મ પાપમયં મહત્ ।
કથને પરદોષાણાં દોષી ભવતિ માનવઃ ॥ ૬૦॥

કદાચિજ્જ્વરસંયુક્તો બભૂવે જાતિદૂષણઃ ।
તત્રાશ્વિનભવા પ્રાપ્તા નૃપ કૃષ્ણા ચતુર્થિકા ॥ ૬૧॥

તત્ર તેન જલાન્નં ચ ભક્ષિતં ન ભયાન્નૃપ ।
સુપક્વાનાં તન્દુલાનાં પીતં ચન્દ્રોદયે જલમ્ ॥ ૬૨॥

તતો બહૌ ગતે કાલે મમાર યવનો દ્વિજઃ ।
સઙ્ગૃહ્ય બ્રહ્મભૂતં તં ગાણેશાશ્ચક્રિરે નૃપ ॥ ૬૩॥

એતાદૃશા મહાપાપા વ્રતપુણ્યપ્રભાવતઃ ।
બ્રહ્મભૂતા બભૂવુશ્ચ કા કથા વિધિકારિણામ્ ॥ ૬૪॥

એવં નાના જના રાજન્ ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ।
બ્રહ્મણ્યં તે ગતાસ્તત્તુ મયા વક્તું ન શક્યતે ॥ ૬૫॥

ઇદમાશ્વિનજાયાસ્તુ માહાત્મ્યં યઃ શૃણોતિ વા ।
પઠેત્ સ કૃષ્ણસઙ્કષ્ટ્યાઃ સર્વાર્થં લભતે નરઃ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે આશ્વિનકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ અષ્ટાવિંશોઽધ્યાયઃ ॥ ૪.૨૮

## ૪.૨૯ કાર્તિકકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ એકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
કાર્તિકે કૃષ્ણપક્ષે યા ચતુર્થી સઙ્કટી મતા ।
માહાત્મ્યં વદ તસ્યાસ્ત્વં સર્વપાપહરં પરમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
મહારાષ્ટ્રે મહાતેજા રાજાઽભૂત્ કર્દમાભિધઃ ॥ ૨॥

વેદવેદાર્થતત્ત્વજ્ઞઃ સ્વધર્મનિરતોઽભવત્ ।
લોકાન્ સઙ્ગૃહ્ય ષષ્ઠાંશં પાલયન્ પુત્રકાન્ યથા ॥ ૩॥

અપારસેનયા યુક્તશ્ચતુરઙ્ગપ્રમોદયા ।
પૂર્ણકોશઃ કુબેરાભો બભૌ શસ્ત્રાસ્ત્રપારગઃ ॥ ૪॥

સ્વબલેન નૃપાન્ સર્વાન્ વશાન્ કૃત્વા મહાબલઃ ।
ચકાર વશગાં પૃથ્વીં સમુદ્રાન્તાં વિશેષતઃ ॥ ૫॥

(Page ખં. ૪ અ. ૨૯ પાન ૮૧)
કરદા ઇતરે સર્વે રાજાનઃ સેવકા ઇવ ।
સામન્તાશ્ચ મહારાજ તસ્યાજ્ઞાવશવર્તિનઃ ॥ ૬॥

પુણ્યવાન્ ધર્મશીલશ્ચ નાનાદાનપરાયણઃ ।
દેવવિપ્રાઽતિથિપ્રેપ્સુઃ સ્વદારનિરતોઽભવત્ ॥ ૭॥

યજ્વા વિનીતકસ્તીર્થકારકઃ પરવીરહા ।
નાનાગુણયુતઃ સોઽપિ મયા વક્તું ન શક્યતે ॥ ૮॥

સ એવ યક્ષ્મણાઽત્યન્તં પીડિતઃ પાપરૂપિણા ।
શોકાકુલોઽભવદ્રાજા અસ્થિશેષો બભૂવ હ ॥ ૯॥

નાનોપાયાઃ કૃતાસ્તસ્ય શાન્તયે ન ચ સોઽભવત્ ।
શાન્તસ્તતો મહારાજસ્તીર્થયાત્રાપરોઽભવત્ ॥ ૧૦॥

નાનાતીર્થાનિ રાજાઽસૌ ચકાર તદપિ હ્યહો ।
પીડયા નૈવ મુક્તોઽભૂત્તતો દુઃખિતમાનસઃ ॥ ૧૧॥

દેવાર્ચનરતા વિપ્રાઃ કૃતાસ્તેન મહાત્મના ।
તથાપિ રોગસંયુક્તોઽધિકો રાજા બભૂવ હ ॥ ૧૨॥

તતઃ શાન્તિધરો રાજા વૈરાગ્યે નિદધે મનઃ ।
રાજ્યં ત્યક્ત્વા પ્રધાનેષુ સસ્ત્રીકઃ સ વનં યયૌ ॥ ૧૩॥

બભ્રામ વનગો ભૂત્વા યત્ર તત્ર મહીપતિઃ ।
તતો મઙ્ગણકં વિપ્રમદર્શદ્યોગિસત્તમમ્ ॥ ૧૪॥

તદ્ દૃષ્ટ્વા નિપપાતોર્વ્યાં રુરોદ ભૃશમેવ સઃ ।
તતસ્તં મુનિમુખ્યોઽસૌ જગાદ દયયા યુતઃ ॥ ૧૫॥

મઙ્ગણક ઉવાચ ।
શ‍ૃણુ રાજન્ મહાભાગ યેન ત્વં રોગપીડિતઃ ।
અભવસ્તદઘં સર્વં કથયામિ નૃપાધમ ॥ ૧૬॥

મુખ્યં નષ્ટં ચ રાજ્યે તે ચતુર્થીસંજ્ઞિતં વ્રતમ્ ।
તેન ત્વં પાપસંયુક્તો નરકે ગચ્છસિ ધ્રુવમ્ ॥ ૧૭॥

સર્વાદૌ તદ્વ્રતં કાર્યં નિત્યવદ્રાજસત્તમ ।
સર્વસિદ્ધિકરં પૂર્ણં ચતુર્વિધફલપ્રદમ્ ॥ ૧૮॥

તદ્વ્રતેન વિહીનસ્ત્વં નાનાધર્મપરાયણઃ ।
ચતુઃપદાર્થહીનત્વાન્નિષ્ફલોઽસિ નૃપાધમ ॥ ૧૯॥

એવમુક્ત્વા ચ માહાત્મ્યં ચતુર્થીસમ્ભવં મુનિઃ ।

શ્રાવયામાસ તસ્મૈ તચ્છ્રુત્વા સોઽપિ તમબ્રવીત્ ॥ ૨૦॥

કર્દમ ઉવાચ ।
ધન્યં મે જન્મ કર્માદિ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ।
વ્રતસ્ય શ્રવણાદ્ધન્યો કૃતકૃત્યો ન સંશયઃ ॥ ૨૧॥

દયાનિધે ગણેશસ્ય સ્વરૂપં વદ વિસ્તરાત્ ।
સર્વદેવાધિદેવં તં ભજિષ્યામિ નિરન્તરમ્ ॥ ૨૨॥

મઙ્ગણક ઉવાચ ।
ગણેશસ્ય સ્વરૂપં કથયિતું શક્યતે ન તત્ ।
તથાપ્યુપાધિસંયુક્તં વદામિ શ‌ૃણુ કર્દમ ॥ ૨૩॥

પુરાઽહં પત્રભક્ષઃ સંસ્તપસે સંસ્થિતોઽભવમ્ ।
બહુકાલે ગતે હસ્તો વિદ્ધો મે કણ્ટકેન ચ ॥ ૨૪॥

તદા પત્રરસસ્તસ્માદસ્રવત્ કિઞ્ચિદપ્યહો ।
દૃષ્ટ્વા વિસ્મિતચિત્તોઽહં નૃત્યં ચાકરવં તદા ॥ ૨૫॥

અહો દેહાદ્ગતં કુત્ર રુધિરં મે સ્વભાવજમ્ ।
પત્રભક્ષણભાવેન રસઃ સ્રવતિ હસ્તતઃ ॥ ૨૬॥

તતો નૃત્યસ્ય વેગેન કમ્પિતં સ ચરાચરમ્ ।
મદીયતપસા યુક્તં દેવાઃ શઙ્કરમાયયુઃ ॥ ૨૭॥

શઙ્કરઃ સર્વદેવૈશ્ચાગત્ય મામબ્રવીદ્વચઃ ।
કિં નૃત્યસિ મહાભાગ પશ્ય મે કૌતુકં મહત્ ॥ ૨૮॥

ઇત્યુક્ત્વા ત્રુટિકા તેન કૃતા તત્ર રસસ્ય મે ।
ભસ્મરૂપં કૃતં ભૂપાઽભવં તેનાતિવિસ્મિતઃ ॥ ૨૯॥

ત્યક્ત્વા નૃત્યં મહેશાનં પ્રણમ્ય સ્તુતવાન્ ક્ષણાત્ ।
અન્તર્ધાય સ્વમાત્માનં શઙ્કરઃ સ ગતોઽભવત્ ॥ ૩૦॥

(Page ખં. ૪ અ. ૨૯ પાન ૮૨)
મયા મનસિ રાજેન્દ્ર સન્ધૃતં શઙ્કરાત્ પરમ્ ।
વિદ્યતે ન તથા કર્તુમન્યથા કર્તુમીશ્વરઃ ॥ ૩૧॥

દર્શયિત્વા તપોરૂપમતો ભસ્મ કૃતં મહત્ ।
રસસ્ય સર્વગઃ સોઽપિ બ્રહ્માકારઃ પ્રદૃશ્યતે ॥ ૩૨॥

ત્યક્ત્વા વિષ્ણું મહેશસ્ય ભજને નિરતોऽભવમ્ ।
ક્રમેણ યોગયુક્તોऽહં તપસ્ત્યક્ત્વા શમે રતઃ ॥ ૩૩॥

જડાદિકા મયા યોગભૂમયઃ ક્રમિતાસ્તતઃ ।
ક્રમેણ સહજે સંસ્થોऽભવં વૈ મોહવર્જિતઃ ॥ ૩૪॥

યત્ર તત્ર મહીદેશે ભ્રાન્તોऽહં યોગધારકઃ ।
સહજં બ્રહ્મ મોહેન હીનં દૃષ્ટં મયા તતઃ ॥ ૩૫॥

સ્વાધીનં સહજં બ્રહ્મ ન યોગ્યં શાન્તિદે પરે ।
તેનાऽહં બ્રહ્મણિ ભ્રાન્તઃ સૂર્યં ચ શરણં ગતઃ ॥ ૩૬॥

પ્રણમ્ય સૌરમાર્ગેણ સ્તોત્રેણ પ્રસ્તુતો મયા ।
પ્રસન્નો માऽવદત્તત્ર વરં વરય ચેપ્સિતમ્ ॥ ૩૭॥

તતોऽહમવદં સૂર્યં વદ શાન્તિપ્રદં પ્રભો ।
સહજં મોહહીનત્વાત્ સ્વાધીનં નૈવ શાન્તિદમ્ ॥ ૩૮॥

તતો મામબ્રવીત્ સૂર્યઃ પ્રસન્નો ભક્તિયન્ત્રિતઃ ।
ગણેશં ભજ ભાવેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૩૯॥

અસચ્છક્તિશ્ચ સત્ સૂર્યઃ સમો વિષ્ણુર્મહામુને ।
સહજઃ શઙ્કરઃ પ્રોક્તસ્તેષાં યોગે ગણેશ્વરઃ ॥ ૪૦॥

ચતુર્ણાં ચૈવ સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
અયોગઃ પઞ્ચભિર્હીનસ્તત્ર નિર્માયિકો બભૌ ॥ ૪૧॥

સંયોગે માયયા યુક્તો યોગે માયાવિવર્જિતઃ ।
તયોર્યોગે શાન્તિદઃ સ ગણેશો બ્રહ્મનાયકઃ ॥ ૪૨॥

ચિત્તરૂપા મહાબુદ્ધિઃ પઞ્ચધા પરિકીર્તિતા ।
ચિત્તમોહપ્રદા સિદ્ધિસ્તાભ્યાં ક્રીડતિ વિઘ્નપઃ ॥ ૪૩॥

ચિત્તં મોહયુતં વિપ્ર ત્યક્ત્વા યોગેન શાન્તિદમ્ ।
ચિન્તામણિં ભજસ્વ ત્વં યોગિવન્દ્યો ભવિષ્યસિ ॥ ૪૪॥

એવમુક્ત્વા દદૌ મન્ત્રં પ્રભુર્મહ્યં ષડક્ષરમ્ ।
સ વિધિં તં નમસ્કૃત્ય સ્વાશ્રમેऽહં સમાગમમ્ ॥ ૪૫॥

તત્ર વિઘ્નેશ્વરં ભક્ત્યા ભજં તં નિત્યમાદરાત્ ।
તતઃ સ્વલ્પેન શાન્તિસ્થોऽભવં યોગસ્ય સેવયા ॥ ૪૬॥

તથાપિ ગણરાજં સમ્પૂજ્ય મન્ત્રપરાયણઃ ।
અભજં તેન સન્તુષ્ટઃ પ્રત્યક્ષં પ્રયયૌ સ્વયમ્ ॥ ૪૭॥

મયા સમ્પૂજિતો ભક્ત્યા સ્તુતો નાનાવિધૈઃ સ્તવૈઃ ।
મહ્યં દત્ત્વા દૃઢાં ભક્તિમન્તર્ધાનં ચકાર હ ॥ ૪૮॥

તદારભ્ય મહીપાલ ગાણપત્યોઽહમાદરાત્ ।
ભજામિ તં ગણેશાનં સ્વચ્છન્દેન મહામતે ॥ ૪૯॥

એવમુક્ત્વા દદૌ તસ્મૈ કર્દમાય ષડક્ષરમ્ ।
મન્ત્રં વિધિયુતં વિપ્રો ગણેશકૃપયા યુતઃ ॥ ૫૦॥

અન્તર્ધાનં ચકારાપિ મહાન્ મદ્ગુણકો મુનિઃ ।
રાજા હર્ષસમાયુક્તઃ સ્વગૃહં પ્રત્યપદ્યત ॥ ૫૧॥

તત્રાઽઽદૌ કાર્તિકે માસ્યાગતા કૃષ્ણા ચતુર્થિકા ।
તાં ચકાર પુરસ્થૈશ્ચ જનૈર્હર્ષયુતો નૃપ ॥ ૫૨॥

તતો ભૂપેન વિખ્યાતં કૃતં વ્રતમનુત્તમમ્ ।
શુક્લકૃષ્ણચતુર્થીજં વ્રતં ચક્રુર્જના ભુવિ ॥ ૫૩॥

રોગહીનઃ સ રાજર્ષિરભજદ્ગણનાયકમ્ ।
જના વન્ધ્યત્વહીનાશ્ચાઽભજંસ્તે ભાવસંયુતાઃ ॥ ૫૪॥

પુત્રે રાજ્યં પરિત્યજ્ય સસ્ત્રીકઃ સ વનં યયૌ ।
તત્ર વિઘ્નેશ્વરં ભક્ત્યાઽભજચ્ચાનન્યચેતસા ॥ ૫૫॥

અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો બભૂવ હ ।
(Page ખં. ૪ અ. ૩૦ પાન ૮૩)
ક્રમેણ ભૂમિસંસ્થાસ્તે બ્રહ્મભૂતા બભૂવિરે ॥ ૫૬॥

એવં વ્રતસ્ય માહાત્મ્યં કથિતં તે નૃપોત્તમ ।
અન્યત્ત્વં શ‍ૃણુ ભાવેન પરં કાર્તિકસમ્ભવમ્ ॥ ૫૭॥

ચાણ્ડાલઃ કોઽપિ પાપાત્મા હિંસાયાં તત્પરોઽભવત્ ।
જઘાન બ્રાહ્મણાનન્યાન્ જન્તૂન્ વનસમાશ્રિતાન્ ॥ ૫૮॥

પરસ્ત્રિયં વને દૃષ્ટ્વાઽયભત્તાં હઠસંયુતઃ ।
એવં નાનાવિધં પાપં ચકાર દુર્મતિઃ સદા ॥ ૫૯॥

કદાચિત્ કાર્તિકે માસિ ચતુર્થ્યાં વનમાશ્રિતઃ ।
કૃષ્ણાયાં તત્ર સર્પેણ દષ્ટઃ પાપપરાયણઃ ॥ ૬૦॥

તતોઽતિભયસંયુક્તઃ સ્વગૃહં પ્રત્યપદ્યત ।
તત્રોપાયાઃ કૃતા નાના સ્વજનૈર્વિષહારકાઃ ॥ ૬૧॥

તથાપિ વિષબાધા ચ ન જહૌ તં સુદુર્મતિમ્ ।
તતશ્ચન્દ્રોદયે કિઞ્ચિત્ સાવધાનો બભૂવ હ ॥ ૬૨॥

તત્રાન્નં ભક્ષયિત્વા સ પુનસ્તદ્ગરલેન ચ ।
વ્યાકુલઃ પતિતસ્તત્ર ગતચેષ્ટોઽત્યજોઽભવત્ ॥ ૬૩॥

પઞ્ચમ્યાં સ મૃતઃ પાપી બ્રહ્મભૂતો બભૂવ હ ।
વ્રતપુણ્યપ્રભાવેન તદદ્ભુતમિવાઽભવત્ ॥ ૬૪॥

એવં નાનાવિધા રાજન્ વ્રતપુણ્યપ્રભાવતઃ ।
બભૂવિરે બ્રહ્મભૂતા મયા વક્તું ન શક્યતે ॥ ૬૫॥

એતત્તે કથિતં સર્વં માહાત્મ્યં કાર્તિકે નૃપ ।
સદ્ભુષ્ટ્યા યસ્તુ પઠતિ શ઼ૃણોતીપ્સિતમાલભેત્ ॥ ૬૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે કાર્તિકકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ એકોનત્રિંશોઽધ્યાયઃ ॥ ૪.૨૯

## ૪.૩૦ માર્ગશીર્ષકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
માર્ગશીર્ષે ચ કૃષ્ણાયાશ્ચતુર્થ્યા વદ માનદ ।
માહાત્મ્યં સર્વદં સ્વામિન્ યેન તૃપ્તો ભવામ્યહમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ઇતિહાસં પુરાવૃત્તં કથયામિ સવિસ્તરમ્ ।
રાજા બભૂવ તેજસ્વી હરિશ્ચન્દ્રઃ પ્રતાપવાન્ ॥ ૨॥

અયોધ્યાયાં સ્થિતઃ સોઽપિ નાનાધર્મપરાયણઃ ।
સદા સદ્ગુણસંયુક્તો યજ્વા કર્મપરાયણઃ ॥ ૩॥

યદ્યચ્ચ યાચતે વિપ્રસ્તદ્દદાતિ સ હર્ષતઃ ।

તસ્ય પુણ્યેન તુલ્યં તુ ન બભૂવ ધરાતલે ॥ ૪॥

તતશ્છલયિતું યોગી વિશ્વામિત્રઃ સમાયયૌ ।
સર્વરાજ્યં નૃપસ્યૈવ જગૃહે દાનમાર્ગતઃ ॥ ૫॥

રાજ્યભ્રષ્ટં નૃપં કૃત્વા પરપ્રાન્તે ગતં પુનઃ ।
નાનામિષેણ તં તત્રાચ્છલયન્ મુનિસત્તમઃ ॥ ૬॥

તતઃ સોઽપિ નૃપોઽત્યન્તં ધર્મયુક્તો બભૂવ હ ।
ન ચચાલાતિદુઃખેન સંયુક્તઃ પરમાર્થવિત્ ॥ ૭॥

તત્રૈકદા ચતુર્થી સા માર્ગશીર્ષે સમાગતા ।
કૃષ્ણા નૃપઃ ક્ષુધાયુક્તો બભૂવ તૃષયા યુતઃ ॥ ૮॥

છલિતો મુનિનાઽત્યન્તં તતશ્ચન્દ્રોદયોઽભવત્ ।
તત્રાન્નં ભક્ષયામાસ રાજેન્દ્રો દૈવયોગતઃ ॥ ૯॥

પઞ્ચમ્યાં બુદ્ધિસમ્ભેદો વિશ્વામિત્રસ્ય ચાઽભવત્ ।
તજ્જ્ઞાત્વા વિસ્મિતો યોગી વિચચાર સ્વચેતસિ ॥ ૧૦॥

(Page ખં. ૪ અ. ૩૦ પાન ૮૪)
તતસ્તેન વ્રતં તત્ર જ્ઞાતં રાજ્ઞા કૃતં મહત્ ।
પ્રત્યક્ષં વરદો ભૂત્વા હરિશ્ચન્દ્રમુવાચ હ ॥ ૧૧॥

કુરુ રાજ્યં મહાબુદ્ધે શ‍ૃણુ મે પરમં વચઃ ।
તવ રાજ્યે ચતુર્થીજં વ્રતં નષ્ટં બભૂવ હ ॥ ૧૨॥

તેન ત્વં પીડયા યુક્તઃ પ્રજાતોઽસિ નૃપાધમ ।
અહં સઙ્ક્ષુભિતો વાઽપિ તદર્થં નાત્ર સંશયઃ ॥ ૧૩॥

સર્વાદૌ તદ્વ્રતં કાર્યં ચતુઃપાદપ્રદં નૃપ ।
નિત્યવન્નાત્ર સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૪॥

ત્વયા નાનાવિધં પુણ્યં કૃતં વિધિયુતં મહત્ ।
તત્સર્વં નિષ્ફલં જાતં વ્રતહીનપ્રભાવતઃ ॥ ૧૫॥

જનૈઃ સર્વૈર્મહારાજ નરકે ત્વં પતિષ્યસિ ।
ત્વયા કૃતં વ્રતં મુખ્યમધુનાઽજ્ઞાનતો મહત્ ॥ ૧૬॥

તેનાઽહં પ્રીતિસંયુક્તઃ કૃતો વૈ રાજસત્તમ ।
તત્ કુરુષ્વ મહીપાલ જનૈઃ સૌખ્યમવાપ્સ્યસિ ॥ ૧૭॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમષ્ટાક્ષરં મુનિઃ ।
સવિધિં ગણનાથસ્ય સોઽપિ તં પુનરબ્રવીત્ ॥ ૧૮॥

હરિશ્ચન્દ્ર ઉવાચ ।
ગણેશસ્ય સ્વરૂપં મે વદ સર્વજ્ઞ તે નમઃ ।
વ્રતસ્યૈવ પ્રભાવં ત્વં વિધિયુક્તં મહામુને ॥ ૧૯॥

વિશ્વામિત્ર ઉવાચ ।
ગણેશ્વરસ્ય માહાત્મ્યં શ‍ૃણુ સઙ્ક્ષેપતો નૃપ ।
એક એવ ગણેશોઽયં સર્વે તસ્ય ગણાઃ સ્મૃતાઃ ॥ ૨૦॥

મનોવાણીમયં વિશ્વં તદેવ ગણવાચકમ્ ।
નાનાભાવસમાયુક્તં મયા વક્તું ન શક્યતે ॥ ૨૧॥

મનોવાણીવિહીનં યન્નાનાબ્રહ્મપ્રવાચકમ્ ।
ગણરૂપં તુ વિજ્ઞેયં વેદે પશ્ય મહીપતે ॥ ૨૨॥

સિદ્ધિર્ભ્રાન્તિકરી પ્રોક્તા બુદ્ધિર્ભ્રાન્તિધરા નૃપ ।
તાભ્યાં ક્રીડતિ વિઘ્નેશશ્ચિત્તે ચિન્તામણિઃ સ્થિતઃ ॥ ૨૩॥

તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ।
રાજ્યકર્તાઽપિ વન્દ્યસ્ત્વં યોગિનાં પ્રભવિષ્યસિ ॥ ૨૪॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તત્ર મોહશ્ચ પઞ્ચધા ।
સમોઽહં ચિત્તમુત્સૃજ્ય ચિન્તામણિર્ભવિષ્યસિ ॥ ૨૫॥

એવમુક્ત્વા વ્રતસ્યૈવ માહાત્મ્યં મુનિપુઙ્ગવઃ ।
શ્રાવયામાસ તસ્મૈ તત્તતશ્ચાન્તર્હિતોઽભવત્ ॥ ૨૬॥

વિશ્વામિત્રં ગતં જ્ઞાત્વા રાજા હર્ષસમન્વિતઃ ।
અયોધ્યાયાં યયૌ વેગાત્ પ્રધાનૈરનુમોદિતઃ ॥ ૨૭॥

નાગરૈઃ સહ રાજાઽપિ ચકાર વ્રતમુત્તમમ્ ।
શુક્લકૃષ્ણચતુર્થીજં ગણેશભજને રતઃ ॥ ૨૮॥

સર્વત્રૈવં પ્રશસ્તં તદ્ વ્રતં ચકાર હર્ષતઃ ।
ભૂમિસંસ્થા જનાઃ સર્વે વ્રતં ચક્રુર્વિશેષતઃ ॥ ૨૯॥

નાનેન સદૃશં કિઞ્ચિત્ સર્વદં વ્રતમુત્તમમ્ ।

તતો રોગાદિભિર્હીનો બભૂવે હર્ષસંયુતઃ ॥ ૩૦॥

રાજા ગણપતિં નિત્યમભજન્નાન્યચેતસા ।
પુત્રે રાજ્યં વિનિક્ષિપ્ય સસ્ત્રીકશ્ચ યયૌ વનમ્ ॥ ૩૧॥

તત્રૈવ ગણરાજં સોઽભજત્ સુતપસા યુતઃ ।
શાન્તિં પ્રાપ્તો વિશેષેણાઽભવદ્યોગી સ પાર્થિવઃ ॥ ૩૨॥

અન્તે સ્વાનન્દગો ભૂત્વા ગણેશે લીનતાં ગતઃ ।
એવં વ્રતસ્ય માહાત્મ્યં કથિતં તેઽજનન્દન ॥ ૩૩॥

જનાઃ સર્વે ક્રમેણૈવ બ્રહ્મભૂતા બભૂવિરે ।
ચતુર્થીવ્રતજેનૈવ પુણ્યેન પરમેણ તે ॥ ૩૪॥

અન્યચ્છૃણુ મહીપાલ માલવે નગરં મહત્ ।
કર્ણા નામ ચ તત્રાઽઽસીદ્વેશ્યા નરવિમોહિની ॥ ૩૫॥

લોકાન્ સા હાવભાવેન મોહયામાસ તત્ક્ષણાત્ ।
નાના જનાઃ સ્વધર્મં ત્યક્ત્વાઽભવન્ વૈ તદાત્મકાઃ ॥ ૩૬॥

(Page ખં. ૪ અ. ૩૧ પાન ૮૫)
સ્વસ્વસ્ત્રિયં પરિત્યજ્ય તન્નિષ્ઠાસ્તે બભૂવિરે ।
મદ્યમાંસરતાઃ સર્વે નરાધિપ કૃતાસ્તયા ॥ ૩૭॥

બ્રાહ્મણાદય એવં તે ભ્રષ્ટા જાતા વિશેષતઃ ।
ચૌર્યાદિકર્મસંયુક્તાઃ કિં વદામિ મહામતે ॥ ૩૮॥

કથને પરદોષાણાં દોષી ભવતિ માનવઃ ।
એતાદૃશી તુ સા વેશ્યા પાપરૂપાઽતિદારુણા ॥ ૩૯॥

નાનાજનૈર્યુતા રાજન્નરકે કૃતનિશ્ચયા ।
ન વિરામં ચકારાઽપિ નરાણાં મોહને કદા ॥ ૪૦॥

એકદા જ્વરસંયુક્તા માર્ગશીર્ષે બભૂવ ચ ।
ચતુર્થ્યાં કૃષ્ણપક્ષે સાઽભવદ્દાહેન પીડિતા ॥ ૪૧॥

પઞ્ચમ્યાં સા મૃતા તત્ર બ્રહ્મભૂતા બભૂવ હ ।
વ્રતસ્યૈવ પ્રભાવેણ પતિતાનાં સહાયિની ॥ ૪૨॥

એવં નાના જના રાજન્ બ્રહ્મભૂતા બભૂવિરે ।
તત્ર તે કતિ વૈ બ્રૂયાં નાલં વર્ષાયુતૈરપિ ॥ ૪૩॥

માર્ગશીર્ષચતુર્થ્યા યન્ માહાત્મ્યં કથિતં પરમ્ ।
પઠનાત્ શ્રવણાત્ સર્વસિદ્ધિદં ભવતિ હ્યહો ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે માર્ગશીર્ષકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૦

## ૪.૩૧ પૌષકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
પૌષકૃષ્ણચતુર્થ્યાસ્તુ માહાત્મ્યં વદ ભો ગુરો ।
ન તૃપ્યામિ કથાં શ‍ૃણ્વન્ સર્વસિદ્ધિકરીં પરામ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ઇતિહાસં પ્રવક્ષ્યામિ પુરાતનભવં મહાન્ ।
રાજા વીરસહો નામ બભૂવે હસ્તિનાપુરે ॥ ૨॥

બલવાન્નીતિયુક્તશ્ચાભવચ્છસ્ત્રાસ્ત્રપારગઃ ।
ધર્મશીલો વદાન્યઃ સ માન્યાન્ માનયિતા ભૃશમ્ ॥ ૩॥

નાનાદાનરતશ્ચાપિ વાન્ધ્યદોષયુતોઽભવત્ ।
તદર્થં યત્નમાસ્થાય દેવસેવાપરોઽભવત્ ॥ ૪॥

બ્રાહ્મણૈઃ પુત્રકામાર્થં પુત્રીયામિષ્ટિમાહરત્ ।
નૈવ લેભે સ તદપિ પુત્રં વંશવિવર્ધનમ્ ॥ ૫॥

તીર્થક્ષેત્રાદિકસ્થાને નાનાધર્માનકારયત્ ।
સ્વયં પૂજાપરો ભૂત્વા ન લેભે સન્તતિં તતઃ ॥ ૬॥

તતોઽતિદુઃખિતો રાજા ત્યક્ત્વા રાજ્યં વને યયૌ ।
સસ્ત્રીકો ભ્રમમાણઃ સ શીતોષ્ણૈઃ પીડિતોઽભવત્ ॥ ૭॥

મહાવનાન્તરં ગત્વા દુઃખશોકસમન્વિતઃ ।
સિંહવ્યાઘ્રાદિકાન્ દૃષ્ટ્વા ભયહીનશ્ચચાર હ ॥ ૮॥

તત્રાઽઽજગામ યોગીન્દ્રસ્ત્રિતો નામ મહામુનિઃ ।
તં દૃષ્ટ્વા પ્રણનામાઽઽદૌ કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૯॥

તેન પૃષ્ટ ઉવાચાઽસૌ નિજં સર્વં મહાયશાઃ ।
રુરોદ તં મહાયોગી જગાદ કરુણાયુતઃ ॥ ૧૦॥

ત્રિત ઉવાચ ।
રાજ્યે તે નૃપશાર્દૂલ સર્વસિદ્ધિકરં વ્રતમ્ ।
નષ્ટં ચતુર્થીજં પૂર્ણં તેન વન્ધ્યોઽસિ નિશ્ચિતમ્ ॥ ૧૧॥

સર્વાદૌ તત્ પ્રકર્તવ્યં ચતુર્વર્ગફલપ્રદમ્ ।
તદા કર્મ કૃતં સર્વં ચતુઃપાદપ્રદં ભવેત્ ॥ ૧૨॥

નાનાધર્મપરસ્ત્વં વૈ જનાસ્તથૈવ માનદ ।
(Page ખં. ૪ અ. ૩૧ પાન ૮૬)
ફલહીનપ્રભાવેણ પતિષ્યન્તિ ચ રૌરવે ॥ ૧૩॥

એવમુક્ત્વા ચતુર્થ્યાસ્તુ માહાત્મ્યં મુનિસત્તમઃ ।
શ્રાવયામાસ સમ્પૂર્ણં તતસ્તં ત્વબ્રવીન્નૃપઃ ॥ ૧૪॥

વીરસહ ઉવાચ ।
ગણેશ્વરસ્ય માહાત્મ્યં વદ મે કરુણાનિધે ।
એતાદૃશં વ્રતં યસ્ય તં ભજિષ્યામિ નિત્યદા ॥ ૧૫॥

ત્રિત ઉવાચ ।
ગણેશસ્ય સ્વરૂપં યદ્વક્તું શક્યં કથં ભવેત્ ।
ઉપાધિયુક્તં ભાવેન કથયામિ શ‍ૃણુષ્વ તત્ ॥ ૧૬॥

અહં પુરા તપોયુક્તઃ શાપાનુગ્રહણે ક્ષમઃ ।
એકો દ્વિતશ્ચ મે રાજન્ ભ્રાતરૌ વિદ્યયા યુતૌ ॥ ૧૭॥

તાભ્યાં યજ્ઞાર્થમેવાહં ગતો રાજ્ઞો મહાત્મનઃ ।
અભવં કારયિત્વા તં સ્વગૃહે ગન્તુમુત્સુકઃ ॥ ૧૮॥

દક્ષિણાપશુભિર્યુક્તં વિપુલૈર્માર્ગસંસ્થિતમ્ ।
ભ્રાતરૌ લોકસંયુક્તૌ કૂપે ક્ષિપ્ત્વા પ્રજગ્મતુઃ ॥ ૧૯॥

જલહીને હિ કૂપેઽહં પતિતઃ ખેદસંયુતઃ ।
તત્ર માનસિકં યજ્ઞં પ્રચકાર હિતાવહમ્ ॥ ૨૦॥

આજગ્મુસ્તત્ર દેવાદ્યા હવિર્ભાગાર્થમાદરાત્ ।
મયા સમ્પૂજિતાઃ સર્વે તૃપ્તાઃ સંહર્ષિતા બભુઃ ॥ ૨૧॥

અમરા ઈપ્સિતં સર્વે વરં મહ્યં દદુર્નૃપ ।
તતઃ કૂપાચ્ચ માં સર્વે બહિઃ ક્ષિપ્ત્વા પ્રજગ્મિરે ॥ ૨૨॥

તતોઽહં યાચયિત્વાઽન્યં નૃપં ગોભિઃ સમન્વિતઃ ।
હર્ષેણ સ્વાશ્રમં ગત્વા સંસ્થિતસ્તપ આચરન્ ॥ ૨૩॥

તતોઽતિતપસા જ્ઞાનં સર્વગં હ્યભવત્તતઃ ।
તપસ્ત્યક્ત્વા ચ યોગેન પ્રાભવં ભૂમિસાધકઃ ॥ ૨૪॥

જડોન્મત્તપિશાચાદ્યા ભૂમયઃ સાધિતા મયા ।
અન્તે બ્રહ્મગતોઽતિષ્ઠં સમાત્માઽહં સ્વશાન્તિદે ॥ ૨૫॥

સ્વાશ્રમે હર્ષયુક્તોઽહં તતો મુદ્ગલ આગતઃ ।
ધર્મશીલો વદાન્યશ્ચ માન્યાન્ માનયિતા ભૃશમ્ ॥ ૨૬॥

યોગીન્દ્રૈર્વન્દિતો નિત્યં તં દૃષ્ટ્વા પ્રણતોઽભવમ્ ।
પૂજયિત્વા સુવિશ્રાન્તં તમપૃચ્છં કૃતાઞ્જલિઃ ।
શાન્તિયોગં વદ સ્વામિન્ શાન્તિભ્યઃ શાન્તિદાયકમ્ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
અસચ્છક્તિશ્ચ સત્સૂર્યઃ સમો વિષ્ણુર્મહામુને ।
અવ્યક્તઃ શઙ્કરસ્તેષાં સંયોગે ગણપોઽભવત્ ॥ ૨૮॥

સંયોગે માયયા યુક્તો ગણેશો બ્રહ્મનાયકઃ ।
અયોગે માયયા હીનો ભવ તે મુનિસત્તમ ॥ ૨૯॥

સંયોગાયોગયોર્યોગે યોગો ગાણેશસંજ્ઞકઃ ।
શાન્તિભ્યઃ શાન્તિદઃ પ્રોક્તો ભજ તં ભક્તિસંયુતઃ ॥ ૩૦॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં સ મુદ્ગલઃ ।
એકાક્ષરં વિધિયુતં તતઃ સોઽન્તર્હિતોઽભવત્ ॥ ૩૧॥

તતોઽહં ગણરાજં તમભજં સર્વભાવતઃ ।
તેન શાન્તિસમાયુક્તશ્ચરામિ હ્યકુતોભયઃ ॥ ૩૨॥

ન ગણેશાત્ પરં બ્રહ્મ ન ગણેશાત્ પરં તપઃ ।
ન ગણેશાત્ પરં કર્મ જ્ઞાનં ન ગણપાત્ પરમ્ ॥ ૩૩॥

ન ગણેશાત્ પરો યોગો ભક્તિર્ન ગણપાત્ પરા ।
તસ્માચ્ચ સર્વપૂજ્યોઽયં સર્વાદૌ સિદ્ધિદાયકઃ ॥ ૩૪॥

ગણેશાનં પરિત્યજ્ય કર્મ જ્ઞાનાદિકં ચરેત્ ।
તત્સર્વં નિષ્ફલં યાતિ ભસ્મનિ પ્રહુતં યથા ॥ ૩૫॥

સર્વાંસ્ત્યક્ત્વા ગણેશાનં ભજતેઽનન્યચેતસા ।
સર્વસિદ્ધિં લભેત્ સદ્યો બ્રહ્મભૂતઃ સ કથ્યતે ॥ ૩૬॥

એવમુક્ત્વા ત્રિતસ્તસ્મૈ દદૌ મન્ત્રં દશાક્ષરમ્ ।
વિધિયુક્તં તતઃ સાક્ષાદન્તર્ધાનં ચકાર હ ॥ ૩૭॥

(Page ખં. ૪ અ. ૩૧ પાન ૮૭)
રાજા વીરસહો રાજન્ હર્ષતઃ સ્વપુરં યયૌ ।
પ્રધાનૈર્નાગરૈઃ સર્વૈર્માનિતઃ સંસ્થિતોઽભવત્ ॥ ૩૮॥

તત્રાદૌ પૌષગાં કૃષ્ણાં ચતુર્થીં તાં સમાગતામ્ ।
ચકાર સ્વપુરસ્થૈઃ સ વિધિયુક્તાં સુહર્ષિતઃ ॥ ૩૯॥

પ્રશસ્તં તદ્ વ્રતં તેન કૃતં સર્વત્ર ભૂમિપ ।
શુક્લકૃષ્ણચતુર્થીજં વ્રતં ચક્રુર્જના ભુવિ ॥ ૪૦॥

તતઃ પુત્રં મહાશૂરં નીતિજ્ઞં ધર્મસંયુતમ્ ।
લેભે નાનાગુણૈર્યુક્તં જનાઃ સંહર્ષિતા બભુઃ ॥ ૪૧॥

રોગાદિભિર્વિનિર્મુક્તા હૃષ્ટાઃ પુષ્ટાશ્ચ તેઽભવન્ ।
યત્ર તત્ર ચતુર્થીજં માહાત્મ્યમવદન્ જનાઃ ॥ ૪૨॥

પુત્રં રાજ્યે સમાસ્થાપ્ય રાજા નિર્વૃત્તિધારકઃ ।
સસ્ત્રીકો ગણનાથં તમભજદ્ભાવસંયુતઃ ॥ ૪૩॥

અન્તે બ્રહ્મમયઃ સોઽપિ બભૂવ વ્રતપુણ્યતઃ ।
ક્રમેણ ભૂમિસંસ્થાસ્તે બ્રહ્મભૂતા બભૂવિરે ॥ ૪૪॥

એવં વ્રતસ્ય માહાત્મ્યં કથિતં તે નૃપોત્તમ ।
અન્યચ્છૃણુ મહાભાગ પાપનાશકરં મહત્ ॥ ૪૫॥

ગૌડે કશ્ચિદ્ વણિક્ પાપી લોભયુક્તો બભૂવ હ ।
દ્રવ્યાર્થં પિતરં સોઽપિ જઘાન વિષદોષતઃ ॥ ૪૬॥

માતરં સ તથા દુષ્ટો માર્ગે નાનાજનાંસ્તથા ।
વણિજો વિષયોગેન મારયામાસ નિત્યદા ॥ ૪૭॥

એવં બહુધનો જાતઃ પરસ્ત્રીલાલસોઽભવત્ ।

મદ્યમાંસપરો દુષ્ટો સતીસઙ્ગેષુ લાલસઃ ॥ ૪૮॥

નાનામિષેણ દુષ્ટઃ સ્મ સતીર્યભતિ વેગતઃ ।
પરસ્ત્રિયસ્તતો રાજ્ઞા ધૃતોઽસૌ તાડિતોઽભવત્ ॥ ૪૯॥

નિગડૈર્બદ્ધ એવાઽસૌ સંસ્થિતો રાજવેશ્મનિ ।
દૈવયોગેન પૌષી સા પ્રાપ્તા કૃષ્ણા ચતુર્થિકા ॥ ૫૦॥

તસ્યામન્નાદિભિર્હીનઃ સ્થિતો દુઃખસમન્વિતઃ ।
ચન્દ્રોદયે રક્ષકૈર્યદ્દત્તમન્નમભક્ષયત્ ॥ ૫૧॥

પઞ્ચમ્યાં રાજદૂતૈઃ સ શૂલપ્રોતો મમાર હ ।
બ્રહ્મભૂતઃ સ વૈ જાતો વ્રતપુણ્યપ્રભાવતઃ ॥ ૫૨॥

એવમજ્ઞાનસંયુક્તા જ્ઞાનયુક્તા બભૂવિરે ।
બ્રહ્મભૂતા વ્રતસ્યૈવ પ્રભાવેણ મહામતે ॥ ૫૩॥

તત્રૈવ કતિ તે રાજન્ કથયામિ વિશેષતઃ ।
ન વક્તું શક્યતે તસ્માદુક્તં સઙ્ક્ષેપતો મયા ॥ ૫૪॥

ઇદં પૌષસ્ય સઙ્કષ્ટ્યા માહાત્મ્યં સંશ‍ૃણોતિ યઃ ।
પઠેદ્વા તસ્ય શુભદં ભવિષ્યતિ નિરન્તરમ્ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે પૌષકૃષ્ણચતુર્થીમાહાત્મ્યવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૪.૩૧
(Page ખં. ૪ અ. ૩૨ પાન ૮૮)

## ૪.૩૨ માહાત્મ્યવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
મલમાસે ચ સઙ્કષ્ટ્યાશ્ચતુર્થ્યા વદ માનદ ।
માહાત્મ્યં પ્રીતિદં પૂર્ણં ન તૃપ્તોઽહં કૃપાનિધે ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
આન્ધ્રદેશે મહારાજો બભૂવે રૈવતાન્તરે ।
ધર્મદત્ત ઇતિ ખ્યાતો નાનાધર્મપરાયણઃ ॥ ૨॥

યજ્વા વિનીતકોઽત્યન્તં નીતિજ્ઞોઽખિલતોષકૃત્ ।

ષષ્ઠાંશગ્રાહકઃ સોઽપિ પ્રજાપાલનતત્પરઃ ॥ ૩॥

જલોદરયુતોઽકસ્માદભવન્ માનદાયકઃ ।
સાર્વભૌમોઽતિપાપેન ગૃહીતઃ સર્વશાસ્ત્રવિત્ ॥ ૪॥

નાનોપાયાઃ કૃતાસ્તસ્ય શાન્તયે નૃપસત્તમ ।
તથાઽપિ રોગનિર્મુક્તો ન બભૂવ મહીપતિઃ ॥ ૫॥

તુલાદાનાદિકાન્યેવ મહાદાનાનિ પીડિતઃ ।
ચકાર રોગયુક્તસ્તદપ્યત્યન્તમજાયત ॥ ૬॥

પરિભ્રમન્ સ તીર્થાનિ ચકાર વિધિસંયુતઃ ।
દેવતાઽઽરાધનં રાજા નાઽભવદ્રોગવર્જિતઃ ॥ ૭॥

તતોઽતિદુઃખિતો રાજા જલેનૈવાત્મઘાતનમ્ ।
વિષેણ કર્તુમુદ્યુક્તો નાનાજનૈઃ સુવિહ્વલૈઃ ॥ ૮॥

તતોઽકસ્માન્ મહાયોગી ચાષ્ટાવક્રઃ સમાયયૌ ।
તદ્ગૃહે તં નમસ્કૃત્ય પૂજયામાસ બાન્ધવૈઃ ॥ ૯॥

ભોજિતં તં પ્રણમ્યૈવ કૃત્વા કરપુટં નૃપઃ ।
ધર્મદત્ત ઉવાચાઽસૌ વિનયાવનતોઽભવત્ ॥ ૧૦॥

ધર્મદત્ત ઉવાચ ।
ધન્યોઽસ્મ્યનુગૃહીતોઽસ્મિ સફલો મે ભવોઽભવત્ ।
તવ દર્શનતો વિપ્ર સાક્ષાદ્યોગીશ્વરસ્ય તુ ॥ ૧૧॥

આત્મઘાતેઽહમુદ્યુક્તસ્તત્ર તે દર્શનં મહત્ ।
પ્રાપ્તં પુણ્યસમૂહેન નરકો ન ભવિષ્યતિ ॥ ૧૨॥

વસિષ્ઠ ઉવાચ ।
એવં વદન્તમાનન્દયુક્તો યોગીન્દ્રસત્તમઃ ।
ઉવાચ તં મહારાજં દયયા કરુણાનિધિઃ ॥ ૧૩॥

અષ્ટાવક્ર ઉવાચ ।
કિમર્થં દેહઘાતે ત્વમુદ્યતોઽસિ મહામતે ।
રોગદુઃખવિનિર્મુક્તો ભવિષ્યસિ ન સંશયઃ ॥ ૧૪॥

તવ રાજ્યે મહીપાલ ચતુર્થીમુખ્યકવ્રતમ્ ।
નષ્ટં તેન મહોગ્રેણ પાપેન સંયુતો ભવાન્ ॥ ૧૫॥

રાજા રાષ્ટ્રકૃતં પાપં ત્વયા પ્રાપ્તં તથૈવ તત્ ।
ત્વમપિ વ્રતસંહીનઃ પતિતોઽસિ નૃપાધમ ॥ ૧૬॥

સર્વાદૌ તદ્વ્રતં કાર્યં ચતુર્વર્ગફલપ્રદમ્ ।
તદા કર્મ કૃતં રાજન્ ફલયુક્તં ભવેત્ કિલ ॥ ૧૭॥

ત્વયા ધર્મયુતં કર્મ કૃતં નાનાવિધં તથા ।
ચતુઃપદાર્થહીનં તદ્બભૂવ હ જનૈઃ કૃતમ્ ॥ ૧૮॥

સર્વૈઃ સહ જનૈ રાજન્નરકે ત્વં પતિષ્યસિ ।
તદર્થં વ્રતરાજં તત્ કુરુ સર્વસમન્વિતઃ ॥ ૧૯॥

એવમુક્ત્વા ચતુર્થ્યા યન્ માહાત્મ્યં મુનિસત્તમઃ ।
શ્રાવયામાસ તસ્મૈ સ કરુણાયુતચેતસા ॥ ૨૦॥

શ્રુત્વા મુખ્યં સ માહાત્મ્યં ધર્મદત્તઃ સુવિસ્મિતઃ ।
ઉવાચ તં હિ યોગીન્દ્રં હર્ષયુક્તેન ચેતસા ॥ ૨૧॥

ધર્મદત્ત ઉવાચ ।
પૂર્વપુણ્યં મહન્ મેઽસ્તિ કથનાય ન શક્યતે ।
મયેદૃશં વ્રતં વિપ્ર શ્રુતં તેન મહાદ્ભુતમ્ ॥ ૨૨॥

અધુના વિઘ્નરાજસ્ય સ્વરૂપં મે દયાનિધે ।
કથયસ્વ સદા દેવં ભજિષ્યામિ મહાપ્રભુમ્ ॥ ૨૩॥

ન સામાન્યં ચરિત્રં તત્તસ્ય દેવાધિપસ્ય યત્ ।
યસ્યેદૃશં વ્રતં મુખ્યં સર્વસિદ્ધિપ્રદં ભવેત્ ॥ ૨૪॥

અષ્ટાવક્ર ઉવાચ ।
ધર્મદત્ત મહાભાગ શ ृણુ ત્વં ગણપસ્ય યત્ ।
યસ્યેદૃશં વ્રતં મુખ્યં સર્વસિદ્ધિપ્રદં ભવેત્ ॥ ૨૫॥

(Page ખં. ૪ અ. ૩૨ પાન ૮૯)
નિર્ગુણં ગજવાચ્યં યદ્બ્રહ્મ મસ્તકમેવ ચ ।
તસ્ય દેહઃ સગુણકં બ્રહ્મ યોગે ગજાનનઃ ॥ ૨૬॥

સિદ્ધિર્ભ્રાન્તિસ્વરૂપા સા બુદ્ધિર્ભ્રાન્તિધરાઽભવત્ ।
તાભ્યાં ક્રીડતિ વિઘ્નેશો માયાભ્યાં પરમાર્થતઃ ॥ ૨૭॥

સ્વસંવેદ્યેન યોગેન લભ્યતે દર્શનં મહત્ ।

તેન સ્વાનન્દવાસી સ કથ્યતે યોગિભિઃ પ્રભુઃ ॥ ૨૮॥

સંયોગેઽયં ગકારઃ સો યોગેઽયં ચ ણકારકઃ ।
તયોઃ સ્વામી ગણેશાનઃ શાન્તિયોગેન લભ્યતે ॥ ૨૯॥

પઞ્ચધા ચિત્તવૃત્તિર્યા તસ્યાં મોહસ્તુ પઞ્ચધા ।
સમોહં ચિત્તમુત્સૃજ્ય લભ્યતે ચિત્તચાલકઃ ॥ ૩૦॥

તેનાઽયં ગણનાથસ્તુ ચિન્તામણિરિતિ સ્મૃતઃ ।
તં ભજસ્વ મહાભાગ તદા શાન્તો ભવિષ્યસિ ॥ ૩૧॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રં માલાત્મકં પ્રભુઃ ।
સવિધિં ધર્મદત્તાય તતઃ સોંઽતર્હિતોઽભવત્ ॥ ૩૨॥

રાજાઽપિ હર્ષસંયુક્તો બભૂવાતિતરાં તતઃ ।
ધન્યમાત્માનમેવં સ્મ મન્યતે ભાગ્યગૌરવાત્ ॥ ૩૩॥

તત્રાદૌ મલમાસે યા ચતુર્થી કૃષ્ણપક્ષગા ।
સમાગતા જનૈ રાજા તાં ચકાર વિધાનતઃ ॥ ૩૪॥

તતસ્તેન વ્રતં મુખ્યં તત્ સર્વત્ર પ્રકાશિતમ્ ।
તતો જના વ્રતં ચક્રુર્ભૂમિસ્થા યત્ર તત્ર તે ॥ ૩૫॥

તતો રોગવિનિર્મુક્તો ધર્મદત્તો બભૂવ હ ।
જનાઃ સર્વે તથા હૃષ્ટા બભૂવૂ રોગવર્જિતાઃ ॥ ૩૬॥

નિત્યં ગણપતિં રાજાઽભજચ્ચાનન્યમાનસઃ ।
ગણેશપ્રીતયે નાનાદાનાનિ સ દદૌ સદા ॥ ૩૭॥

તતો રાજ્યે સ્વપુત્રં સ સંસ્થાપ્યૈકાન્તસંસ્થિતઃ ।
સસ્ત્રીકો ગણનાથં તમભજદ્ધ્યાનમાર્ગતઃ ॥ ૩૮॥

અન્તે જગામ વિઘ્નેશં તલ્લીનઃ સ બભૂવ હ ।
જનાઃ સર્વે ક્રમેણૈતે બ્રહ્મભૂતા બભૂવિરે ॥ ૩૯॥

એવં વ્રતસ્ય માહાત્મ્યં સર્વસિદ્ધિપ્રદાયકમ્ ।
કથિતં તે મહીપાલ શૃણ્વન્યત્ત્વં કથાનકમ્ ॥ ૪૦॥

ગાન્ધારદેશવાસીયઃ ક્ષત્રિયઃ પાપકારકઃ ।
બભૂવ સ પરદ્રવ્યહારકશ્ચૌર્યમાર્ગતઃ ॥ ૪૧॥

ધૂતમદ્યરતો નિત્યં પરસ્ત્રીલમ્પટોઽભવત્ ।
ગોમાંસભક્ષણે સક્તો મિથ્યાવાક્ સાક્ષ્યપૂરકઃ ॥ ૪૨॥

નાનાભેદૈઃ સુદુર્બુદ્ધિઃ કલહં યત્ર તત્ર વૈ ।
ચકાર સર્વદા રાજન્ હિંસાકર્મપરાયણઃ ॥ ૪૩॥

તતો રાજ્ઞા મહાપાપી વને નિષ્કાસિતો બલાત્ ।
જઘાન માર્ગગાંસ્તત્ર જન્તૂન્નાનાવિધાન્ ખલઃ ॥ ૪૪॥

દ્વિજાદીનાં વધે સક્તઃ સ્ત્રીબાલવધકારકઃ ।
એવં નાનાવિધં પાપં નિત્યમેવ ચકાર સઃ ॥ ૪૫॥

તતો દ્રવ્યયુતોઽત્યન્તં બુભુજે ભોગમુત્તમમ્ ।
હૃદીપ્સિતં સ દુષ્ટાત્મા નાનાચૌરસમન્વિતઃ ॥ ૪૬॥

કદાચિત્ પર્વતદ્રોણીં મલમાસે સ આશ્રિતઃ ।
ચતુર્થ્યાં કૃષ્ણપક્ષસ્ય હિંસાર્થં લોભસંયુતઃ ॥ ૪૭॥

તતો માનવમેકં તુ માર્ગસ્થં સ દદર્શ હ ।
નિઃસૃત્યાધાવદત્યન્તં શસ્ત્રહસ્તો વધાય વૈ ॥ ૪૮॥

પપાલ ક્રૂરકર્માણં દૃષ્ટ્વા તં સોઽપિ ભીતિતઃ ।
ક્રોશમાત્રં તતો દુષ્ટઃ પપાત પદવ્યુત્ક્રમાત્ ॥ ૪૯॥

પતિતં તં સમાજ્ઞાય નરઃ ક્રોધસમન્વિતઃ ।
પાષાણેન મહાદુષ્ટં મારયામાસ મસ્તકે ॥ ૫૦॥

મસ્તકઃ સ્ફુટિતસ્તત્ર ક્ષત્રિયસ્ય નરાધિપ ।
તેન સ વ્યાકુલોઽત્યન્તં ગતચેષ્ટો બભૂવ હ ॥ ૫૧॥

(Page ખં. ૪ અ. ૩૩ પાન ૯૦)
રાત્રૌ ચન્દ્રોદયે કિઞ્ચિત્ સાવધાનોઽભવત્ કુધીઃ ।
પાયસં ભક્ષયામાસ સ્વલ્પં દુઃખસમન્વિતઃ ॥ ૫૨॥

તતો મમાર પઞ્ચમ્યાં ગતઃ સ્વાનન્દકે પુરે ।
તત્ર દૃષ્ટ્વા ગણેશાનં બ્રહ્મભૂતો બભૂવ હ ॥ ૫૩॥

એવં વ્રતપ્રભાવેણ પાપકર્મા સ ક્ષત્રિયઃ ।
બ્રહ્મભૂતો બભૂવાઽપિ કિં પુનર્જ્ઞાનતઃ કૃતમ્ ॥ ૫૪॥

નાનાજના વ્રતેનૈવ ભુક્ત્વા ભોગાન્ હૃદીપ્સિતાન્ ।

બ્રહ્મભૂતા બભૂવુશ્ચ કથિતું તન્ન શક્યતે ॥ ૫૫॥

ઇદં કૃષ્ણચતુર્થ્યા યન્ માહાત્મ્યં મલમાસકે ।
શ઼ૃણોતિ યસ્તુ પઠતિ સ ઈપ્સિતમવાપ્નુયાત્ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે મલમાસકૃષ્ણપક્ષચતુર્થી-
માહાત્મ્યવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૪.૩૨

## ૪.૩૩ શમીમૂલચતુર્થીવ્રતાચરણવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શમીમૂલે ચ યસ્તિષ્ઠેચ્ચતુર્થ્યાં મુનિસત્તમ ।
સઙ્કષ્ટ્યાં તસ્ય માહાત્મ્યં વદ મે કરુણાનિધે ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
ઇતિહાસં પ્રવક્ષ્યામિ પુરાતનભવં નૃપ ।
સર્વસિદ્ધિકરં પૂર્ણં શ્રવણાત્ પઠનાન્નૃણામ્ ॥ ૨॥

પાઞ્ચાલે બ્રાહ્મણઃ કશ્ચિદત્રિગોત્રસમુદ્ભવઃ ।
પૂર્વકર્મવિપાકેન કુષ્ઠયુક્તો બભૂવ હ ॥ ૩॥

નાનાક્ષતસમાકીર્ણઃ પ્રસ્રવત્ પૂયશોણિતઃ ।
કીટકૈઃ સર્વતો વ્યાપ્તો હ્યન્ધઃ કુબ્જોઽભવન્નૃપ ॥ ૪॥

તં દૃષ્ટ્વા તાદૃશં પુત્રં પિતા પરમદુઃખિતઃ ।
અત્રિં જગામ શરણં તં પપ્રચ્છ પ્રણમ્ય સઃ ॥ ૫॥

તેનાપિ કથિતં રાજન્ શમીમૂલે સ્થિતો ભવેત્ ।
ચતુર્થીં સઙ્કટીં કુર્યાત્તદા પાપાત્ પ્રમુચ્યતે ॥ ૬॥

તતઃ સોઽપિ સ્વપુત્રં તં શમીમૂલે મહીપતે ।
સમાનાય્ય બબન્ધૈવ દામ્ના સર્વાર્થસાધકઃ ॥ ૭॥

સૂર્યોદયાત્ સમારભ્ય યાવચ્ચન્દ્રોદયોઽભવત્ ।
તાવત્તત્ર મહારોગી સોઽતિષ્ઠદ્બન્ધનાકુલઃ ॥ ૮॥

તતઃ પિત્રા સમાનીતઃ સ્વગૃહે સોઽપિ તત્ક્ષણાત્ ।

નેત્રયુક્તો બભૂવાઽથ રોગાદિભિર્વિવર્જિતઃ ॥ ૯॥

કુબ્જતાહીનરૂપં તં સંસ્થિતં વિગતજ્વરમ્ ।
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં વિપ્રાઃ સર્વે વિસિસ્મિરે ॥ ૧૦॥

તતઃ સોઽપિ ગણેશાનમભજન્નિત્યમાદરાત્ ।
ચતુર્થ્યાં કૃષ્ણપક્ષે વૈ શમીમૂલે સ્મ તિષ્ઠતિ ॥ ૧૧॥

અન્તે શાન્તિસમાયુક્તો બ્રહ્મભૂતો બભૂવ હ ।
એવં તિષ્ઠેચ્છમીમૂલે સોઽસાધ્યં કુરુતે વશમ્ ॥ ૧૨॥

અન્યચ્છૃણુ મહીપાલ માહાત્મ્યં સર્વસિદ્ધિદમ્ ।
ચોરઃ કશ્ચિન્ મહાન્ પાપી નગરે સ ગતોઽભવત્ ॥ ૧૩॥

સ્ફોટયિત્વા ગૃહં કિઞ્ચિત્તેન તત્ર પ્રવિશ્ય સઃ ।
ધનં ગૃહીત્વા નિર્યાતો નરૈર્દૃષ્ટઃ પપાલ સઃ ॥ ૧૪॥

જનૈઃ કોલાહલસ્તત્ર કૃતઃ પરમદારુણઃ ।
શ્રુત્વા રાજ્ઞો યયુર્દૂતાઃ શસ્ત્રહસ્તા મહાબલાઃ ॥ ૧૫॥

(Page ખં. ૪ અ. ૩૩ પાન ૯૧)
જ્ઞાત્વા વૃત્તાન્તમુગ્રં તે ધાવિતાઃ ક્રોધસંયુતાઃ ।
વેગેન તં મહાચૌરં જઘ્નુઃ શસ્ત્રપ્રહારતઃ ॥ ૧૬॥

છિન્નાઙ્ગં પતિતં ચૌરં દૂતાઃ સઙ્ગૃહ્ય દારુણમ્ ।
તં બબન્ધુઃ શમીવૃક્ષે તતો રાજાનમાયયુઃ ॥ ૧૭॥

સમાગતા ચતુર્થી સા તત્રાઽકસ્માન્ મહીપતે ।
કૃષ્ણા સોઽપિ મહાચૌરો શમીમૂલસ્થિતોઽભવત્ ॥ ૧૮॥

પઞ્ચમ્યાં ક્ષતહીનાઙ્ગં ચૌરં સર્વત્ર શોભનમ્ ।
સઞ્જાતં રાજદૂતાસ્તે જ્ઞાત્વા રાજ્ઞે ન્યવેદયન્ ॥ ૧૯॥

રાજા તત્ર સમાગમ્ય તં પ્રણમ્ય પુરઃસ્થિતઃ ।
એતસ્મિન્નન્તરે તત્ર વિમાનં સહસાઽઽગતમ્ ॥ ૨૦॥

તં તત્રાગૃહ્ય નિક્ષિપ્ય ગણાન્ શુણ્ડાવિરાજિતાન્ ।
તાન્ પ્રણમ્ય સ પપ્રચ્છ રાજર્ષિર્ગન્તુમુત્સુકાન્ ॥ ૨૧॥

મહાસેન ઉવાચ ।
ભો ભો ગણપતેર્દૂતાઃ કિમનેન કૃતં મહત્ ।

વદેત કરુણાયુક્તાસ્તદ્વયં કરવામહૈ ॥ ૨૨॥

ગાણેશા ઊચુઃ ।
કૃષ્ણપક્ષે ચતુર્થ્યાં યઃ શમીમૂલે જપેન્મનુમ્ ।
તિષ્ઠેત્ સૂર્યોદયાદ્યાવત્તથા ચન્દ્રોદયો ભવેત્ ॥ ૨૩॥

નિરાહારઃ સ વિઘ્નેશં પૂજયેત્ વ્રતકારકઃ ।
પશ્ચાદ્વિપ્રાંશ્ચ સમ્ભોજ્ય સ્વયં ભુઞ્જીત વાગ્યતઃ ॥ ૨૪॥

રાત્રૌ જાગરણં કુર્યાત્ પઞ્ચમ્યાં પૂજનં પુનઃ ।
પ્રકુર્યાત્ ગણરાજસ્ય સ ઈપ્સિતમવાપ્નુયાત્ ॥ ૨૫॥

ફલયુક્તઃ સદ્ય એવ ભવત્યત્ર ન સંશયઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતઃ સ જાયતે ॥ ૨૬॥

એવમુક્ત્વા ગતા દૂતાશ્ચૌરેણ સહિતા નૃપ ।
ચૌરો વિઘ્નેશ્વરં દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૨૭॥

તતો રાજા મહાભાગો ગણેશભજને રતઃ ।
સ ચતુર્થ્યાં શમીમૂલે તિષ્ઠન્નિયમસંયુતઃ ॥ ૨૮॥

તતો રાજા ગતિં લેભે ત્રિલોક્યાં વ્રતપુણ્યતઃ ।
બ્રહ્માદીનાં સભાયાં સ ગત્વાઽતિષ્ઠત્ સ્વયેચ્છયા ॥ ૨૯॥

પુનઃ સ્વનગરે રાજા ચમ્પાવત્યાં જગામ હ ।
એવં સર્વત્રગો ભૂત્વા રરાજે રાજમણ્ડલે ॥ ૩૦॥

અન્તે સર્વજનૈ રાજા નગરસ્થૈર્મહામતે ।
જગામ વિઘ્નરાજં તં બ્રહ્મભૂતો બભૂવ હ ॥ ૩૧॥

ઇદં તે મુખ્યમાહાત્મ્યં શમીમૂલસ્થિતેર્મહત્ ।
ચતુર્થ્યાં કથિતં રાજન્ સઙ્કષ્ટ્યાં સર્વસિદ્ધિદમ્ ॥ ૩૨॥

શ઼ૃણુયાદ્યઃ પઠેદ્વા સ સદ્ય એવ ફલં લભેત્ ।
ઈપ્સિતં ગણરાજસ્ય પ્રસાદાન્નાત્ર સંશયઃ ॥ ૩૩॥

એવં નાના જના રાજન્નાન્ધ્યદોષાદિવર્જિતાઃ ।
બભૂવુશ્ચરિતં તેષાં મયા વક્તું ન શક્યતે ॥ ૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શમીમૂલચતુર્થીવ્રતાચરણવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૩

(Page ખં. ૪ અ. ૩૪ પાન ૯૨)

## ૪.૩૪ વસિષ્ઠદશરથસંવાદસમાપ્તિવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દશરથ ઉવાચ ।
શ્રાવણાદિષુ માસેષુ લડ્ડ્વાદીન્ યસ્તુ ભક્ષતિ ।
તસ્ય વિધિયુતં વિપ્ર માહાત્મ્યં વદ સર્વદમ્ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
મનોર્વૈવસ્વતસ્યૈવ પુત્ર ઇક્ષ્વાકુસંજ્ઞકઃ ।
રાજ્યલોભી કનિષ્ઠઃ સન્ વ્રતં ચકાર સિદ્ધિદમ્ ॥ ૨॥

બભક્ષ શ્રાવણે કૃષ્ણસઙ્કષ્ટ્યાં પઞ્ચખાદ્યજાન્ ।
લડ્ડુકાન્ સપ્ત ભાવેન વ્રતસાધનતત્પરઃ ॥ ૩॥

દધિભક્ષણમાત્રં સ ભાદ્રે કૃષ્ણે ચકાર હ ।
આશ્વિને નિર્જલં તદ્વચ્ચકાર વ્રતમદ્ભુતમ્ ॥ ૪॥

કાર્તિકે દુગ્ધભુક્ રાજાઽતિષ્ઠત્ સ્વનિયમે રતઃ ।
માર્ગશીર્ષે જલં પીત્વાઽભજત્તં ગણનાયકમ્ ॥ ૫॥

પૌષે ગોમૂત્રમાત્રં તુ વ્રતં પીત્વા સમાચરત્ ।
માઘે શુક્લતિલાન્ રાજા બભક્ષ વ્રતકારણાત્ ॥ ૬॥

ફાલ્ગુને શર્કરાયુક્તં માનવોઽભક્ષયદ્ ઘૃતમ્ ।
ચૈત્રે તદ્વત્ પઞ્ચગવ્યં પૂજયિત્વા વિનાયકમ્ ॥ ૭॥

વૈશાખે પદ્મબીજં સ બભક્ષ વ્રતધારકઃ ।
જ્યેષ્ઠે ઘૃતં ગવાં ભક્ષંશ્ચકાર વ્રતમુત્તમમ્ ॥ ૮॥

આષાઢે મધુમાત્રં સ બભક્ષ નિયમે રતઃ ।
ચન્દ્રોદયે ગણેશાનં પૂજયિત્વા વિધાનતઃ ॥ ૯॥

તતસ્તસ્ય વ્રતસ્યૈવ પ્રભાવેણ મહામતે ।
સુદ્યુમ્નો મનુપુત્રો ય ઇલો જ્યેષ્ઠોઽભવન્નૃપ ॥ ૧૦॥

તતો મુનિભિરાદ્યં તં રાજાનં સ ચકાર હ ।
મનુરિક્ષ્વાકુમેવં તુ સાર્વભૌમં મહાદ્યુતિમ્ ॥ ૧૧॥

એવં ત્વસાધ્યકં રાજન્નિચ્છેદ્વૈ યદિ માનવઃ ।
ધર્મમાર્ગેણ તત્ સોઽપિ લભતે નાત્ર સંશયઃ ॥ ૧૨॥

એવં નાના જના રાજન્ વ્રતપુણ્યપ્રભાવતઃ ।
લબ્ધ્વાંઽતે બ્રહ્મભૂતાશ્ચ બભૂવુર્ભૂમિમણ્ડલે ॥ ૧૩॥

અતસ્ત્વં રાજશાર્દૂલ પાપરૂપોઽસિ સામ્પ્રતમ્ ।
તવ રાજ્યે વ્રતં નષ્ટં નૃપાધમ ન બુદ્ધ્યસે ॥ ૧૪॥

જનૈઃ સહ વ્રતં તસ્માત્ કુરુષ્વ ત્વં ભવિષ્યસિ ।
પુત્રયુક્તશ્ચ વિઘ્નેશમન્તે ગચ્છસિ નિશ્ચિતમ્ ॥ ૧૫॥

મુદ્ગલ ઉવાચ ।
પ્રણમ્ય તં દશરથો મહારાજો જગામ હ ।
સ્વપુરે જનસંયુક્તશ્ચકાર વ્રતમુત્તમમ્ ॥ ૧૬॥

તતો ભૂપેન સર્વત્ર પ્રશસ્તં તદ્વ્રતં કૃતમ્ ।
ચક્રુઃ સર્વજના ભૂમૌ વ્રતં ગાણેશ્વરં મહત્ ॥ ૧૭॥

વ્રતપુણ્યપ્રભાવેણ વિષ્ણુઃ સાક્ષાદ્બભૂવ હ ।
ચતુર્ધાઽઽત્માનમાભજ્ય પુત્રસ્તસ્ય મહાત્મનઃ ॥ ૧૮॥

રામશ્ચ ભરતો રાજા લક્ષ્મણઃ શત્રુસૂદનઃ ।
પુત્રાશ્ચત્વાર એવં તે બભૂવુર્બલસંયુતાઃ ॥ ૧૯॥

અન્તે જગામ વિઘ્નેશં દશરથઃ પ્રતાપવાન્ ।
લોકા દુઃખવિહીનાશ્ચ બ્રહ્મભૂતા બભૂવિરે ॥ ૨૦॥

વસિષ્ઠર્ષેર્દશરથસ્યેમં વિપ્રસ્ય ધીમતઃ ।
સંવાદં વ્રતહેતું તુ યઃ શ ૃણોતિ પઠેન્નરઃ ॥ ૨૧॥

તસ્મૈ વિઘ્નેશ્વરઃ સાક્ષાદ્દદાતિ ફલમુત્તમમ્ ।
પુત્રપૌત્રાદિસંયુક્તં ધનધાન્યસમન્વિતમ્ ॥ ૨૨॥

નાનારોગવિહીનત્વમૈશ્વર્યાદિયુતં મહત્ ।
અન્તે ગણપતૌ લીનં કરોત્યત્ર ન સંશયઃ ॥ ૨૩॥

ચતુર્થ્યાશ્ચરિતં પૂર્ણં કથિતં તે પ્રજાપતે ।
શ્રોતુમિચ્છા પુનઃ કિં તે વર્તતે વદ સામ્પ્રતમ્ ॥ ૨૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

ચતુર્થે ખણ્ડે ગજાનનચરિતે વસિષ્ઠદશરથસંવાદસમાપ્તિવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૪
(Page ખં. ૪ અ. ૩૫ પાન ૯૩)

## ૪.૩૫ ચતુર્થ્યુદ્યાપનનિરૂપણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ઉદ્યાપનં વ્રતસ્યાસ્ય વદ ત્વં મુનિસત્તમ ।
યેન સાઙ્ગં ફલં સર્વં લભતે વ્રતકારકઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
ઉદ્યાપનં પ્રજાનાથ વ્રતસ્યાદૌ મતં બુધૈઃ ।
અથવા વર્ષમધ્યે તત્ કર્તવ્યં વ્રતકારિણા ॥ ૨॥

અથવા ભાદ્રમાસે વૈ શુક્લાયાં ચ પ્રજાપતે ।
ઉદ્યાપનં પ્રકર્તવ્યં કૃષ્ણાયાં માઘમાસકે ॥ ૩॥

મહામણ્ડપકં કુર્યાત્ કદલીસ્તમ્ભમણ્ડિતમ્ ।
નાનાશોભાસમાયુક્તં વિભવે સતિ માનદ ॥ ૪॥

વિત્તશાઠ્યં ન કુર્યાત્ સ યથાવિભવમાચરેત્ ।
છત્રાઽઽદર્શાદિભિઃ શોભાં દીપમાલાવિરાજિતમ્ ॥ ૫॥

મણિમુક્તાદિકૈઃ પૂર્ણં ભૂષણૈશ્ચ વિશેષતઃ ।
યત્ર તત્ર યથાયોગ્યં પ્રકુર્યાદ્વ્રતકારકઃ ॥ ૬॥

મધ્યાહ્નસમયે તસ્યાઃ શુક્લાયાઃ કથિતં પ્રભો ।
ચન્દ્રોદયે ચ કૃષ્ણાયાશ્ચતુર્થ્યાઃ પૂજનં ચરેત્ ॥ ૭॥

ગોમયેન પ્રલિપ્યાઽથ ધાન્યરાશિં પ્રકલ્પયેત્ ।
તન્મધ્યેઽષ્ટદલં પદ્મં કુર્યાત્તદ્ગુરુણા સ્વયમ્ ॥ ૮॥

તત્ર સંસ્થાપ્ય સૌવર્ણં કલશં તામ્રજં તથા ।
રૌપ્યં વા મૃન્મયં દક્ષ વસ્ત્રયુગ્મેન વેષ્ટયેત્ ॥ ૯॥

તસ્યોપરિ સુવર્ણસ્ય પાત્રં સ્થાપ્ય મહામતિઃ ।
વસ્ત્રં તતો ગણેશસ્ય યન્ત્રં કુર્યાદ્વિચક્ષણઃ ॥ ૧૦॥

તત્ર ગણપતેશ્ચૈવ મૂર્તિર્ધાતુવિનિર્મિતા ।

સર્વાવયવસંયુક્તા ભૂષણૈ રાજિતા ભવેત્ ॥ ૧૧॥

દ્વિજોત્તમશ્ચ સંસ્થાપ્ય પૂજયેત્તાં યથાવિધિ ।
બ્રાહ્મણાન્ વરયેચ્છુદ્ધાનેકવિંશતિસઙ્ખ્યકાન્ ॥ ૧૨॥

ગણાનાં ત્વેતિ મન્ત્રસ્ય જપં કુર્યાદ્વિશેષતઃ ।
તતો હોમં પ્રકુર્વીત સહસ્રં વા તદર્ધકમ્ ॥ ૧૩॥

અષ્ટોત્તરશતં વાઽપિ તથા જપદશાંશકમ્ ।
ગીતવાદ્યપુરાણાનિ વેદાધ્યયનમેવ ચ ॥ ૧૪॥

નાનાશાસ્ત્રપ્રવાદાંશ્ચ કુર્વન્તુ બ્રાહ્મણાસ્તતઃ ।
યત્ર તત્ર ગણેશસ્ય કથાઃ સઙ્કથયન્તુ તે ॥ ૧૫॥

તતઃ પૂર્ણાહુતિં કુર્યાદ્વસોર્ધારાં સ પાતયેત્ ।
બલિદાનં તતઃ કુર્યાત્તતો વાયનકં ચરેત્ ॥ ૧૬॥

એકવિંશતિપક્વાન્નૈરેકવિંશતિસઙ્ખ્યકૈઃ ।
નૈવેદ્યૈર્બ્રાહ્મણાન્ સમ્ભોજ્યાર્થયેત્તાન્ વિશેષતઃ ॥ ૧૭॥

દક્ષિણાં વિપુલાં દત્ત્વા સપત્નીકાન્ પ્રતોષયેત્ ।
યોષિદ્ભ્યઃ કઞ્ચુકીર્દદ્યાદ્ભૂષણાનિ મહામતિઃ ॥ ૧૮॥

કૃષ્ણાયાં ચ ચતુર્થ્યાં સ ચન્દ્રાયાર્ઘ્યં પ્રદાપયેત્ ।
શુક્લાયાં તત્તથા દક્ષ ચરેચ્ચન્દ્રાર્ઘ્યવર્જિતમ્ ॥ ૧૯॥

આદૌ સ તિથયે દદ્યાત્ પશ્ચાદ્વિઘ્નેશ્વરાય વૈ ।
તતશ્ચન્દ્રાય તન્ મન્ત્રૈરર્ઘ્યં મન્ત્રસમન્વિતમ્ ॥ ૨૦॥

તિથીનાં માતૃરૂપે ત્વં દેવિ સર્વાર્થદાયિનિ ।
ગૃહાણાર્ઘ્યં મયા દત્તં ચતુર્થ્યૈ તે નમો નમઃ ॥ ૨૧॥

ગજાનન નમસ્તુભ્યં નાનાસિદ્ધિપ્રદાયિને ।
ગૃહાણાર્ઘ્યં બુદ્ધિપતે મયા દત્તં શુભપ્રદ ॥ ૨૨॥

અત્રિગોત્રસમુદ્ભૂત ગણેશપ્રીતિવર્ધન ।
ગૃહાણાર્ઘ્યં મયા દત્તં રોહિણ્યામૃતધારક ॥ ૨૩॥

કૃષ્ણપક્ષે સદા રાત્રૌ ભોજનં સ સમાચરેત્ ।
શુક્લપક્ષે ચ પઞ્ચમ્યાં બ્રાહ્મણાદીંસ્તુ ભોજયેત્ ॥ ૨૪॥

ચતુર્થ્યાં જાગરં કુર્યાત્ ગણેશકથયાન્વિતઃ ।
પઞ્ચમ્યાં પૂર્વવત્ પૂજ્ય નૈવેદ્યાદ્યૈર્મહામતિઃ ॥ ૨૫॥

દીનાન્ધકૃપણેભ્યશ્ચ દદ્યાદન્નાદિકં તથા ।
(Page ખં. ૪ અ. ૩૬ પાન ૯૪)
બ્રાહ્મણેભ્યો વિશેષેણ દક્ષિણાં દાપયેન્નરઃ ॥ ૨૬॥

સર્વાન્ સમ્ભોજ્ય દાનેન તોષયેદ્દેવસન્નિધૌ ।
ગણેશદૃઢભક્તિં સ યાચયેત્તેભ્ય આદરાત્ ॥ ૨૭॥

તતઃ સોપસ્કરાં મૂર્તિં દદ્યાત્ સ્વગુરવે સ્વયમ્ ।
એકવિંશતિવિપ્રેભ્યઃ કલશાન્ દાપયેત્તતઃ ॥ ૨૮॥

સન્તોષ્યોદારધીઃ સર્વાન્ સ ભાવેન ક્ષમાપયેત્ ।
તતો ગણપતિં નિત્યં ભજેતાનન્યચેતસા ॥ ૨૯॥

એવમુદ્યાપનં કુર્યાદ્વ્રતસ્યાસ્ય મહામતિઃ ।
સ સમ્પૂર્ણફલં ભુક્ત્વા બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૩૦॥

વક્તું ન શક્યતે દક્ષ માહાત્મ્યં ચ વ્રતોદ્ભવમ્ ।
સોદ્યાપનં વિશેષેણ કથિતં તે યથામતિ ॥ ૩૧॥

ઇદં ચતુર્થીજં દક્ષ ચરિતં સંશ◌ૃણોતિ ચેત્ ।
પઠેદ્વા તસ્ય વિઘ્નેશો માનસેપ્સિતદો ભવેત્ ॥ ૩૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચતુર્થ્યુદ્યાપનનિરૂપણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૪.૩૫

## ૪.૩૬ લોભાસુરવરપ્રાપ્તિવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
માહાત્મ્યં યચ્છ્રુતં મુખ્યં ચતુર્થીસમ્ભવં મહત્ ।
કૃતકૃત્યશ્ચ તેનાઽહં સઞ્જાતો મુનિસત્તમ ॥ ૧॥

અધુના વદ માહાત્મ્યં લોભાસુરનિબર્હણે ।
ગજાનનસ્ય યોગીશ ચરિત્રં સર્વસિદ્ધિદમ્ ॥ ૨॥

મુદ્ગલ ઉવાચ ।

ઇતિહાસં પ્રવક્ષ્યામિ પુરાતનભવં પ્રભો ।
સર્વસિદ્ધિપ્રદં દક્ષ શ્રવણેન ન સંશયઃ ॥ ૩॥

એકદા શૈલવર્યે તુ કૈલાસે શઙ્કરઃ સ્થિતઃ ।
પાર્વત્યા સ્વગણૈઃ સાર્ધં દેવૈર્મુનિભિરાવૃતઃ ॥ ૪॥

તત્રાઽઽજગામ પૌલસ્ત્યઃ કુબેરો નિધિસંયુતઃ ।
પ્રણમ્ય ગિરિજાયુક્તં શઙ્કરં પુરતઃ સ્થિતઃ ॥ ૫॥

સમીપે શઙ્કરસ્યૈવ ગત્વા ચામરસંયુતઃ ।
અસેવત મહાત્માનં ભક્તિયુક્તેન ચેતસા ॥ ૬॥

અકસ્માદ્દૈવયોગેન દૃષ્ટ્વા પર્વતનન્દિનીમ્ ।
રૂપેણાપ્રતિમાં સર્વાવયવૈઃ શોભનૈર્યુતામ્ ॥ ૭॥

સાક્ષાન્ માયામયીં શક્તિં મોહયુક્તો બભૂવ હ ।
કામબાણાભિભૂતઃ સન્નપશ્યત્તાં સુવિહ્વલઃ ॥ ૮॥

સકામદૃષ્ટિસંયુક્તં પશ્યન્તં તં ધનાધિપમ્ ।
દૃષ્ટ્વા કોપસમાયુક્તા બભૂવે શઙ્કરપ્રિયા ॥ ૫॥

ક્રોધેન વક્રનેત્રં સા જ્વાલયામાસ તત્ક્ષણાત્ ।
કુબેરસ્ય મહાદેવી સોઽપિ શોકાકુલોઽભવત્ ॥ ૧૦॥

અતિવિહ્વલગાત્રત્વાત્ પ્રાસ્કન્દદ્ વીર્યમુત્તમમ્ ।
ધનપસ્યાઽત્ર પુત્રોભૂત્ પપાત શોભયા યુતઃ ॥ ૧૧॥

તતઃ સ લજ્જયા યુક્તઃ પ્રણનામ મહેશ્વરીમ્ ।
નિયમ્યાત્માનમાનિન્ધ તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ॥ ૧૨॥

તતઃ સા શઙ્કરેણૈવ સાન્ત્વિતા જગદમ્બિકા ।
પિઙ્ગાક્ષં તં ચકારાઽપિ પુત્રભાવપ્રદર્શિની ॥ ૧૩॥

જગદમ્બા લોભનાર્થં કુબેરોઽભૂત્ સમુદ્યતઃ ।
માતૃગામિસ્વરૂપત્વાત્ પુત્રસ્તસ્ય પ્રતાપવાન્ ॥ ૧૪॥

(Page ખં. ૪ અ. ૩૬ પાન ૯૫)
લોભ એવ સમાખ્યાતં નામ તસ્ય દ્વિજૈસ્તતઃ ।
સઙ્ગૃહ્ય તં ગૃહં દેવો ધનદઃ પ્રજગામ હ ॥ ૧૫॥

કુબેરભવને સંસ્થં લોભં તં નારદો મુનિઃ ।

જ્ઞાત્વા જગામ પાતાલે વીણાગાનપરાયણઃ ॥ ૧૬॥

તારં પાતાલસંસ્થં તં દાનવાનાં હિતૈષિણમ્ ।
ઇન્દ્રેણ નિર્જિતં જ્ઞાત્વા નારદઃ પ્રયયૌ મુનિઃ ॥ ૧૭॥

તારઃ સમુત્થિતો વિપ્રં પ્રણનામ મુદા યુતઃ ।
પપ્રચ્છાઽઽપૂજ્ય વૃત્તાન્તં દાનવાનાં હિતાવહમ્ ॥ ૧૮॥

તાર ઉવાચ ।
ઇન્દ્રેણાઽહં જિતો વિપ્ર દાનવા મર્દિતા ભૃશમ્ ।
અધુના કિમુ કુર્યાં તદ્વદ મે મુનિસત્તમ ॥ ૧૯॥

નારદ ઉવાચ ।
અલકાયાં કુબેરસ્ય પુત્રોઽભૂદ્વીર્યપાતતઃ ।
લોભસ્તત્ર સમાગત્ય હર ત્વં પુત્રમાદરાત્ ॥ ૨૦॥

તં પાલય મહાભાગ તેન તે વાઞ્છિતં મહત્ ।
ભવિષ્યતિ ન સન્દેહો મમ તસ્માદ્વચઃ કુરુ ॥ ૨૧॥

એવમુક્ત્વા મહાયોગી નારદોઽતર્હિતોઽભવત્ ।
તારઃ સ્મ હર્ષિતોઽત્યન્તં મેને સ કૃતકૃત્યતામ્ ॥ ૨૨॥

માયયા દાનવાધીશસ્ત્વલકાયાં જગામ હ ।
ગૃહીત્વા લોભકં પુત્રં સુપ્તં સ્વગૃહમાગમત્ ॥ ૨૩॥

લોભં કેનચિદાગત્ય હૃતં જ્ઞાત્વા ધનાધિપઃ ।
ન શોકં માનસે સોઽપિ પ્રચક્રે દુર્નિમિત્તજમ્ ॥ ૨૪॥

તારઃ પુત્રં સમાનીય પાલયામાસ હર્ષતઃ ।
બાલક્રીડનકૈર્યુક્તં તં દૃષ્ટ્વા વિસ્મિતોઽભવત્ ॥ ૨૫॥

ઉત્પાટ્ય બાલકૈર્વૃક્ષાન્ રેમે લોભઃ પ્રતાપવાન્ ।
તલપ્રહારવેગેન દારુણાં બિભિદે શિલામ્ ॥ ૨૬॥

એવં નાનાવિધં કર્માસ્ય દૃષ્ટ્વા દાનવોત્તમાઃ ।
હર્ષયુક્તા બભૂવુસ્તે મેનિરે કૃતકૃત્યતામ્ ॥ ૨૭॥

તતઃ પઞ્ચમવર્ષે સ ચકાર વ્રતબન્ધનમ્ ।
વેદાનધ્યાપયામાસ શુક્રશિષ્યૈર્મહાબલઃ ॥ ૨૮॥

સ આસુરીં મહામાયાં સર્વદેવવિમોહિનીમ્ ।

વિદ્યામભ્યસ્ય લોભસ્તુ શસ્ત્રાસ્ત્રે પારગોઽભવત્ ॥ ૨૯॥

તતઃ પ્રણમ્ય વિપેન્દ્રં શુક્રં સર્વવિદાંવરમ્ ।
પપ્રચ્છ સર્વદં પૂર્ણમુપાયં લોભ આદરાત્ ॥ ૩૦॥

તતઃ પઞ્ચાક્ષરીં વિદ્યાં દદૌ તસ્મૈ મહામુનિઃ ।
શૈવીં વિધિયુતાં લોભસ્તં પ્રણમ્ય યયૌ વનમ્ ॥ ૩૧॥

તત્ર ગત્વા તપસ્તેપે શિવં ધ્યાત્વા મહાસુરઃ ।
જપં ચકાર ભાવેન નિરાહારપરાયણઃ ॥ ૩૨॥

ભસ્માઙ્ગલેપસંયુક્તઃ શૈવમાર્ગપરાયણઃ ।
તોષયામાસ યત્નેન શઙ્કરં સર્વદં પરમ્ ॥ ૩૩॥

એવં તપસિ લોભઃ સ સંસ્થિતો બહુવાસરમ્ ।
તતસ્તસ્ય શરીરેઽપિ વલ્મીકો વવૃધે મહાન્ ॥ ૩૪॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નઃ શઙ્કરઃ પ્રભુઃ ।
આયયૌ તં વરં દાતું પાર્વત્યા સહ શૂલભૃત્ ॥ ૩૫॥

સમાગતં મહેશાનં ન બુબોધ સ દાનવઃ ।
તતસ્તં જલમાસિચ્ય શમ્ભુઃ શક્તં ચકાર હ ॥ ૩૬॥

તતઃ શમ્ભું સમાલોક્ય હર્ષયુક્તેન ચેતસા ।
જગાદ તં પ્રણમ્યાદાવુત્થિતો દાનવાધિપઃ ॥ ૩૭॥

લોભાસુર ઉવાચ ।
ધન્યં મેઽદ્ય તપો મન્ત્રો ધન્યૌ મે જનકૌ પ્રભો ।
જન્મ જ્ઞાનાદિકં સર્વં યેન દૃષ્ટો મહેશ્વરઃ ॥ ૩૮॥

કિં સ્તૌમિ ત્વાં મહેશાન સાક્ષાદ્બ્રહ્મ સનાતનમ્ ।
તથાપિ સ્તૌમિ દેવેશ ત્વદ્દર્શનસ્ફુરન્મતિઃ ॥ ૩૯॥

નમસ્તે વિશ્વનાથાય સર્વાન્તર્યામિણે નમઃ ।
(Page ખં. ૪ અ. ૩૭ પાન ૯૬)
શઙ્કરાય શિવાયૈવ હ્યનન્તગુણરાશયે ॥ ૪૦॥

ત્રિનેત્રાય મહાદેવ શક્તિયુક્તાય શમ્ભવે ।
નિર્ગુણાય ગુણાનાં તે ચાલકાય નમો નમઃ ॥ ૪૧॥

અમેયશક્તયે તુભ્યં ગિરીશાય વૃષધ્વજ ।

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે ત્રિધારૂપાય વૈ નમઃ ॥ ૪૨॥

અકર્તુમન્યથા કર્તું કર્તું શક્તાય તે નમઃ ।
સદા મોહવિહીનાય મૃડાય સતતં નમઃ ॥ ૪૩॥

સ્વાધીનાય પરેશાય સહજે ખેલકારિણે ।
શૂલહસ્તાય દેવાનાં પતયે તે નમો નમઃ ॥ ૪૪॥

કૈલાસવાસિને તુભ્યં ભસ્મલેપકરાય વૈ ।
દિગમ્બરાય સર્વેભ્યઃ સર્વદાય નમો નમઃ ॥ ૪૫॥

એવં સ્તુત્વા મહેશાનં તૂષ્ણીં ભાવેન સંસ્થિતઃ ।
લોભાસુરઃ પ્રસન્નાત્મા સાશ્રુકઃ સ કૃતાઞ્જલિઃ ॥ ૪૬॥

તમુવાચ મહાદેવો વરં વૃણુ હૃદીપ્સિતમ્ ।
દાસ્યામિ તપસા સ્તોત્રેણ તુષ્ટો દાનવોત્તમ ॥ ૪૭॥

ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪૮॥

યઃ પઠિષ્યતિ દૈત્યેન્દ્ર શ્રાવયિષ્યતિ વા નરઃ ।
શ્રોષ્યતે સ લભેત્ સદ્યો વાઞ્છિતં મત્પ્રિયઃ સદા ॥ ૪૯॥

શ્રુત્વા શઙ્કરવાક્યં સ તં જગાદ મહાસુરઃ ।
હર્ષેણોત્ફુલ્લનેત્રશ્ચ ભક્ત્યા વિનયસંયુતઃ ॥ ૫૦॥

લોભાસુર ઉવાચ ।
વરદોઽસિ યદિ ત્વં ચ તદા ભક્તિં ચ તે દૃઢામ્ ।
દેહિ રાજ્યં મહાદેવ બ્રહ્માણ્ડસ્ય વિશેષતઃ ॥ ૫૧॥

નાનૈશ્વર્યસમાયુક્તમારોગ્યાદિસમન્વિતમ્ ।
મનસીપ્સિતમેવં મે સિદ્ધ્યતુ ત્વદનુગ્રહાત્ ॥ ૫૨॥

મનોવાણીમયં યચ્ચ તસ્માન્ મૃત્યુર્ન મે ભવેત્ ।
સદાનન્દસમાયુક્તં માં કુરુષ્વ કૃપાનિધે ॥ ૫૩॥

લોભાસુરસ્ય વાક્યં વૈ શ્રુત્વા ચકિતમાનસઃ ।
શઙ્કરસ્તપસા બદ્ધસ્તથેતિ તમુવાચ હ ॥ ૫૪॥

અન્તર્ધાય સ્વમાત્માનં કૈલાસસ્થો બભૂવ હ ।
લોભાસુરઃ પ્રસન્નાત્મા સ્વગૃહં પ્રત્યપદ્યત ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે લોભાસુરવરપ્રાપ્તિવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૪.૩૬

## ૪.૩૭ લોભાસુરસ્યેન્દ્રપદપ્રાપ્તિવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
લોભાસુરઃ સમાગત્ય પિતરં માતરં તતઃ ।
પ્રણમ્ય સુહૃદઃ સર્વાન્ યથાયોગ્યં ચકાર હ ॥ ૧॥

મહિષાસુરપુત્રીં સ ઉવાહ રૂપશાલિનીમ્ ।
તૃષ્ણાં ગુણયુતાં સોઽપિ તયા સંહર્ષિતોઽભવત્ ॥ ૨॥

એવં નાના વિભોગેન સુહૃદાનન્દકારકઃ ।
બભૂવ બલસંયુક્તો મદેન ભૃશમોહિતઃ ॥ ૩॥

મહ્યાં સમાગતઃ સોઽપિ દાનવૈઃ પરિવારિતઃ ।
નગરં નિર્મમે તત્ર સદા વિષયવર્ધનમ્ ॥ ૪॥

ચકાર નામ તસ્યાપિ સુખદં દાનવેરિતઃ ।
તતો દિગ્ભ્યઃ સમાયાતા નાના દૈત્યગણાઃ પુરે ॥ ૫॥

(Page ખં. ૪ અ. ૩૭ પાન ૯૭)
તતો લોભોઽસુરૈઃ સર્વૈઃ સ્વયં ગત્વા મહામુનિમ્ ।
શુક્રં સમાનયત્તત્ર પ્રણમ્ય ભાવસંયુતઃ ॥ ૬॥

શુક્રેણ પ્રેરિતા દૈત્યા ગતાસ્તત્ર મહાપુરે ।
દેવાન્તકશ્ચ વૃત્રશ્ચ બલિર્જૃમ્ભઃ પ્રતાપવાન્ ॥ ૭॥

નરાન્તકઃ પ્રહેતિશ્ચ હેતિર્વિપ્રચિતિસ્તથા ।
ઇત્યાદ્યા બહવશ્ચાન્યે મિલિતા અભવન્ પ્રભો ॥ ૮॥

બ્રાહ્મણૈઃ કારયામાસ તતઃ શુક્રોઽભિષેચનમ્ ।
દૈત્યાદીનાં મહારાજ્યે સ્થાપયામાસ તં મુનિઃ ॥ ૯॥

સર્વે સંહૃષ્ટકાસ્તત્ર બભૂવુર્દાનવોત્તમાઃ ।
તતઃ સ્વસ્વગૃહેષ્વેતેઽગમન્ ઘોષકરા ભૃશમ્ ॥ ૧૦॥

તતો બહૌ ગતે કાલેઽસુરો લોભઃ પ્રતાપવાન્ ।
આહ્વયામાસ દૂતૈસ્તાન્ દાનવાન્ બલસંયુતાન્ ॥ ૧૧॥

આજ્ઞામાત્રેણ તસ્યૈવ સમાજગ્મુર્બલાન્વિતાઃ ।
અસુરા ભયદાઃ સર્વેઽસુરં લોભં પ્રજાપતે ॥ ૧૨॥

લોભાસુરોઽસુરાન્ સર્વાન્ સમ્પ્રપૂજ્ય યથાવિધિ ।
ઉવાચ તાન્ મહાવાક્યં હર્ષયન્ દાનવોત્તમઃ ॥ ૧૩॥

લોભાસુર ઉવાચ ।
વિપ્રચિત્ત્યાદિકાઃ સર્વે શ‍ૃણુધ્વં મે વચો હિતમ્ ।
ભવતાં પુણ્યયોગેન જેષ્યામિ સકલં જગત્ ॥ ૧૪॥

યદીચ્છા ભવતાં વૃદ્ધાઃ શ્રેષ્ઠા અત્રૈવ સઙ્ગતાઃ ।
તદાઽઽજ્ઞા મે પ્રકર્તવ્યા કરોમિ બલસંયુતઃ ॥ ૧૫॥

એવં તસ્ય વચઃ શ્રુત્વા હર્ષિતા દાનવોત્તમાઃ ।
જગુસ્તં ભાવગમ્ભીરં સાધુ સાધુ ત્વયેરિતમ્ ॥ ૧૬॥

જેષ્યામસ્ત્વત્પ્રસાદેન દેવાન્ વિષ્ણુપુરોગમાન્ ।
પરાક્રમતુલા તેન વિદ્યતે જગતિ પ્રભો ॥ ૧૭॥

તતોઽતિહર્ષિતાઃ સર્વે શુક્રં તત્ર સમાનયન્ ।
તેનાજ્ઞમા મહાભાગાઃ સજ્જાસ્તે પ્રબભૂવિરે ॥ ૧૮॥

ગજાસુરો વિપ્રચિત્તિર્દેવાન્તકનરાન્તકૌ ।
પ્રતાપવાંશ્ચ તારો વૈ પ્રહેતિર્હેતિરેવ ચ ॥ ૧૯॥

બલિર્જૃમ્ભસ્તથાઽન્યે વૈ દંશિતા અભવંસ્તદા ।
સ્વસ્વસેનાયુતાઃ સર્વે નાનાવાહનગા બભુઃ ॥ ૨૦॥

પદાતયોઽપ્યસઙ્ખ્યાતા અશ્વારોહાસ્તથાઽપરે ।
પશુસંસ્થાઃ ખગારાહા અપારાશ્ચ સમાયયુઃ ॥ ૨૧॥

ગજારોહા રથારૂઢા નાનાવાહનસંસ્થિતાઃ ।
મહાસુરાઃ શસ્ત્રસંયુક્તા લોભાસુરમાયયુઃ ॥ ૨૨॥

તૈઃ સમેત્ય મહાબાહુર્લોભઃ સંહર્ષિતોઽભવત્ ।
પૃથિવીજયનાર્થાય કાલકમ્પનકારકઃ ॥ ૨૩॥

એતાદૃશા મહાવીરા યત્રાતિષ્ઠન્ સુન્દશિતાઃ ।

તૈર્યુદ્ધં નૃપશાર્દૂલાઃ કિં કર્તારોઽલ્પમાનવાઃ ॥ ૨૪॥

નૃપાઃ કેચિન્ મૃતાસ્તત્ર સઙ્ગ્રામે દારુણે પ્રભો ।
કેચિત્તાન્ શરણં જગ્મુઃ પલાયનપરા યયુઃ ॥ ૨૫॥

એવં સપ્તસમુદ્રાન્તાં પૃથ્વીં જિત્વા મહાબલાઃ ।
અસુરા હર્ષિતાઃ સર્વે સાર્વભૌમા બભૂવિરે ॥ ૨૬॥

યે મૃતાસ્તત્સુતાસ્તૈસ્તે સ્થાપિતાઃ કરદાયિનઃ ।
પલાયિતાશ્ચ તત્સ્થાને સ્થાપિતા દાનવોત્તમાઃ ॥ ૨૭॥

શરણં યે ગતાસ્તેઽપિ સ્થાપિતા હર્ષસંયુતાઃ ।
વરં તસ્ય સમાજ્ઞાય શેષસ્તાંશ્ચ સમાયયૌ ॥ ૨૮॥

વાર્ષિકં કરભારં સ કૃત્વા દત્ત્વા મહાધનમ્ ।
સામ્ના તૈઃ પૂજિતઃ સોઽપિ સ્વગૃહે નાગરાડ્ યયૌ ॥ ૨૯॥

તતોઽતિહર્ષિતા દૈત્યા યયુઃ સ્વર્ગં સુશોભનમ્ ।
લોભાસુરેણ સંયુક્તા મહામાયા મહાબલાઃ ॥ ૩૦॥

ઇન્દ્રઃ સુરગણૈઃ સાર્ધં દંશિતો વજ્રધારકઃ ।
(Page ખં. ૪ અ. ૩૮ પાન ૯૮)
બૃહસ્પતિં પ્રણમ્યૈવં જગાદ સ્વમતં પ્રભુઃ ॥ ૩૧॥

ઇન્દ્ર ઉવાચ ।
લોભાસુરઃ સમાયાતો દાનવૈર્બલવત્તરૈઃ ।
તેન યોદ્ધું ગમિષ્યામિ ત્વદાજ્ઞાવશગઃ પ્રભો ॥ ૩૨॥

ઇન્દ્રસ્ય વચનં શ્રુત્વા નિઃશ્વસ્ય મુનિપુઙ્ગવઃ ।
જગાદ તં મહેન્દ્રં બૃહસ્પતિઃ સ પ્રતાપવાન્ ॥ ૩૩॥

ગુરુરુવાચ ।
શૈવેન વરદાનેન યુક્તોઽસૌ દૈત્યનાયકઃ ।
નાનારૂપધરઃ સોઽપિ જેતું નૈવ પ્રશક્યતે ॥ ૩૪॥

અતઃ સર્વં પરિત્યજ્ય વિષ્ણોશ્ચ શરણં સુર ।
ગચ્છ સોઽપિ મહાબુદ્ધિઃ કરિષ્યતિ હિતં મહત્ ॥ ૩૫॥

ગુરોર્વચનમાકર્ણ્ય સુરેન્દ્રઃ શોકસંયુતઃ ।
સુરેન્દ્રૈઃ સહિતઃ સોઽપિ વિકુણ્ઠમગમત્તદા ॥ ૩૬॥

દેવસ્થાનાનિ સર્વાણિ દૃષ્ટ્વા શૂન્યાનિ સર્વતઃ ।
દૈત્યા હર્ષયુતાઃ સર્વે પ્રવેશં ચક્રુરઞ્જસા ॥ ૩૭॥

દૈત્યરાજોઽમરાવત્યાં લોભઃ સર્વસમન્વિતઃ ।
ગત્વાઽઽસને મહેન્દ્રસ્ય સમારૂઢો બભૌ સ્વયમ્ ॥ ૩૮॥

સર્વાન્ સમ્માન્ય દૈત્યેન્દ્રો દદૌ નાનાપદાનિ સઃ ।
દૈત્યેન્દ્રાસ્તત્ર સંસ્થાસ્તે મુમુદુર્ભોગકારકાઃ ॥ ૩૯॥

ગન્ધર્વાસ્તં મહાદૈત્યમપ્સરોભિઃ સમન્વિતાઃ ।
સિષેવિરે પ્રજાપાલ વિદ્યાધ્રાદ્યાઃ સમાદૃતાઃ ॥ ૪૦॥

દેવોદ્યાનેષુ દૈત્યેન્દ્રા બભ્રમુર્હર્ષસંયુતાઃ ।
યત્ર તત્ર મહાભાગા વ્યહરંસ્તે યથાસુખમ્ ॥ ૪૧॥

લોભાસુરં પ્રણમ્યૈવ સંસ્થિતા વિગતજ્વરાઃ ।
અવદન્ન સમઃ કશ્ચિલ્લોભેન ભુવનેષુ ચ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે લોભાસુરસ્યેન્દ્રપદપ્રાપ્તિવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૪.૩૭

## ૪.૩૮ વિષ્ણુપરાજયો નામાષ્ટત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ઇન્દ્રઃ સુરગણૈઃ સાર્ધં બૃહસ્પતિપુરોગમઃ ।
વૈકુણ્ઠે વિષ્ણુમાનમ્ય ગત્વા તુષ્ટાવ તં સ્તવૈઃ ॥ ૧॥

તતસ્તુષ્ટો હરિઃ પ્રાહ મહેન્દ્રં માન્યભાવતઃ ।
સ્થીયતાં દૈવતૈઃ સર્વૈઃ કિં કાર્યં સમુપસ્થિતમ્ ॥ ૨॥

ત્યક્ત્વાઽમરાવતીં તાત કિમર્થં ચાગતો ભવાન્ ।
સ્ત્રિયા હીનઃ પદા દેવૈર્વદ દુઃખં મહાદ્ભુતમ્ ॥ ૩॥

ઇન્દ્ર ઉવાચ ।
કિં વદામિ જગત્પાલ સર્વજ્ઞં ત્વાં મહામતે ।
તથાપિ શ‌ૃણુ વૃત્તાન્તં શોકદં દૈવકારિતમ્ ॥ ૪॥

લોભાસુરશ્ચ શૈવેન વરેણ બલદર્પિતઃ ।

દાનવેન્દ્રૈર્મહાબાહુર્યો ત્વં સ હ્યાગતોઽધુના ॥ ૫॥

ગુરુણા બોધિતાઃ સર્વે વયં પ્રાપ્તા જનાર્દન ।
ત્યક્ત્વા રાજ્યાદિકં સર્વં વિચારં કુરુ સર્વથા ॥ ૬॥

દૈત્યોઽમરાવતીસંસ્થો દેવસ્થાનાનિ માધવ ।
પ્રદદાતિ ચ દૈત્યેભ્યઃ સ્વર્ગરાજ્યં કરોતિ સઃ ॥ ૭॥

ત્વં પાલકઃ શ્રુતૌ પ્રોક્તસ્તસ્માચ્છરણમાગતાન્ ।
રક્ષ લોભાસુરં હત્વા દેવાનામીશ્વરો ભવાન્ ॥ ૮॥

તેષાં તદ્વચનં શ્રુત્વા વિષ્ણુઃ કોપસમન્વિતઃ ।
(Page  ખં. ૪ અ. ૩૮ પાન ૯૯)
જગાદ દેવરાજં તં મહાબાહુર્વિચક્ષણઃ ॥ ૯॥

શ્રીહરિરુવાચ ।
હનિષ્યામિ મહાદૈત્યં લોભં દાનવસંયુતમ્ ।
મા કુરુષ્વ વૃથા ચિન્તાં કુરુ રાજ્યં મયાર્પિતમ્ ॥ ૧૦॥

એવમુક્ત્વા મહેન્દ્રં સ દેવેન્દ્રૈઃ સહ માધવઃ ।
વેગેનારુહ્ય ગરુડં યયૌ તામમરાવતીમ્ ॥ ૧૧॥

સમાગતં મહાવિષ્ણું મહાસૈન્યસમાકુલમ્ ।
જ્ઞાત્વા દૂતમુખાત્ સર્વે દાનવાઃ સજ્જકા યયુઃ ॥ ૧૨॥

લોભઃ ક્રોધસમાવિષ્ટ આયયૌ યોદ્ધુમાદૃતઃ ।
રથારૂઢઃ સ્વયં સાક્ષાન્ મૃત્યુરૂપોઽયમુચ્યતે ॥ ૧૩॥

લોભં દૃષ્ટ્વાઽસુરાઃ સર્વે ભયભીતાઃ સમન્તતઃ ।
મહાકાયં મહાવીર્યં કાલકાલં પ્રદુદ્રુવુઃ ॥ ૧૪॥

પલતસ્તાન્ સમાશ્વાસ્ય વિષ્ણુર્યુદ્ધોદ્યતોઽભવત્ ।
તેન સાર્ધં યયુઃ સર્વે મહેન્દ્રાદ્યાશ્ચ દંશિતાઃ ॥ ૧૫॥

સમાગતં રમાનાથં રણભૂમૌ પ્રતાપવાન્ ।
લોભઃ ક્રોધસમાવિષ્ટો ચોદયત્ સોઽસુરાંસ્તતઃ ॥ ૧૬॥

તતો યુદ્ધં સમભવદ્દેવાનાં દાનવૈઃ સહ ।
તુમુલં શસ્ત્રસઙ્ઘાતૈર્મારયન્તઃ પરસ્પરમ્ ॥ ૧૭॥

અન્યોન્યં તે જયં સર્વે દાનવાઃ સુરનાયકાઃ ।

ઇચ્છન્તો ન જયં તત્રાપ્નુવન્ દક્ષ હતોદ્યમાઃ ॥ ૧૮॥

રક્તૌઘૈઃ સમ્પ્રવૃત્તા સ્મ નદી પરમભીતિદા ।
વિશ્રામં નિશિ ચક્રુર્ન ક્રોધાવેશૈઃ પરસ્પરમ્ ॥ ૧૯॥

દિનત્રયં મહાઘોરં યુદ્ધં દારુણરૂપકમ્ ।
તત્ર પ્રવૃત્તં ક્રોધેન યુક્તા દેવાઃ સમાયયુઃ ॥ ૨૦॥

ગણા વિષ્ણોશ્ચ સઙ્ક્રુદ્ધાસ્તથા દેવેન્દ્રમુખ્યકાઃ ।
નાનાસ્ત્રૈર્દાનવાન્ સર્વાન્ મમર્દુઃ સર્વતઃ પ્રભો ॥ ૨૧॥

તતો હાહારવં કૃત્વા દાનવા ભયસંયુતાઃ ।
ન લેભિરે યશો દૈત્યાઃ પલાયન્ત સમન્તતઃ ॥ ૨૨॥

તતો હર્ષયુતા દેવા નાદં ચક્રુઃ સુદારુણમ્ ।
જય વિષ્ણો મહાભાગ વદન્તિ સ્મ પરસ્પરમ્ ॥ ૨૩॥

તતોઽતિક્રોધસંયુક્તા દાનવેન્દ્રાઃ સમાયયુ ।
વિપ્રચિત્તિમુખાસ્તત્ર શરવૃષ્ટિં પ્રચક્રિરે ॥ ૨૪॥

તેષાં બાણૈઃ સુરાઃ સર્વે છિન્નાઙ્ગાઃ પતિતા મૃધે ।
તદ્ દૃષ્ટ્વા ક્રોધયુક્તાશ્ચ દેવેન્દ્રાસ્તાન્ પ્રદુદ્રુવુઃ ॥ ૨૫॥

અભવત્ દ્વન્દ્વયુદ્ધં ચ નિયતં રોમહર્ષણમ્ ।
તેષાં મધ્યેઽથ કિઞ્ચિત્ત્વાં કથયામિ સમાસતઃ ॥ ૨૬॥

ઇન્દ્રેણ યુયુધે તત્ર ગજાસુરઃ પ્રતાપવાન્ ।
અગ્નિના ચ સ્વયં તારો વાયુના વિપ્રચિત્તિકઃ ॥ ૨૭॥

વરુણેન યયૌ તત્ર બલિઃ ક્રોધસમન્વિતઃ ।
કુબેરેણ પ્રહેતિશ્ચ મદનેન ચ હેતિકઃ ॥ ૨૮॥

સૂર્યેણ યુયુધે ક્રોધાત્ સ પ્રતાપી નરાન્તકઃ ।
દેવાન્તકો વિષ્ણુના સ ક્રોધયુક્તઃ સમાયયૌ ॥ ૨૯॥

જૃમ્ભઃ સોમેન દૈત્યેશો યુયુધે બલસંયુતઃ ।
યમેનૈવ મહાબાહુર્વૃત્રશ્ચ યુયુધે ભૃશમ્ ॥ ૩૦॥

નાનાદ્વન્દ્વભવં યુદ્ધં ચક્રુર્દેવેન્દ્રકૈઃ સહ ।
દૈત્યેન્દ્રા બલગર્વિષ્ઠા વર્ણનાય ન શક્યતે ॥ ૩૧॥

અહોરાત્રં રતા યુદ્ધે ન વિરામં પ્રચક્રિરે ।
નાનાશસ્ત્રાસ્ત્રવર્ષેણ વવૃષુસ્તે પરસ્પરમ્ ॥ ૩૨॥

દિવસાસ્તત્ર પઞ્ચૈવ ગતાસ્તેષાં પ્રયુધ્યતામ્ ।
નાપ્રાપ્યત જયો દેવૈર્દૈત્યૈઃ પરમદુર્જયૈઃ ॥ ૩૩॥

તતોઽતિકોપસંયુક્તઃ સ પ્રતાપી ગજાસુરઃ ।
ઇન્દ્રં સઙ્ગૃહ્ય ચિક્ષેપ મહાપર્વતમસ્તકે ॥ ૩૪॥

મૂર્ચ્છિતો દેવરાજઃ સ તતો દેવાઃ પલાયિતાઃ ।
(Page ખં. ૪ અ. ૩૮ પાન ૧૦૦)
એવં દ્વન્દ્વરતૈર્દૈત્યૈર્દેવેન્દ્રા મૂર્ચ્છિતાઃ કૃતાઃ ॥ ૩૫॥

હા હા કૃત્વા તતઃ સર્વં દેવસૈન્યં દિશો દશ ।
પપાલ તન્ મહાશ્ચર્યં દૃષ્ટ્વા વિષ્ણુશ્ચુકોપ હ ॥ ૩૬॥

ચક્રં પ્રગૃહ્ય ચિક્ષેપ મહાબાહુઃ સ દારુણમ્ ।
દૈત્યસૈન્યે તતસ્તેન હતા દૈત્યા અનેકશઃ ॥ ૩૭॥

કેષાઞ્ચિન્મસ્તકેષ્વેતદપતદ્દારુણં મહત્ ।
ચિચ્છેદ હસ્તપાદાદીન્ દાનવાનામિતસ્તતઃ ॥ ૩૮॥

તતો દૈત્યેન્દ્રકાઃ સર્વે આયયુસ્તે જનાર્દનમ્ ।
શસ્ત્રાસ્ત્રૈઃ સર્વતો દુષ્ટા મારયામાસુરેવ તમ્ ॥ ૩૯॥

નારાયણસ્તતઃ કોપસંયુક્તોઽતિપ્રતાપવાન્ ।
ગજાસુરં સ વિવ્યાધ બાણૈર્દશભિરાવૃતમ્ ॥ ૪૦॥

તં મૂર્ચ્છિતં ચકારાઽસૌ તતો દેવાન્તકં હરિઃ ।
સપ્તભિસ્તાડયામાસ પાતયામાસ ભૂતલે ॥ ૪૧॥

એવં સર્વાન્ મહાવિષ્ણુઃ દાનવેન્દ્રાન્ સુદારુણાન્ ।
વિવ્યાધ મૂર્ચ્છિતાંશ્ચક્રે શરવર્ષૈઃ સમન્તતઃ ॥ ૪૨॥

તતો હાહારવં કૃત્વાઽપલત્તત્ સૈન્યમુલ્બણમ્ ।
દાનવાનાં ભયાર્તં વૈ દશદિક્ષુ વિશેષતઃ ॥ ૪૩॥

તતો લોભઃ સમાયાતઃ ક્રોધયુક્તો જનાર્દનમ્ ।
જગાદ વચનં સોઽપિ મોહયુક્તો મહાસુરઃ ॥ ૪૪॥

લોભ ઉવાચ ।

સમ્યક્ કૃતં ત્વયા વિષ્ણો યેન મે દર્શનં ગતઃ ।
અધુના ત્વાં ન મુઞ્ચામિ જીવયુક્તં કદાચન ॥ ૪૫॥

નામરૂપાત્મકેભ્યશ્ચ મરણં નૈવ મે ભવેત્ ।
જ્ઞાત્વા કિમર્થમાયાતો જ્ઞાનહીનો યથા નરઃ ॥ ૪૬॥

ગદાં ગૃહીત્વૈવમુક્ત્વા તાડયામાસ કેશવમ્ ।
પપાત મૂર્ચ્છયા વિષ્ણુસ્તતઃ સૈન્યં વ્યમર્દયત્ ॥ ૪૭॥

મુહૂર્તમાત્રકાલેન સાવધાનો બભૂવ હ ।
પપાલ દેવરાજૈઃ સ ત્યક્ત્વા સઙ્ગ્રામમણ્ડલમ્ ॥ ૪૮॥

પ્રહસ્ય દાનવાન્ સર્વાન્ સાવધાનાનથાઽકરોત્ ।
લોભાસુરઃ પ્રસન્નાત્મા તૈઃ સાર્ધં સ્વપુરેઽગમત્ ॥ ૪૯॥

સ્તુતો બન્દિજનૈસ્તેભ્યો દત્ત્વા દાનાનિ હર્ષિતઃ ।
ઇન્દ્રાસને સમાસીનો રેજે દાનવસત્તમઃ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે વિષ્ણુપરાજયો નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૪.૩૮

## ૪.૩૯ લોભાસુરબ્રહ્માણ્ડજયો નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતોઽતિદુઃખિતો વિષ્ણુર્દેવેન્દ્રૈશ્ચ સમન્વિતઃ ।
ત્યક્ત્વા વિકુણ્ઠમેવં સ યયૌ શમ્ભું શરણ્યકમ્ ॥ ૧॥

ગત્વા કૈલાસકે દક્ષ શિવં નત્વા જનાર્દનઃ ।
સ્તુત્વા વૃત્તાન્તમેવં સ કથયામાસ વિસ્તરાત્ ॥ ૨॥

શ્રુત્વા મહેશ્વરો વિષ્ણું સ દેવં સ્વપુરાગતમ્ ।
સાન્ત્વયામાસ યુક્તૈશ્ચ નાનાદૃષ્ટાન્તદર્શનૈઃ ॥ ૩॥

શિવ ઉવાચ ।
મા ચિન્તાં કુરુ વિષ્ણો ત્વં સર્વજ્ઞ જગદીશ્વર ।
તપઃપુણ્યં મહોગ્રં યત્તેન ત્વં સ પરાજિતઃ ॥ ૪॥

તપઃ કૃતં ચ લોભેન ફલં તસ્ય જનાર્દન ।

ભુક્ત્વા મરિષ્યતે નાથ કાલસ્તત્ર પ્રતીક્ષ્યતામ્ ॥ ૫॥

(Page ખં. ૪ અ. ૩૯ પાન ૧૦૧)
દેવૈઃ સહ મહાવિષ્ણો મત્સમીપે સ્થિરો ભવ ।
મદીયભક્તિયુક્તો હ્યાગમિષ્યત્યત્ર નૈવ સઃ ॥ ૬॥

એવમુક્ત્વા વચો વિષ્ણું શઙ્કરઃ શોકસંયુતઃ ।
દેવૈસ્તેન સમાયુક્તોઽતિષ્ઠત્ કૈલાસપર્વતે ॥ ૭॥

અથ લોભાસુરં સર્વૈઃ સંસ્થિતં દાનવૈર્વૃતમ્ ।
ઇન્દ્રાસને મહાબાહું તમૂચુર્દાનવોત્તમાઃ ॥ ૮॥

વિપ્રચિત્ત્યાદ્યા ઊચુઃ ।
લોભ લોભ મહાભાગ શ઼ૃણુ નો વચનં હિતમ્ ।
વિષ્ણુર્દેવગણૈઃ સર્વૈઃ કૈલાસે શઙ્કરં યયૌ ॥ ૯॥

અસ્માકં શઙ્કરઃ સોઽપીષ્ટદેવઃ પૂજ્ય આદરાત્ ।
શત્રૂન્ રક્ષતિ નઃ શમ્ભુર્ભવિષ્યતિ વિપક્ષગઃ ॥ ૧૦॥

અધુના શઙ્કરસ્યાસ્ય ભાવાર્થં પ્રેષ્યતાં મહાન્ ।
દૂતઃ સર્વાર્થસૂજ્ઞઃ કસ્તતઃ ક્ષેમં ભવિષ્યતિ ॥ ૧૧॥

શિવો યદિ સ દેવાનાં પક્ષગો ભવતિ પ્રભો ।
તદા શમ્ભું પ્રજેષ્યામસ્તપોબલસમન્વિતાઃ ॥ ૧૨॥

ન તે શમ્ભુર્વરસ્યૈવ દાતા જાનીહિ માનદ ।
કર્મણાં ફલદાતારઃ કૃતા દેવાશ્ચ કર્મણા ॥ ૧૩॥

કર્માધીનં જગત્ સર્વં સદેવાસુરમાનુષમ્ ।
કર્માજ્ઞાવશગં દૈત્ય કર્મણા ત્વં મહાપ્રભુઃ ॥ ૧૪॥

દેવાઃ કર્મફલં લોભાદ્દદતે ન વિશેષતઃ ।
તદૈશ્વર્યવિહીનાસ્તે પતન્તિ સ્વપદાત્ કિલ ॥ ૧૫॥

અતસ્ત્યક્ત્વા સ્વસન્દેહં ત્યજ શમ્ભું વિપક્ષગમ્ ।
કુરુ કર્માશ્રયં ત્વં વૈ તેન ક્ષેમં ભવિષ્યતિ ॥ ૧૬॥

ઇત્યુક્ત્વા દાનવેન્દ્રાસ્તે વિરામં ચક્રુરઞ્જસા ।
લોભાસુરસ્તતસ્તેષાં વચને નિરતોઽભવત્ ॥ ૧૭॥

ગજાસુરં મહાવીર્યં પ્રેષયામાસ સત્વરમ્ ।

કૈલાસે શઙ્કરસ્યૈવ ભાવાર્થં ભાવધારકઃ ॥ ૧૮॥

ગત્વા શમ્ભું મહાદૈત્યઃ પ્રણમ્ય પ્રત્યુવાચ સઃ ।
વચનં લોભદૈત્યેન પ્રેષિતં સામપૂર્વકમ્ ॥ ૧૯॥

ગજાસુર ઉવાચ ।
મહાદેવ નમસ્તુભ્યં શ ृણુ મે વચનં હિતમ્ ।
લોભાસુરેણ દેવેશ પ્રેષિતોઽહં વિશેષતઃ ॥ ૨૦॥

તેન સઙ્કથિતં વાક્યં તચ્છૃણુષ્વ સુખપ્રદમ્ ।
ત્વં સાક્ષાદીશ્વરઃ પૂર્ણોઽસ્માકં પૂજ્યો નિરન્તરમ્ ॥ ૨૧॥

વિષ્ણુર્દેવવરઃ સ્વામિન્નાગતસ્તે પ્રસન્નિધૌ ।
અસ્માકં શત્રુરેવાઽસૌ તં ત્યજ ત્વં સદાશિવ ॥ ૨૨॥

વયં ભક્તાસ્ત્વદીયાશ્ચાસ્માકં મિત્રં તદેવ તે ।
મિત્રં શત્રુસ્તથા શમ્ભો પાલયસ્વાદરાદ્ધિ નઃ ॥ ૨૩॥

નો ચેત્ સઙ્ગ્રામભાવેન જેષ્યામસ્ત્વાં ન સંશયઃ ।
કર્મણા ત્વં સમર્થશ્ચેત્ સઞ્જાતો ભુઙ્ક્ષ્વ વિષ્ટપમ્ ॥ ૨૪॥

કર્મણા લોભકઃ શમ્ભો સર્વૈશ્વર્યયુતોઽધુના ।
તસ્માદસ્માન્ મહાભાગ રક્ષ તે ભક્તિસંયુતાન્ ॥ ૨૫॥

તસ્ય તદ્વચનં શ્રુત્વાઽબ્રવીન્નિઃશ્વસ્ય શઙ્કરઃ ।
ગુજાસુરં સ્વયં સામ્ના વચનં હિતકારકમ્ ॥ ૨૬॥

શિવ ઉવાચ ।
ગજાસુર મહાલોભં વદ મે વચનં હિતમ્ ।
ગત્વા તં દાનવેન્દ્રં ત્વં સર્વાસુરસમન્વિતમ્ ॥ ૨૭॥

કૈલાસં વિષ્ણુના ત્યક્ત્વા સહિતોઽહં સ્વદેવપૈઃ ।
ગચ્છામિ યત્ર કુત્રાપિ ન ત્યજામિ જનાર્દનમ્ ॥ ૨૮॥

કર્મણા ત્વં સમર્થશ્ચેત્ સઞ્જાતો ભુઙ્ક્ષ્વ વિષ્ટપમ્ ।
સર્વં ચરાચરં તેઽભૂત્ સ્વાધીનં નાત્ર સંશયઃ ॥ ૨૯॥

એવમુક્ત્વા સુદુર્બુદ્ધિં શઙ્કરઃ સુરનાયકૈઃ ।
જગામ પર્વતોદ્દેશે ત્યક્ત્વા કૈલાસમાત્મનઃ ॥ ૩૦॥

(Page ખં. ૪ અ. ૪૦ પાન ૧૦૨)

મહાવને મહેશાનઃ પર્વતદ્રોણિમાશ્રિતઃ ।
દેવૈર્વિષ્ણુમુખૈઃ સર્વૈઃ પશુવત્ કાલચાલકઃ ॥ ૩૧॥

ગજાસુરઃ સભાં ગત્વા જગાદ સકલૈર્યુતમ્ ।
લોભાસુરં સ વૃત્તાન્તં શ્રુત્વા સંહર્ષિતોઽભવત્ ॥ ૩૨॥

તતઃ સ સત્યલોકે ચ વિકુણ્ઠે શઙ્કરાલયે ।
દાનવાન્ સ્થાપયામાસ નાનાદેવપદેષુ વૈ ॥ ૩૩॥

ઇન્દ્રાસનં પરિત્યજ્ય યયૌ ભૂમ્યાં મહાસુરઃ ।
સ્વપુરે દાનવેન્દ્રૈશ્ચાવસદ્ભોગપરાયણઃ ॥ ૩૪॥

ન મમર્શ નિજાત્માનં ગર્વિતઃ કેવલં સ તુ ।
સ્ત્રીમાંસમદિરાદિષ્વાસંસક્તોઽભૂત્ સુદુર્મતિઃ ॥ ૩૫॥

ધન્યમાત્માનમેવં સ મન્યતે સ્મ કૃતાર્થકમ્ ।
બ્રહ્માણ્ડં વશગં મેઽભૂન્ન મત્તઃ શ્રેષ્ઠ એકકઃ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે લોભાસુરબ્રહ્માણ્ડજયો નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૪.૩૯

## ૪.૪૦ ગજાનનપ્રાદુર્ભાવો નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો બહૌ ગતે કાલે દાનવા બલદર્પિતાઃ ।
જગુર્લોભાસુરં તત્ર લોભયુક્તા વિશેષતઃ ॥ ૧॥

દાનવેન્દ્રા ઊચુઃ ।
દેવા લોભાસુર સ્વામિન્નસ્માકં શત્રવો મતાઃ ।
સુરાશ્ચાસુરવર્યાણાં વેદે પ્રોક્તા વિચારય ॥ ૨॥

શસ્ત્રાસ્ત્રૈર્દેવસઙ્ઘાસ્તે ન મરિષ્યન્તિ કર્હિચિત્ ।
અમરા વેદશાસ્ત્રેષુ કથિતા નાત્ર સંશયઃ ॥ ૩॥

કર્માન્ના દેવતાઃ સ્વામિન્ ક્ષતે કર્મણિ તત્ક્ષણાત્ ।
મરિષ્યન્તિ મહાભાગ તદર્થં યત્નમાચર ॥ ૪॥

જિત્વા બ્રહ્માણ્ડગોલં કિં સંસ્થિતોઽસિ મહાસુર ।

ન કૃતાર્થસ્ત્વમેવૈવં કદા જીવત્સુ શત્રુષુ ॥ ૫॥

હિરણ્યકશિપુર્જિત્વા પુરા દેવગણાન્ સ્વયમ્ ।
રાજ્યં ચકાર સર્વત્ર ભુવનેષુ ન સંશયઃ ॥ ૬॥

તતો દેવૈઃ પ્રયત્નેન નિર્મિતો નૃહરિઃ પ્રભો ।
તેન હત્વા સુરાધીશં દેવાઃ સ્વસ્થાનગા બભુઃ ॥ ૭॥

અતસ્ત્વં દૈત્યરાજેન્દ્ર હિતં કુરુ વિશેષતઃ ।
તદા ચિરં મહારાજ સુખયુક્તો ભવિષ્યસિ ॥ ૮॥

તેષાં વચનમાકર્ણ્ય લોભાસુરઃ સુમન્દધીઃ ।
આજ્ઞાપયત્તતો દૈત્યો દૈત્યેન્દ્રાન્ કર્મખણ્ડને ॥ ૯॥

તતો ગજાસુરાદ્યાશ્ચ નિર્ગતા ક્રોધસંયુતાઃ ।
યત્ર તત્ર દ્વિજાન્ ધૃત્વા જઘ્નુર્યજ્ઞાન્ વિશેષતઃ ॥ ૧૦॥

યજ્ઞવૃક્ષાંસ્તથા ગાશ્ચ તીર્થાનિ યત્ર તત્ર તે ।
જઘ્નુર્બભઞ્જુરત્યન્તં કર્મખણ્ડનકારણાત્ ॥ ૧૧॥

બભઞ્જુઃ ક્રોધસંયુક્તા દેવતાઽઽયતનાનિ તે ।
સ્વધર્મસ્થં જનં દૃષ્ટ્વા જઘ્નુર્દાનવસત્તમાઃ ॥ ૧૨॥

સર્વત્ર દાનવાધીશૈર્લોભાસુરસ્ય મૂર્તયઃ ।
જનૈઃ પૂજ્યાઃ કૃતા દક્ષ તદાધારં બભૂવ હ ॥ ૧૩॥

ન સ્વાહા ન સ્વધા કુત્ર બભૂવ પ્રલયે યથા ।
ન વષટ્કારગં કર્મ ત્રાસિતં ભૂમિમણ્ડલમ્ ॥ ૧૪॥

લોભાસુરયુતં સર્વૈઃ કર્મ તૈઃ પ્રતિપાદિતમ્ ।
તતો હાહારવૈર્યુક્તા બભૂવુર્માનવાઃ પ્રભો ॥ ૧૫॥

બ્રાહ્મણા વનગા ભૂત્વા કેચિન્ મરણનિશ્ચયાઃ ।
(Page ખં. ૪ અ. ૪૦ પાન ૧૦૩)
ચક્રુઃ કર્મ તથા ભ્રષ્ટા બભૂવુર્બહવો દ્વિજાઃ ॥ ૧૬॥

એવં બહૌ ગતે કાલે દેવાઃ પરમદુઃખિતાઃ ।
ઉપવાસપરાઃ સર્વે બભૂવુસ્તે પ્રજાપતે ॥ ૧૭॥

તતોઽતિયત્નસંયુક્તા વિચારં ચક્રુરઞ્જસા ।
લોભાસુરવિનાશાય ન પ્રાપુસ્તે દિવૌકસઃ ॥ ૧૮॥

તતોઽતિદુઃખિતાઃ સર્વે કિં કુર્મ ઇતિ વિહ્વલાઃ ।
સન્તસ્થુઃ પર્વતોદ્દેશે ગુપ્તભાવેન દેવપાઃ ॥ ૧૯॥

તત્રાઽઽજગામ યોગીન્દ્રો રૈભ્યઃ સર્વપ્રિયઙ્કરઃ ।
અવધૂતઃ સ્વરૂપેણ સાક્ષાદ્વિઘ્નેશ્વરો યથા ॥ ૨૦॥

તં પ્રણમ્ય શિવાદ્યાસ્તે પપ્રચ્છુર્લોભનાશકમ્ ।
ઉપાયં દીનભાવેન સાસ્થિચર્માવશેષિતાઃ ॥ ૨૧॥

તતોઽતિકરુણાયુક્તો રૈભ્યઃ સર્વાર્થકોવિદઃ ।
જગાદ તાન્ સુરેન્દ્રાન્ સ દીનાન્ દૃષ્ટ્વા વિશેષતઃ ॥ ૨૨॥

રૈભ્ય ઉવાચ ।
શ ृણુધ્વં વિષ્ણુશમ્ભ્વાદ્યા મુનયસ્તત્ત્વભાવિતાઃ ।
લોભાસુરો મહાપાપી દુર્જયો નાત્ર સંશયઃ ॥ ૨૩॥

વિઘ્નરાજં તદપિ વૈ ભજધ્વં ભક્તિસંયુતાઃ ।
તેનાઽયં સુજયો દેવા ભવિષ્યતિ વિશેષતઃ ॥ ૨૪॥

સ્વયં સાક્ષાદ્ બુદ્ધિપતિર્બુદ્ધિં સઞ્ચાલયિષ્યતિ ।
ગજાનનસ્ય મન્ત્રં વૈ જપધ્વં વિધિપૂર્વકમ્ ॥ ૨૫॥

એવમુક્ત્વા મહાયોગી રૈભ્યઃ સ્વચ્છન્દગોઽભવત્ ।
શિવાદયો મહાભાગા હર્ષિતાઃ સમ્બભૂવિરે ॥ ૨૬॥

ગજાનનસ્ય મન્ત્રં તે જેપુસ્તપઃપરાયણાઃ ।
સવિધિં ધ્યાનસંયુક્તાસ્તોષયામાસુરન્વહમ્ ॥ ૨૭॥

નિરાહારપ્રભાવેણ સન્તુષ્ટો ભક્તિભાવિતઃ ।
શતવર્ષેષુ દેવેશાનાયયૌ સ ગજાનનઃ ॥ ૨૮॥

દૃષ્ટ્વા ગજાનનં તે તુ હર્ષિતા દેવનાયકાઃ ।
દેવા મુનિગણાઃ સર્વે પુપૂજુઃ સ્નેહસંયુતાઃ ॥ ૨૯॥

કૃત્વા કરપુટં ભક્ત્યા તુષ્ટુવુસ્તં ગજાનનમ્ ।
પુનરુત્થાય તે સર્વે પ્રણેમુસ્તં ગજાનનમ્ ॥ ૩૦॥

દેવર્ષય ઊચુઃ ।
ગજાનન નમસ્તુભ્યં સર્વેષાં બીજરૂપિણે ।

નિર્બીજાય ગણેશાય વિઘ્નાનાં પતયે નમઃ ॥ ૩૧॥

અનન્તાયૈકદન્તાય હેરમ્બાય નમો નમઃ ।
ચતુર્ભુજાય સર્વેશ સર્વપૂજ્યાય તે નમઃ ॥ ૩૨॥

સર્વસિદ્ધિપ્રદાત્રે ચ સુરાસુરમયાય તે ।
સિદ્ધિબુદ્ધિપ્રચાલાય સિદ્ધિબુદ્ધિપતે નમઃ ॥ ૩૩॥

અગુણાય ગુણેશાય ગુણરૂપાય ગૌણિને ।
માયામયાય માયાયાશ્ચાલકાય પરાત્મને ॥ ૩૪॥

સર્વાદયે મહોદાર પરાક્રમપરાય તે ।
સ્વાનન્દવાસિને તેઽસ્તુ નમઃ સ્વાનન્દદાયિને ॥ ૩૫॥

યોગાકારાય યોગાનાં સ્વામિને શાન્તિદાયિને ।
બ્રહ્મણસ્પતયે તેઽસ્તુ બ્રહ્મણાં બ્રહ્મણે નમઃ ॥ ૩૬॥

અનાધારાય સર્વેષામાધારાય નમો નમઃ ।
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તાય તે નમઃ ॥ ૩૭॥

પરશ્વઙ્કુશહસ્તાય ત્રિનેત્રાય મહોદર ।
નમો મૂષકવાહાય મૂષકધ્વજિને નમઃ ॥ ૩૮॥

નમો નમસ્તે સકલાય ધામ્ને સદા સુખાનન્દકરાય પાત્રે ।
જગત્ સુસ્રષ્ટ્રે સકલસ્ય હન્ત્રે ગુણૈર્વિહીનાય ગણાધિપાય ॥ ૩૯॥

વિદેહરૂપાય પરાય ભોક્ત્રે બોધેન હીનાય સુસાઙ્ખ્યકાય ।
સદા સ્વબુદ્ધૌ પરસંસ્થિતાય ગજાત્મરૂપાય નમો નમસ્તે ॥ ૪૦॥

બોધહીનં ચ યદ્બ્રહ્મ તદેવ ગજવાચકમ્ ।
ગજચિહ્નેન યોગીન્દ્રાઃ પશ્યન્તિ ત્વાં ગજાનનમ્ ॥ ૪૧॥

(Page ખં. ૪ અ. ૪૦ પાન ૧૦૪)
યથા મુખસ્ય ચિહ્નેન જ્ઞાયન્તે માનવાદયઃ ।
તથા વિદેહચિહ્નેન જ્ઞાયસે ત્વં તુ યોગિભિઃ ॥ ૪૨॥

વિદેહં ગજરૂપં યત્તેન તે મુખમુચ્યતે ।
ગણેશસ્ય પ્રાપ્તિકરં ગજાનન નમોસ્તુ તે ॥ ૪૩॥

કિં સ્તવામ ગણાધીશ યત્ર વેદાદિકાસ્તથા ।
યોગિનઃ શાન્તિમાપન્નાસ્તં વયં શરણં ગતાઃ ॥ ૪૪॥

સ્તુત્વા વિઘ્નેશ્વરં તે તુ પ્રણેમુસ્તં પુનઃ પુનઃ ।
તાનુવાચ ગણાધીશો હર્ષયન્ સર્વભાવવિત્ ॥ ૪૫॥

ગજાનન ઉવાચ ।
સ્તોત્રં ભવત્કૃતં દેવા ઈશ્વરા મુનયશ્ચ મે ।
સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ નિરન્તરમ્ ॥ ૪૬॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ ભક્તિયન્ત્રિતઃ ।
પઠનાચ્છ્રવણાદસ્ય સન્તુષ્ટોઽહં વિશેષતઃ ॥ ૪૭॥

વરદોઽહં વૃણુત વો દાસ્યામિ વરમીપ્સિતમ્ ।
તપસા ભક્તિભાવેન સ્તોત્રેણ તુષ્ટિમાગતઃ ॥ ૪૮॥

ગજાનનવચઃ શ્રુત્વા હર્ષિતા દેવતર્ષયઃ ।
પ્રત્યૂચિરે પ્રણમ્યેદં વચનં સર્વસૌખ્યદમ્ ॥ ૪૯॥

દેવર્ષય ઊચુઃ ।
લોભાસુરેણ ભો સ્વામિન્ ત્રાસિતં ભુવનત્રયમ્ ।
વયં કર્મવિહીનત્વાદુપોષણયુતાઃ કૃતાઃ ॥ ૫૦॥

અતસ્ત્વં જહિ દૈત્યેશં સર્વાજેયં ગજાનન ।
તવ ભક્તિં દૃઢાં દેહિ લોભહીનાં વિશેષતઃ ॥ ૫૧॥

તેષાં વચનમાકર્ણ્ય ગજાનન ઉવાચ તાન્ ।
મા ભયં કુરુત પ્રાજ્ઞા હનિષ્યામિ મહાસુરમ્ ॥ ૫૨॥

લોભહીના મદીયા યા ભક્તિર્વશ્ચ ભવિષ્યતિ ।
અધુના દાનવેન્દ્રં તં જેષ્યામિ ચ ન સંશયઃ ॥ ૫૩॥

મુનીન્ દેવાનેવમુક્ત્વાઽભવત્તત્રૈવ સંસ્થિતઃ ।
સર્વેષાં કાર્યસિદ્ધ્યર્થં ગજાનનઃ પ્રતાપવાન્ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ગજાનનપ્રાદુર્ભાવો નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૦

# ૪.૪૧ શુક્રોપદેશવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દૂતં ગજાનનસ્તત્ર પ્રેષયામાસ શઙ્કરમ્ ।
સ ગત્વા દૈત્યપં દક્ષ જગાદ શ ृણુ તદ્વચઃ ॥ ૧॥

શિવ ઉવાચ ।
શ ृણુ લોભાસુર ત્વં મે વચનં હિતકારકમ્ ।
કરિષ્યસિ યદા સામ્ના ભવિષ્યસિ તદા સુખી ॥ ૨॥

ગજાનનઃ સ્વયં સાક્ષાદ્બ્રહ્મણાં નાયકઃ સ્મૃતઃ ।
સ આગતઃ સુરૈઃ સર્વૈર્દેવેન્દ્રૈર્મુનિભિર્વૃતઃ ॥ ૩॥

નગરપ્રાન્તભાગે તે દશયોજનદૂરતઃ ।
સંસ્થિતેન ચ દૈત્યેશ પ્રેષિતોઽહં વિશેષતઃ ॥ ૪॥

મદીયવરદાનેન નિર્ભયોઽસિ હિ માનદ ।
અતસ્ત્વદીયરક્ષાર્થં પ્રેષયામાસ માં પ્રભુઃ ॥ ૫॥

બ્રહ્માણ્ડં વશમાનીય ત્વં સર્વેશોઽસિ સામ્પ્રતમ્ ।
દેવાન્ પશુસમાનાંશ્ચ કૃત્વા દૈત્યૈર્નિરન્તરમ્ ॥ ૬॥

અધુના વૈરમુત્સૃજ્ય સ્નેહં કુરુ મહામતે ।
દેવાઃ સ્વપદગાઃ સન્તુ બ્રાહ્મણાઃ કર્મકારિણઃ ॥ ૭॥

ગજાનનસ્ય વર્તસ્વ મિત્રભાવેન દાનવ ।
ભુઙ્ક્ષ્વ ભોગાન્ મહાભાગ નોચેત્ત્વાં સ હનિષ્યતિ ॥ ૮॥

(Page ખં. ૪ અ. ૪૧ પાન ૧૦૫)
શિવસ્ય વચનં શ્રુત્વા ક્રોધયુક્તો મહાસુરઃ ।
જગાદ તં તિરસ્કૃત્ય મહાદેવં મદાન્વિતઃ ॥ ૯॥

લોભાસુર ઉવાચ ।
કોઽસૌ ગજાનનઃ શમ્ભો ત્વં ભેદકર એવ ચ ।
મોહયસ્યધુના માં કિં દેવાનાં પક્ષગઃ પુરઃ ॥ ૧૦॥

અધુના ત્વાં મહાદેવ હન્મિ ક્રોધસમન્વિતઃ ।
કિં કરોમિ ચ દૂતસ્ત્વં ગચ્છ દેવં ગજાનનમ્ ॥ ૧૧॥

વદ વાક્યં મદીયં ત્વં હનિષ્યામિ સદેવકમ્ ।
ગજાનનં ન સન્દેહઃ પશ્ય મે પૌરુષં મહત્ ॥ ૧૨॥

એવં નિર્ભર્ત્સિતઃ શમ્ભુઃ ક્રોધારુણવિલોચનઃ ।
જગાદ તં મહાદૈત્યં વિશેષજ્ઞઃ સુદુર્મતિમ્ ॥ ૧૩॥

શિવ ઉવાચ ।
મૃત્યુયોગેન પાપિષ્ઠ ત્વં યુતોઽસિ ન સંશયઃ ।
ગજાનનં તેન લોભ નિન્દસિ બ્રહ્મનાયકમ્ ॥ ૧૪॥

શિવઃ પુનઃ સુદુર્બુદ્ધિમેવમુક્ત્વા યયૌ પ્રભુમ્ ।
ગજાનનં પ્રણમ્યાદૌ વૃત્તાન્તં સઞ્જગૌ પુનઃ ॥ ૧૫॥

તદાકર્ણ્ય વચઃ ક્રૂરં ગજાનનઃ પ્રતાપવાન્ ।
ક્રોધસંરક્તચક્ષુઃ સન્ પરશું ત્વક્ષિપત્તતઃ ॥ ૧૬॥

અનન્તાદિત્યસઙ્કાશઃ પરશુઃ કાલભીતિદઃ ।
આયયૌ દૈત્યપુર્યાં વૈ જ્વાલામાલાભિરાવૃતઃ ॥ ૧૭॥

તેજોમયં મહાસ્ત્રં તદ્ દૃષ્ટ્વા દૈત્યગણાઃ પરમ્ ।
ભયભીતા યયુસ્તં તે હાહાકારરવાકુલાઃ ॥ ૧૮॥

દાનવેન્દ્રૈઃ સભાસંસ્થં લોભં દૃષ્ટ્વા સુખં વચઃ ।
જગુર્દારુણરૂપં યત્ સર્વેભ્યો ભયદાયકમ્ ॥ ૧૯॥

નાગરા ઊચુઃ ।
કિં સ્થિતોઽસિ મહાદૈત્ય લોભ જ્વાલાસમાકુલમ્ ।
અસ્ત્રં સમાગતં ક્રૂરં દાહયામાસ દાનવાન્ ॥ ૨૦॥

તેષાં તદ્વચનં શ્રુત્વા ભયહર્ષસમન્વિતઃ ।
જગાદ દાનવાધીશાન્ મહાકોપયુતોઽસુરઃ ॥ ૨૧॥

લોભાસુર ઉવાચ ।
ગજાનનોઽમરૈઃ સાર્ધં સમાયાતો ન સંશયઃ ।
સમર્થો દૃશ્યતે નૂનં યસ્યાસ્ત્રબલમીદૃશમ્ ॥ ૨૨॥

તસ્ય તદ્વચનં શ્રુત્વા દાનવેન્દ્રા મહાબલાઃ ।
ઊચુઃ પ્રાઞ્જલયઃ સર્વે મા ભયં કુરુ સત્તમ ॥ ૨૩॥

ગજાનનં હનિષ્યામઃ પશ્યતિ ત્વયિ માનદ ।

એવમુક્ત્વા યયુઃ સર્વે દંશિતા યોદ્ધુમાદૃતાઃ ॥ ૨૪॥

તતસ્તૈર્યમસઙ્ઘાશૈર્દૃષ્ટં તેજોમયં મહત્ ।
અસ્ત્રં બ્રહ્મપતે ક્રૂરં પ્રલયસ્ય પ્રકાશકમ્ ॥ ૨૫॥

દદાહ દાનવાંસ્તત્ર સર્વતસ્તીક્ષ્ણતેજસા ।
હાહાકારરવાઃ સર્વે પપલુર્ભયવિહ્વલાઃ ॥ ૨૬॥

દાનવેન્દ્રૈસ્તતો દક્ષ મેઘાસ્ત્રં મોચિતં મહત્ ।
જલૌઘૈઃ સર્વતો મેઘા વવૃષુર્દારુણં પરમ્ ॥ ૨૭॥

જલં સર્વં મહાસ્ત્રં તચ્છોષયામાસ તત્ક્ષણાત્ ।
મેઘસ્થં તે તતો મેઘા નિસ્તેજસ્કા બભૂવિરે ॥ ૨૮॥

દૈત્યેન્દ્રાન્ દૈત્યમુખ્યાંશ્ચ જ્વાલયા પરશુસ્તદા ।
દદાહ ચ તતો ભીતા પપલુર્યત્ર તત્ર તે ॥ ૨૯॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં સ લોભાસુર આયયૌ ।
રથારૂઢો મહાતેજાસ્તન્નિવૃત્ત્યર્થમાદૃતઃ ॥ ૩૦॥

પશ્યતો દૈત્યરાજસ્ય જ્વાલાઽકસ્માત્ સમાગતા ।
રથં સાશ્વં દદાહાઽપિ તતઃ શસ્ત્રાણિ સર્વતઃ ॥ ૩૧॥

તતઃ પપાલ દૈત્યેન્દ્રઃ કવિં લોભાસુરો યયૌ ।
તં પ્રણમ્ય મહાભાગં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૩૨॥

લોભાસુર ઉવાચ ।
સ્વામિન્ ગજાનનો દેવ આગતઃ સ મહાબલઃ ।
(Page ખં. ૪ અ. ૪૧ પાન ૧૦૬)
દાહયામાસ શસ્ત્રેણાઽનિવાર્યેણ રથં સ મે ॥ ૩૩॥

તન્નિવૃત્ત્યર્થમેવાહં ન પશ્યામીહ કિઞ્ચન ।
અતસ્તે શરણં નાથ પ્રાપ્તોઽહં રક્ષ માં મુને ॥ ૩૪॥

મનોવાણીમયં સર્વં તસ્માન્ મૃત્યુર્ન મે ભવેત્ ।
નામરૂપધરઃ સોઽપિ કથં માં ધક્ષ્યતિ પ્રભો ॥ ૩૫॥

યદિ મે મરણં પ્રાપ્તમેવં તર્હ્યસ્તુ સામ્પ્રતમ્ ।
દેવાનાં શરણં નાથ ન ગમિષ્યામિ કર્હિચિત્ ॥ ૩૬॥

અતો વદ મહાભાગ ઉપાયં હિતદાયકમ્ ।

ત્વદાધારં ચ યોગીન્દ્ર જીવનં મે પ્રવર્તતે ॥ ૩૭॥

ઇતિ તસ્ય વચઃ શ્રુત્વા શુક્રઃ સર્વજ્ઞમુખ્યકઃ ।
લોભાસુરં ભયોદ્વિગ્નં તં જગાદ પ્રહર્ષયન્ ॥ ૩૮॥

શુક્ર ઉવાચ ।
મા કુરુષ્વ ભયં વત્સ શ ृણુ મે વચનં હિતમ્ ।
તત્ સમાચાર દૈત્યેન્દ્ર તતઃ ક્ષેમં ભવિષ્યતિ ॥ ૩૯॥

ગજાનનઃ પ્રસન્નાત્મા યદિચ્છતિ મહાસુર ।
તદેવ સત્યરૂપં વૈ ભવિષ્યતિ ન સંશયઃ ॥ ૪૦॥

બ્રહ્મણાં નાયકઃ પ્રોક્તો ગચ્છ તં વિનયાન્વિતઃ ।
નાઽયં દેવાધિપો દૈત્ય સુરાસુરમયઃ પ્રભુઃ ॥ ૪૧॥

એવં તસ્ય વચઃ શ્રુત્વા લોભસ્તં પુનરબ્રવીત્ ।
નિઃશ્વસ્ય દેવપૈઃ સાર્ધં કથં યોદ્ધું સમાયયૌ ॥ ૪૨॥

મધ્યસ્થશ્ચેન્ મહાભાગં તં ગચ્છામિ શરણ્યકમ્ ।
ન લજ્જા તેન મે સ્વામિન્ સંશયં છિન્ધિ હૃત્સ્થિતમ્ ॥ ૪૩॥

શુક્ર ઉવાચ ।
દેહરૂપં મહદ્બ્રહ્મ દેહ્યાત્મા વેદભાષિતમ્ ।
તયોર્યોગે મહાદૈત્ય બોધોઽસિ પદવાચકઃ ॥ ૪૪॥

બોધનાશે વિદેહાખ્યં બ્રહ્મ સૌખ્યં પ્રકીર્તિતમ્ ।
સુસિદ્ધિદં તદેવ ત્વં વિજાનીહિ ગજાનનમ્ ॥ ૪૫॥

સર્વેષાં બીજરૂપં યત્તસ્ય બીજં ન વિદ્યતે ।
તદેવ ગજશબ્દાખ્યં બ્રહ્મ વેદે પ્રકીર્તિતમ્ ॥ ૪૬॥

ગજચિહ્નેન ગચ્છન્તિ યોગિનો હિ ગજાનનમ્ ।
તેન નામ્ના સમાખ્યાતો મુનિભિસ્તત્ત્વદર્શિભિઃ ॥ ૪૭॥

યથા મુખસ્ય ચિહ્નેન જ્ઞાયતે માનવાદિભિઃ ।
ગજચિહ્નેન તદ્બ્રહ્મ જ્ઞાયતે યોગિભિઃ સદા ॥ ૪૮॥

તેનૈવ સ્થાપિતં વિશ્વં બોધરૂપં મહામતે ।
સ્વસ્વધર્મયુતં પૂર્ણં તત્રાઽયં સંસ્થિતોઽભવત્ ॥ ૪૯॥

પાતાલે દાનવાનાં ચ રાજ્યં સ્વર્ગે દિવૌકસામ્ ।

પૃથિવ્યાં માનવાનાં વૈ ત્રિવિધં રચિતં પુરા ॥ ૫૦॥

યદા દેવા મહાભાગ લોભયુક્તા મદાન્વિતાઃ ।
પાતાલસ્થાન્ દૈત્યગણાઞ્જઘ્નુર્મૂલવિનાશકાઃ ॥ ૫૧॥

તદાઽયં દેહધારી ચ દૈત્યેભ્યો વરદોઽભવત્ ।
દેવાનાં વિઘ્નસન્દાતા ગણેશઃ સર્વભાવવિત્ ॥ ૫૨॥

તતો દૈત્યગણાઃ સર્વે બલયુક્તા સુરેન્દ્રકાન્ ।
જઘ્નુર્વીરશ્રિયા રાજન્ વિઘ્નહીનપ્રભાવતઃ ॥ ૫૩॥

યદા દૈત્યા મહાલોભ લોભયુક્તા વિશેષતઃ ।
દેવાનાં જીવનાશાર્થમભવન્ કર્મખણ્ડનાત્ ॥ ૫૪॥

તદા વિઘ્નેશ્વરઃ સાક્ષાદ્દેહં ધૃત્વા ચ દાનવાન્ ।
હત્વા સ્વસ્થાનગાન્ દેવાનકરોદ્ધર્મપાલકઃ ॥ ૫૫॥

સુરાઽસુરાદયઃ સર્વે સ્વસ્વધર્મરતા યદા ।
તદાઽયં બ્રહ્મરૂપઃ સંશ્રિત્તે ચિન્તામણિર્બભૌ ॥ ૫૬॥

ચિત્તરૂપા સ્વયં બુદ્ધિર્ભ્રાન્તિરૂપા મહામતે ।
સિદ્ધિસ્તાભ્યાં ગણાધીશઃ ખેલતિ બ્રહ્મનાયકઃ ॥ ૫૭॥

સ્વસંવેદ્યાત્ મનસ્તસ્ય દર્શનં જાયતે યતઃ ।
(Page  ખં. ૪ અ. ૪૨ પાન ૧૦૭)
તેનાઽયં ગણપઃ સ્વાનન્દવાસી કથ્યતે બુધૈઃ ॥ ૫૮॥

અતસ્તસ્યૈવ દૈત્યેન્દ્ર શરણં સુખદં ભવેત્ ।
અન્યથા સકલં હત્વા મરિષ્યસિ ન સંશયઃ ॥ ૫૯॥

ગજાનનસ્ય દૈત્યેશ શસ્ત્રં બ્રહ્મમયં હ્યતઃ ।
તસ્મૈ કુરુ નમો ભક્ત્યા શાન્તરૂપં ભવિષ્યતિ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શુક્રોપદેશવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૧

## ૪.૪૨ લોભાસુરશાન્તિવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

શુક્રસ્ય વચનં શ્રુત્વા લોભાસુરઃ પ્રણમ્ય તમ્ ।
તથેતિ પ્રતિપાદ્યૈવ સકવિઃ શરણં યયૌ ॥ ૧॥

નગરપ્રાન્તભાગે તચ્છસ્ત્રં ગજાનનસ્ય ચ ।
સમીપસંસ્થાન્ જજ્વાલ દાનવાદીન્ સમાસ્થિતમ્ ॥ ૨॥

તં પ્રણમ્ય મહાદૈત્યો લોભઃ પરશુમુત્તમમ્ ।
કૃતાઞ્જલિઃ પ્રતુષ્ટાવ ભયભીતઃ સમન્તતઃ ॥ ૩॥

લોભાસુર ઉવાચ ।
નમસ્તે શસ્ત્રરાજાય શસ્ત્રાણાં બ્રહ્મરૂપિણે ।
નાનાશસ્ત્રાણિ શસ્ત્રેશ ત્વદાધારાણિ તે નમઃ ॥ ૪॥

પ્રલયાનલસઙ્કાશં સ્વરૂપં ધરતે નમઃ ।
અનન્તવીર્યયુક્તાય ભાસ્કરામિતતેજસે ॥ ૫॥

દૃશ્યાદૃશ્યમયાયૈવ સર્વદર્પહરાય તે ।
ધર્મસંસ્થાપનાર્થાય નાનારૂપધરાય ચ ॥ ૬॥

સાક્ષાદ્ગજાનનસ્યૈવ યદ્વીર્યં નિયતાત્મકમ્ ।
તદેવ ત્વં મહાશસ્ત્રં કિં તે સ્તૌમિ નમો નમઃ ॥ ૭॥

શરણાગતપાલાય સદા સ્વાનન્દસંસ્થિતઃ ।
રક્ષ માં ભયભીતં ભોઃ પરશો તે નમો નમઃ ॥ ૮॥

એવં લોભાસુરં સંસ્તુવન્તં તં તુ મહાબલમ્ ।
કાવ્યેન શસ્ત્રરાજં તચ્છાન્તિરૂપધરં બભૌ ॥ ૯॥

ગત્વા ગજાનનસ્યૈવ હસ્તગં તદ્બભૂવ હ ।
લોભાસુરઃ સ શુક્રેણાઽઽયયૌ વિઘ્નેશ્વરં તતઃ ॥ ૧૦॥

સમાગતં મહાદૈત્યં દૃષ્ટ્વા દેવર્ષયોઽભવન્ ।
વિસ્મિતા હર્ષિતાઃ સર્વે પરસ્પરમુખેક્ષણાઃ ॥ ૧૧॥

ગજાનનં પ્રણમ્યૈવ લોભાસુરઃ પ્રતાપવાન્ ।
કાવ્યેન પૂજયામાસ ભક્તિયુક્તો વિશેષતઃ ॥ ૧૨॥

પ્રણમ્ય તં પુનર્દૈત્યઃ કૃત્વા કરપુટં પ્રભુમ્ ।
ગજાનનં ભાવસંયુક્તસ્તુષ્ટાવ પ્રહર્ષિતઃ ॥ ૧૩॥

લોભાસુર ઉવાચ ।

નમસ્તે ગજવક્ત્રાય નાનાસિદ્ધિપ્રદાયિને ।
બુદ્ધિચાલકવેષાય બ્રહ્મણે વૈ નમો નમઃ ॥ ૧૪॥

હેરમ્બાય સદા સ્વાનન્દવાસિને મહાત્મને ।
પરાત્પરતરાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૧૫॥

સુરાસુરપ્રિયકર સુરાસુરમયાય તે ।
લોભયુક્તાન્ વિધર્મસ્થાન્નાશનાય નમો નમઃ ॥ ૧૬॥

દેવાનાં પાલકાયૈવ દૈત્યાનાં રક્ષકાય તે ।
સર્વેષાં દર્પહન્ત્રે વૈ ગણેશાય નમો નમઃ ॥ ૧૭॥

લમ્બોદરાય દેવેશ દૈત્યેશ મૂષકધ્વજ ।
અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ॥ ૧૮॥

આદિમધ્યાન્ત હીનાયાદિમધ્યાન્તસ્વરૂપિણે ।
બ્રહ્મેશાય મહેશાનાં પાલકાય નમો નમઃ ॥ ૧૯॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે ચ સદા શાન્તિધરાય તે ।
(Page ખં. ૪ અ. ૪૨ પાન ૧૦૮)
શાન્તીનાં શાન્તિરૂપાય નમો યોગાય વૈ નમઃ ॥ ૨૦॥

એકદન્તાય સર્વેશ વક્રતુણ્ડાય તે નમઃ ।
મહોદરાય પૂર્ણાય પૂર્ણાનન્દાય તે નમઃ ॥ ૨૧॥

સર્વેષાં મૂલબીજાય માત્રે પિત્રે નમો નમઃ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પાલકાય નમો નમઃ ॥ ૨૨॥

બીજરૂપં ગણાધીશ જગતાં બ્રહ્મણાં ગજમ્ ।
ચિહ્નેન લભ્યસે તેન ગજાનન નમોઽસ્તુ તે ॥ ૨૩॥

બોધહીનાય રૂપાય સદા સાઙ્ખ્યમયાય ચ ।
વિદેહાય નમસ્તુભ્યં પ્રત્યક્ષં રૂપધારિણે ॥ ૨૪॥

યં સ્તોતું ન સમર્થાશ્ચ વેદા યોગિશિવાદયઃ ।
તં કિં સ્તૌમિ ગણાધીશ નમસ્તે વરદો ભવ ॥ ૨૫॥

ત્વદ્દર્શનજમાહાત્મ્યાત્ સંસ્તુતોઽસિ મહાપ્રભો ।
તેન મેઽભયદો ભૂત્વા રક્ષ દાસં વિશેષતઃ ॥ ૨૬॥

એવં સ્તુત્વા મહાલોભઃ પ્રણનામ ગજાનનમ્ ।

તમુવાચ દયાસિન્ધુર્ભક્તં ભક્તપ્રપાલકઃ ॥ ૨૭॥

ગજાનન ઉવાચ ।
વરં વૃણુ મહાલોભ દદામિ મનસીપ્સિતમ્ ।
પ્રસન્નોઽહં વિશેષેણ ભક્ત્યા કાવ્યપ્રદત્તયા ॥ ૨૮॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
પઠતઃ શ્ૃણ્વતશ્ચૈવ લોભ તં નૈવ પીડય ॥ ૨૯॥

પુત્રપૌત્રાદિસંયુક્તો ભુક્ત્વા ભોગાન્ મનેપ્સિતાન્ ।
અન્તે સ્વાનન્દલોકે સ બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૩૦॥

યઃ સ્તૌતિ મામનેનૈવ સ મે માન્યો ન સંશયઃ ।
સદા સુરસ્વભાવેન હીનઃ સોઽપિ ભવિષ્યતિ ॥ ૩૧॥

ત્વાં હન્તું ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।
શરણાગતમેવં તુ દાનવોત્તમ હન્મિ ન ॥ ૩૨॥

ગજાનનવચઃ શ્રુત્વા લોભો હર્ષસમન્વિતઃ ।
ઉવાચ તં મહાબુદ્ધિર્ભાવેન બ્રહ્મનાયકમ્ ॥ ૩૩॥

લોભાસુર ઉવાચ ।
ગજાનન વરં મે ત્વં દેહિ સમ્પૂર્ણદાયક ।
તવ ભક્તિસ્વરૂપં ચ ગાણપત્યપ્રિયાત્મતામ્ ॥ ૩૪॥

સ્થાનં દેહિ વિશેષેણ પ્રભો વૃત્તિં ચ શાશ્વતીમ્ ।
કાર્યં કથય સર્વેશ કરિષ્યામિ ગજાનન ॥ ૩૫॥

ગજાનન ઉવાચ ।
મદીયા ભક્તિરાદ્યા તે ભવિષ્યતિ મહામતે ।
ગાણપત્યેષુ તે સ્નેહો વૃદ્ધિં યાસ્યતિ નિત્યદા ॥ ૩૬॥

સ્વસ્થાને ત્વં સ્થિરો ભૂત્વા તિષ્ઠ મે ભક્તિસંયુતઃ ।
યત્ર મે સ્મરણં નાસ્તિ પૂજનં વાઽસુરોત્તમ ॥ ૩૭॥

આદૌ કર્માદિષુ પ્રાજ્ઞ તત્ સમાહર નિત્યદા ।
યથા દેવાઃ પ્રિયા મે તુ તથા ત્વમપિ લોભક ॥ ૩૮॥

મમ ભક્તાશ્ચ યે દૈત્ય તાન્ રક્ષસ્વ વિશેષતઃ ।
મદીયભક્તિરૂપં તુ લોભ વર્ધય તેષુ વૈ ॥ ૩૯॥

એવમુક્તઃ પ્રભું લોભસ્તં પ્રણમ્ય ગજાનનમ્ ।
કાવ્યેન સહિતઃ સોઽપિ સ્વપુરં પ્રયયૌ પ્રભો ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે લોભાસુરશાન્તિવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૨
(Page ખં. ૪ અ. ૪૩ પાન ૧૦૯)

## ૪.૪૩ દેવમુનિકૃતસ્તુતિવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શાન્તિરૂપધરં લોભં દૃષ્ટ્વા દેવર્ષયોઽમલાઃ ।
ગજાનનં નિજં નાથં હર્ષિતા નેમુરાદરાત્ ॥ ૧॥

ગજાનનં પૂજયિત્વા વિધાનેન સુરર્ષયઃ ।
પુનઃ પ્રણમ્ય તં સર્વે તુષ્ટુવુઃ કરસમ્પુટૈઃ ॥ ૨॥

વિદેહરૂપં ભવબન્ધહારં સદા સ્વનિષ્ઠં સ્વમુખપ્રદં તમ્ ।
અમેયસાઙ્ખ્યેન ચ લભ્યમીશં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૩॥

મુનીન્દ્રવન્દ્યં વિધિબોધહીનં સુબુદ્ધિદં બુદ્ધિધરં પ્રશાન્તમ્ ।
વિકાલહીનં સકલાન્તગં વૈ ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૪॥

અમેયરૂપં હૃદિ સંસ્થિતં તં બ્રહ્માહમેકં ભ્રમનાશકારમ્ ।
અનાદિમધ્યાન્તમપારરૂપં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૫॥

જગત્પ્રમાણં જગદીશમેવમગમ્યમાદ્યં જગદાદિહીનમ્ ।
અનાત્મનાં મોહપ્રદં પુરાણં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૬॥

ન ભૂર્ન રૂપં ન જલં પ્રકાશં ન તેજસિસ્થં ન સમીરણસ્થમ્ ।
ન ખે ગતં પઞ્ચવિભૂતિહીનં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૭॥

ન વિશ્વગં તૈજસગં ન પ્રાજ્ઞં સમષ્ટિવ્યષ્ટિસ્થમનન્તગં ન ।
ગુણૈર્વિહીનં પરમાર્થભૂતં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૮॥

ગુણેશગં નૈવ ચ બિન્દુસંસ્થં ન દેહિનં બોધમયં ન ઢુણ્ઢિમ્ ।
સંયોગહીનાઃ પ્રવદન્તિ તત્સ્થં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૯॥

અનાગતં નૈવ ગતં ગણેશં કથં તદાકારમયં વદામઃ ।

તથાપિ સર્વં પ્રભુદેહસંસ્થં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૦॥

યદિ ત્વયા નાથ કૃતં ન કિઞ્ચિત્તદા કથં સર્વમિદં વિભાતિ ।
અતો મહાત્માનમચિન્ત્યમેવ ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૧॥

સુસિદ્ધિદં ભક્તજનસ્ય દેવં સ કામિકાનામિહ સૌખ્યદં તમ્ ।
અકામિકાનાં ભવબન્ધહારં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૨॥

સુરેન્દ્રસેવ્યં હ્યસુરૈઃ સુસેવ્યં સમાનભાવેન વિરાજયન્તમ્ ।
અનન્તવાહં મુષકધ્વજં તં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૩॥

સદા સુખાનન્દમયે જલે ચ સમુદ્રજે ચેક્ષુરસે નિવાસમ્ ।
દ્વન્દ્વસ્ય પાનેન ચ નાશરૂપે ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૪॥

ચતુઃપદાર્થા વિવિધપ્રકાશાસ્ત એવ હસ્તાઃ સ ચતુર્ભુજં તમ્ ।
અનાથનાથં ચ મહોદરં વૈ ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૫॥

મહાખુમારૂઢમકાલકાલં વિદેહયોગેન ચ લભ્યમાનમ્ ।
અમાયિનં માયિકમોહદં તં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૬॥

રવિસ્વરૂપં રવિભાસહીનં હરિસ્વરૂપં હરિબોધહીનમ્ ।
શિવસ્વરૂપં શિવભાસનાશં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૭॥

મહેશ્વરીસ્થં ચ સુશક્તિહીનં પ્રભું પરેશં પરવન્દ્યમેવમ્ ।
અચાલકં ચાલકબીજભૂતં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૮॥

શિવાદિદેવૈશ્ચ ખગૈઃ સુવન્દ્યં નરૈર્લતાવૃક્ષપશુપ્રભૂભિઃ ।
ચરાચરૈર્લોકવિહીનમેવં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૧૯॥

મનોવચોહીનતયા સુસંસ્થં નિવૃત્તિમાત્રં હ્યજમવ્યયં તમ્ ।
તથાપિ દેવં પુર આસ્થિતં તં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૨૦॥

વયં સુધન્યા ગણપસ્તવેન તથૈવ નત્યાર્ચનતસ્તવૈવ ।
(Page ખં. ૪ અ. ૪૩ પાન ૧૧૦)
ગણેશરૂપાશ્ચ કૃતાસ્ત્વયા તં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૨૧॥

ગજાખ્યબીજં પ્રવદન્તિ વેદાસ્તદેવ ચિહ્નેન ચ યોગિનસ્ત્વામ્ ।
ગચ્છન્તિ તેનૈવ ગજાનનસ્ત્વં ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૨૨॥

પુરાણવેદાઃ શિવવિષ્ણુકાદ્યાઽમરાઃ શુકાદ્યા ગણપસ્તવે વૈ ।
વિકુણ્ઠિતાઃ કિં ચ વયં સ્તવામ ગજાનનં ભક્તિયુતા ભજામઃ ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં નેમુઃ સર્વે પુનઃ પુનઃ ।
તાનુત્થાપ્ય વચો રમ્યં ગજાનન ઉવાચ હ ॥ ૨૪॥

ગજાનન ઉવાચ ।
વરં બ્રૂત મહાભાગા દેવાઃ સર્ષિગણાઃ પરમ્ ।
સ્તોત્રેણ પ્રીતિસંયુક્તઃ પરં દાસ્યામિ વાઞ્છિતમ્ ॥ ૨૫॥

ગજાનનવચઃ શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।
જગુસ્તં ભક્તિભાવેન સાશ્રુનેત્રાઃ પ્રજાપતે ॥ ૨૬॥

દેવર્ષય ઊચુઃ ।
ગજાનન યદિ સ્વામિન્ પ્રસન્નો વરદોઽસિ ભોઃ ।
તદા ભક્તિં દૃઢાં દેહિ લોભહીનાં ત્વદીયકામ્ ॥ ૨૭॥

લોભાસુરસ્ય દેવેશ કૃતા શાન્તિઃ સુખપ્રદા ।
તદા જગદિદં સર્વં વરયુક્તં કૃતં ત્વયા ॥ ૨૮॥

અધુના દેવદેવેશ કર્મયુક્તા દ્વિજાદયઃ ।
ભવિષ્યન્તિ ધરાયાં વૈ વયં સ્વસ્થાનગાસ્તથા ॥ ૨૯॥

સ્વસ્વધર્મરતાઃ સર્વે ગજાનન કૃતાસ્ત્વયા ।
અતઃપરં વરં યાચામહે ઢુણ્ઢે કમપ્યહો ॥ ૩૦॥

યદા તે સ્મરણં નાથ કરિષ્યામો વયં પ્રભો ।
તદા સઙ્કટહીનાન્ વૈ કુરુ ત્વં નો ગજાનન ॥ ૩૧॥

એવમુક્ત્વા પ્રણેમુસ્તં ગજાનનમનામયમ્ ।
સ તાનુવાચ પ્રીતાત્મા ભક્ત્યધીનસ્વભાવતઃ ॥ ૩૨॥

ગજાનન ઉવાચ ।
યદ્યચ્ચ પ્રાર્થિતં દેવા મુનયઃ સર્વમઞ્જસા ।
ભવિષ્યતિ ન સન્દેહો મત્સ્મૃત્યા સર્વદા હિ વઃ ॥ ૩૩॥

ભવત્કૃતમદીયં વૈ સ્તોત્રં સર્વત્ર સિદ્ધિદમ્ ।
ભવિષ્યતિ વિશેષેણ મમ ભક્તિપ્રદાયકમ્ ॥ ૩૪॥

પુત્રપૌત્રપ્રદં પૂર્ણં ધનધાન્યવિવર્ધનમ્ ।

સર્વસમ્પત્કરં દેવાઃ પઠનાચ્છ્રવણાન્નૃણામ્ ॥ ૩૫॥

મારણોચ્ચાટનાદીનિ નશ્યન્તિ સ્તોત્રપાઠતઃ ।
પરકૃત્યં ચ વિપ્રેન્દ્રા અશુભં નૈવ બાધતે ॥ ૩૬॥

સઙ્ગ્રામે જયદં ચૈવ યાત્રાકાલે ફલપ્રદમ્ ।
શત્રૂચ્ચાટનકાર્યેષુ પ્રશસ્તં તદ્ભવિષ્યતિ ॥ ૩૭॥

કારાગૃહગતસ્યૈવ બન્ધનાશકરં ભવેત્ ।
અસાધ્યં સાધયેત્ સર્વમનેનૈવ સુરર્ષયઃ ॥ ૩૮॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાવધિમ્ ।
પ્રયોગં યઃ કરોત્યેવ સ ભવેત્ સર્વસિદ્ધિભાક્ ॥ ૩૯॥

ધર્માર્થકામમોક્ષાણાં બ્રહ્મભૂયસ્ય દાયકમ્ ।
ભવિષ્યતિ ન સન્દેહઃ સ્તોત્રં મદ્ભક્તિવર્ધનમ્ ॥ ૪૦॥

એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તરધીયત ।
દેવાઃ સર્ષિગણાઃ સર્વેઽભવન્ ખિન્ના ઇવ પ્રભો ॥ ૪૧॥

ગજાનનસ્ય મૂર્તિસ્તૈઃ સ્થાપિતા સિદ્ધિદા તતઃ ।
નૈરૃતે કોણભાગે સ્મ દર્શનેન સુખપ્રદા ॥ ૪૨॥

તત્રૈવ સંસ્થિતા દેવા મુનયો ભક્તિસંયુતાઃ ।
અંશેન સ્વાધિકારેષુ સ્વાશ્રમેષુ ગતા બભુઃ ॥ ૪૩॥

તતઃ સ્વધર્મસંયુક્તા બભૂવુર્માનવા ભુવિ ।
યથાયોગ્યં જગત્ સર્વં બભૂવે હર્ષિતં વિધે ॥ ૪૪॥

(Page ખં. ૪ અ. ૪૪ પાન ૧૧૧)
એતદ્ગજાનનસ્યૈવ ચરિતં પાપનાશનમ્ ।
ભુક્તિમુક્તિપ્રદં દક્ષ કથિતં બ્રહ્મદં પરમ્ ॥ ૪૫॥

યઃ પઠેત્ પાઠયેદ્વાપિ શ ૃણુતે શ્રદ્ધયાન્વિતઃ ।
સ ઈપ્સિતફલં ભુક્ત્વા બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે દેવમુનિકૃતસ્તુતિવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૩

# ૪.૪૪ સિન્દૂરશિવસમાગમો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽહં મુદ્ગલ સ્વામિંસ્ત્વત્સઙ્ગાન્નાત્ર સંશયઃ ।
લોભશાન્તિકરં ચિત્રં શ્રુતં ભક્ત્યા ચરિત્રકમ્ ॥ ૧॥

ન તૃપ્તોઽહં ગજાસ્યસ્ય સુધાપાન ઇવ પ્રભો ।
વદ ક્ષેત્રસ્ય માહાત્મ્યમધુના તસ્ય સર્વદમ્ ॥ ૨॥

ગજાનનસ્ય ભક્ત્યર્થમવતારાન્ ધૃતાન્ વદ ।
સઙ્ક્ષેપેણ મહાભાગ સર્વજ્ઞોઽસિ ચ તે નમઃ ॥ ૩॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા મુદ્ગલો હર્ષસંયુતઃ ।
જગાદ તં મહાભાગં મહાભાગો દયાન્વિતઃ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
અવતારા અનન્તાશ્ચ ગજાનનસ્ય માનદ ।
ભક્તાનાં કાર્યસિદ્ધ્યર્થં કથનં નૈવ શક્યતે ॥ ૫॥

તથાપિ શ◌ૃણુ દક્ષ ત્વમવતારચરિત્રકમ્ ।
ગજાનનસ્ય કથયામિ સમાસેન સર્વદમ્ ॥ ૬॥

પાર્વત્યા શઙ્કરેણૈવાઽઽરાધિતો ગણનાયકઃ ।
દિવ્યવર્ષસહસ્રેણ પ્રસન્નો વરદોઽભવત્ ॥ ૭॥

તાભ્યાં સમ્પૂજિતો દેવઃ સ્તુતઃ સંયાચિતોઽભવત્ ।
ત્વં પુત્રો ભવ નૌ સ્વામિન્ સંસારોત્તારણાય વૈ ॥ ૮॥

તથેતિ પ્રતિપાદ્યાઽસૌ ગણેશોંઽતર્દધે સ્વયમ્ ।
પુત્રઃ સિન્ધુવધાયાભૂન્ મયૂરેશ ઇતિ સ્મૃતઃ ॥ ૯॥

હત્વા સિન્ધું મહાવીર્યં ગતઃ સ્વાનન્દકે પુરે ।
એવં નાનાઽવતારાન્ સ દધાર શિવયોર્ગૃહે ॥ ૧૦॥

અષ્ટકોટ્યવતારાશ્ચ ગણેશસ્ય પ્રકીર્તિતાઃ ।
શિવપુત્રાશ્ચ તે ખ્યાતાઃ કાર્યાર્થં ત્વંશભાવતઃ ॥ ૧૧॥

કેચિચ્છિવાત્ સુમુદ્ભૂતાઃ કેચિચ્છક્તેર્મહાત્મનઃ ।

ઉભયોર્યોગતઃ કેચિત્ કલાંશા અભવન્ પરાઃ ॥ ૧૨॥

યાદૃશં સઙ્કટં પ્રાપ્તં તદર્થં સંસ્મૃતો વિભુઃ ।
તાવત્ કલાંશયોગેન પુત્રોઽભૂત્ સુખદાયકઃ ॥ ૧૩॥

કૃત્વા કાર્યસ્ય સંસિદ્ધિં પુનઃ સ્વાનન્દગોઽભવત્ ।
તદ્વિયોગેન સન્તપ્તૌ શિવૌ કિલ બભૂવતુઃ ॥ ૧૪॥

અન્યે નાનાઽવતારાશ્ચ કશ્યપાદિગૃહેંઽશતઃ ।
ધૃતા ગજાનનેનૈવ વક્તું નૈવ પ્રશક્યતે ॥ ૧૫॥

ઇતિહાસં પ્રવક્ષ્યામિ સર્વસિદ્ધિપ્રદાયકમ્ ।
ગજાનનાવતારેણ યુક્તં શ‍ૃણુ પ્રજાપતે ॥ ૧૬॥

એકદા નિદ્રિતં શમ્ભુર્બ્રહ્માણં પ્રયયૌ પ્રભુઃ ।
કિઞ્ચિત્ કાર્યાર્થમેવં તમુત્થાપ્ય સ્વગૃહેઽગમત્ ॥ ૧૭॥

સ ઉત્થિતો મહાજૃમ્ભાં ચકાર ક્રોધસંયુતઃ ।
તસ્માજ્જાતઃ પુમાનેકો રક્તવર્ણઃ સુશોભનઃ ॥ ૧૮॥

સુવાસબહુલેનૈવ યુક્તઃ કામ ઇવાપરઃ ।
તં દૃષ્ટ્વા વિસ્મિતો બ્રહ્મા જગાદ સ મહાબલમ્ ॥ ૧૯॥

બ્રહ્મોવાચ ।
કોઽસિ ત્વં પુરુષશ્રેષ્ઠ કિમર્થં હ્યાગતો વદ ।
એવં પૃષ્ટઃ સ તં દેવં જગાદ મેઘનિઃસ્વનઃ ॥ ૨૦॥

પુમાનુવાચ ।
જૃમ્ભાયાસ્તે સમુત્પન્નઃ પુત્રોઽહં દેવનાયક ।
સ્થાનં નામાદિકં દેહિ ભક્ષણં વિવિધં પિતઃ ॥ ૨૧॥

તતોઽતિહર્ષિતો બ્રહ્મા પુત્રં દૃષ્ટ્વા મહાદ્ભુતમ્ ।
દદૌ તસ્મૈ વિશેષેણ વરાંસ્તાઞ્ શ‍ૃણુ માનદ ॥ ૨૨॥

સુવાસબહુલં રક્તં વપુસ્તે તેન સિન્દુર ।
નામ નાનાવિધાન્ ભોગાન્ ભુઙ્ક્ષ્વ સર્વત્રગઃ સ્વયમ્ ॥ ૨૩॥

ન બલેન સમસ્તે વૈ ભવિષ્યતિ ચરાચરે ।
બ્રહ્માણ્ડજયસંયુક્તો ભવ પુત્ર મમાજ્ઞયા ॥ ૨૪॥

યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ।

ક્રોધાદાલિઙ્ગસે યં ત્વં ભસ્મસાત્તં કરિષ્યસિ ॥ ૨૫॥

એવં નાનાવરાન્ દત્ત્વા સંસ્થિતં પ્રપિતામહમ્ ।
તં પ્રણમ્ય સ સિન્દૂરો જગામાસ્તુત્ય ભૂતલે ॥ ૨૬॥

શૌનક ઉવાચ ।
તપોહીનાય દાતાઽસૌ દદૌ સન્દુર્લભાન્ વરાન્ ।
કિં કારણં વદ પ્રાજ્ઞ સંશયો મે મહાન્ હૃદિ ॥ ૨૭॥

સૂત ઉવાચ ।
ઇચ્છાસઙ્કલ્પસિદ્ધ્યર્થં તપસ્તપતિ યો નરઃ ।
વિપુલે સોઽપિ તપસિ મૃતો યદિ ભવેન્ મુને ॥ ૨૮॥

અન્યસ્મિન્ જન્મનિ પ્રાજ્ઞઃ ફલયુક્તઃ પ્રજાયતે ।
સ્વલ્પશ્રમેણ દેવોઽપિ વરં દદાતિ નિશ્ચિતમ્ ॥ ૨૯॥

એતત્તે કથિતં સર્વં સંશયચ્છેદનં વચઃ ।
અધુના શ‍ૃણુ સંવાદં પ્રકૃતં યં પુરા ભવમ્ ॥ ૩૦॥

વિચારં માર્ગમધ્યે સ ગત્વા સિન્દૂર આકરોત્ ।
તપોહીનાયાઽપિ દેવો મે દદાતિ વરં કથમ્ ॥ ૩૧॥

અતોઽહં વઞ્ચિતો નૂનં વિધિના નાત્ર સંશયઃ ।
લિઙ્ગયિત્વા મૃતં કુર્વે તં સત્યત્વદિદૃક્ષયા ॥ ૩૨॥

નિઃસંશયં ભવેદેવં વિચાર્ય સિન્દુરાસુરઃ ।
આયયૌ બ્રહ્મણઃ સોઽપિ સમીપે ક્રોધસંયુતઃ ॥ ૩૩॥

ગર્જયિત્વા વિધાતારમાલિઙ્ગિતું પ્રચક્રમે ।
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં બ્રહ્મોવાચ સુદારુણમ્ ॥ ૩૪॥

બ્રહ્મોવાચ ।
મદ્વરસ્ય પ્રભાવેન માં હન્તું સમુપાગતઃ ।
અતો દૈત્યોઽસિ દુષ્ટ ત્વમભાગ્યાન્નાત્ર સંશયઃ ॥ ૩૫॥

પુત્રસ્નેહેન રે દુષ્ટ વરા દત્તાઃ સુદુર્લભાઃ ।
અતો ગજાનનસ્ત્વાં વૈ હનિષ્યતિ કુલાધમ ॥ ૩૬॥

એવમુક્ત્વા પપાલાઽસૌ વિકુણ્ઠે શરણં યયૌ ।
નારાયણં ચ સિન્દૂરસ્તમનુ પ્રયયૌ ખલઃ ॥ ૩૭॥

નારાયણાય વૃત્તાન્તં કથયામાસ વિસ્તરાત્ ।
સોઽપિ શ્રુત્વા વિનિઃશ્વસ્યાઽભવત્ સમ્પૂજ્ય સંસ્થિતઃ ॥ ૩૮॥

એતસ્મિન્નન્તરે તત્ર સિન્દૂરશ્ચ સમાગમત્ ।
જગાદ વિષ્ણુમવ્યક્તં વચઃ ક્રોધસમન્વિતઃ ॥ ૩૯॥

સિન્દૂર ઉવાચ ।
વિષ્ણો રક્ષ વિધાતારં માં શપ્ત્વા પ્રસમાગતમ્ ।
હનિષ્યામિ ત્વયા સાર્ધં પશ્ય મે પૌરુષં પરમ્ ॥ ૪૦॥

વિષ્ણુરુવાચ ।
અહં સત્ત્વગુણશ્ચાયં વેદાધ્યયનતત્પરઃ ।
આવાં હત્વા મહાદૈત્ય ન યશસ્તે ભવિષ્યતિ ॥ ૪૧॥

ત્વદધીનૌ ચ સિન્દૂર આવાં જાનીહિ માનદ ।
શઙ્કરઃ સર્વસંહર્તા સ યશસ્તે હરિષ્યતિ ॥ ૪૨॥

વિષ્ણોર્વચનમાકર્ણ્ય ત્યક્ત્વા વિષ્ણું ચતુર્મુખમ્ ।
જગામ શઙ્કરં સદ્યઃ કૈલાસે યુદ્ધલાલસઃ ॥ ૪૩॥

ધ્યાનસ્થં શઙ્કરં દૃષ્ટ્વા વિચારમકરોદ્ધૃદિ ।
અમું નગ્નં તપોયુક્તં કિમર્થં હન્મિ મૂર્ખવત્ ॥ ૪૪॥

(Page ખં. ૪ અ. ૪૫ પાન ૧૧૩)
વામાઙ્ગે સંસ્થિતાં નારીં રૂપેણાપ્રતિમાં પરામ્ ।
તાં ગૃહીત્વા ગમિષ્યામિ સ્વેચ્છયા ક્રીડાનોત્સુકઃ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે સિન્દૂરશિવસમાગમો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૪

## ૪.૪૫ શિવવિચારવર્ણનપ્રસઙ્ગો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એવં નિશ્ચિતસઙ્કલ્પઃ સિન્દૂરો ગિરિજાં તતઃ ।
ગૃહ્યોડ્ડીય યયૌ સદ્યો મૂર્ચ્છિતાં ભયવિહ્વલામ્ ॥ ૧॥

તસ્ય શ્વસનવેગેન પતિતા નન્દિમુખ્યકાઃ ।

ગણાઃ પુનઃ સમુત્થાય હાહાકારં પ્રચક્રિરે ॥ ૨॥

હસ્તગા પાર્વતી તત્ર સાવધાના બભૂવ હ ।
સસ્માર ગણપં દેવં દૈત્યપાશનિયન્ત્રિતા ॥ ૩॥

ગૌર્યુવાચ ।
ગજાનન જ્ઞાનવિહારકારિન્ ન માં ચ જાનાસિ પરાવમર્શામ્ ।
ગણેશ રક્ષસ્વ ન ચેચ્છરીરં ત્યજામિ સદ્યસ્ત્વયિ ભક્તિયુક્તા ॥ ૪॥

વિઘ્નસ્ય શત્રોઽસુરસઙ્ઘહન્તર્વિઘ્નેશ હેરમ્બ મહોદરપ્રિય ।
માં રક્ષ દૈત્યાત્ત્વયિ ભક્તિયુક્તાં લમ્બોદર પ્રેમવિવર્ધનાચ્યુત ॥ ૫॥

કિં સિદ્ધિબુદ્ધિપ્રસરેણ મોહયુક્તોઽસિ કિં વા નિશિ નિદ્રિતોઽસિ ।
કિં લક્ષલાભાર્થવિચારયુક્તઃ કિં માં ચ વિસ્મૃત્ય સુસંસ્થિતોઽસિ ॥ ૬॥

કિં ભક્તસઙ્ગેન ચ દેવદેવ નાનોપચારૈશ્ચ સુયન્ત્રિતોઽસિ ।
કિં મોદકાદ્યૈર્ગણપાઽઽવૃતોઽસિ નાનાવિહારેષુ ચ વક્રતુણ્ડ ॥ ૭॥

સ્વાનન્દભોગેષુ પરિપ્લુતોઽસિ દાસીં ચ વિસ્મૃત્ય મહાનુભાવ ।
અનન્તલીલાસુ સલાલસોઽસિ કિં ભક્તરક્ષાર્થસુસઙ્કટસ્થ ॥ ૮॥

અહો ગણેશામૃતપાનદક્ષામરૈસ્તથા વાઽસુરપૈઃ સ્મૃતોઽસિ ।
તદર્થનાનાવિધિસંયુતોઽસિ વિસૃજ્ય દાસીં ત્વમનન્યભાવામ્ ॥ ૯॥

રક્ષસ્વ માં દીનતમાં પરેશ સર્વત્ર ચિત્તેષુ ચ સંસ્થિતસ્ત્વમ્ ।
પ્રભો વિલમ્બેન વિનાયકોઽસિ બ્રહ્મેશ કિં દેવ નમો નમસ્તે ॥ ૧૦॥

ભક્તાભિમાનીતિ ચ નામ મુખ્યં વેદે બભૂવાત્ર ન કિં મહાત્મન્ ।
આગત્ય હત્વા દિતિજં સુરેશ માં રક્ષ દાસીં હૃદિ પાદનિષ્ઠામ્ ॥ ૧૧॥

અહો ન દૂરં બત કિઞ્ચિદેવ કથં ન બુદ્ધીશ સમાગતોઽસિ ।
સઞ્ચિન્ત્ય દેહં પ્રજહામિ તે હિ યશઃ કરિષ્યે વિપરીતમેવ ॥ ૧૨॥

રક્ષ રક્ષ દયાસિન્ધોઽપરાધાન્ મે ક્ષમસ્વ ચ ।
ક્ષણે ક્ષણે વયં દાસ્યો રક્ષિતવ્યા વિશેષતઃ ॥ ૧૩॥

સ્તુવન્ત્યામેવ પાર્વત્યાં શઙ્કરો બોધસંયુતઃ ।
બભૂવ ગણપાનાં વૈ શ્રુત્વા હાહારવં વિધે ॥ ૧૪॥

ગણેશં મનસા સ્મૃત્વા વૃષારૂઢઃ સમાયયૌ ।
ક્ષણેન દૈત્યરાજં તં દૃષ્ટ્વા ડમરુણા ત્વહન્ ॥ ૧૫॥

તતઃ સોઽપિ શિવં વીક્ષ્યાઽઽલિઙ્ગિતું ધાવિતોઽભવત્ ।
શિવસ્ય શૂલકાદીનિ શસ્ત્રાણ્યાકુણ્ઠિતાનિ વૈ ॥ ૧૬॥

(Page ખં. ૪ અ. ૪૫ પાન ૧૧૪)
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં ભયભીતો મહેશ્વરઃ ।
સસ્માર ગણપં સોઽપિ નિર્વિઘ્નાર્થં પ્રજાપતે ॥ ૧૭॥

પાર્વત્યાઃ સ્તવનં શ્રુત્વા સ ગજાનન આયયૌ ।
બ્રાહ્મણસ્ય સ્વરૂપેણ તયોર્મધ્યે પ્રયુદ્ધ્યતોઃ ॥ ૧૮॥

ગણેશેન કૃતં તત્ર કૌતુકં પરમાદ્ભુતમ્ ।
પપાત ગુપ્તરૂપશ્ચ પરશુર્દૈત્યવક્ષસિ ॥ ૧૯॥

તેનાહતં મહાદૈત્યં વ્યાકુલં વીક્ષ્ય વિઘ્નપઃ ।
તતસ્તં બ્રાહ્મણઃ પ્રાહ શૃણુ દૈત્ય વચો હિતમ્ ॥ ૨૦॥

જગજ્જનિમિમાં શક્તિં મુઞ્ચ નો ચેચ્છિવઃ સ્વયમ્ ।
ગુપ્તરૂપેણ સદ્યસ્ત્વાં મારયિષ્યતિ નિશ્ચિતમ્ ॥ ૨૧॥

અહં શમ્ભું કરિષ્યામિ ત્વદાજ્ઞાવશવર્તિનમ્ ।
ભાર્યાં તસ્ય પરિત્યજ્ય કુરુ રાજ્યં ત્રિલોકગઃ ॥ ૨૨॥

તથેતિ સિન્દુરેણૈવ કૃતં સોઽપિ શિવં વચઃ ।
જગાદ હાસ્યવદનો દૈત્યાધીનો ભવ પ્રભો ॥ ૨૩॥

બ્રહ્મલબ્ધવરં દૈત્યં ન જેતું તં ક્ષમો ભવાન્ ।
મહેશશક્તિં સઙ્ગૃહ્ય કાલસ્ય ક્રમણં કુરુ ॥ ૨૪॥

તથેતિ શઙ્કરેણોક્તં દદૌ શક્તિં શિવાય સઃ ।
દૈત્યઃ કૈલાસગો ભૂત્વા નનન્દ વિજયી તતઃ ॥ ૨૫॥

તતઃ કૈલાસમેવં સ ત્યક્ત્વા ભૂલોકગોઽભવત્ ।
દૈત્યસ્ત્રિભુવનં જિત્વા જગદીશો બભૂવ હ ॥ ૨૬॥

અન્તર્ધાનં ચકારાઽસૌ ગણેશો દ્વિજરૂપધૃક્ ।
તત્ દૃષ્ટ્વા પાર્વતી તત્ર શોકયુક્તા બભૂવ હ ॥ ૨૭॥

અહો બ્રાહ્મણરૂપેણાઽઽગતોઽયં ગણનાયકઃ ।
મોચયિત્વા સ માં શમ્ભો ત્વાં સંરક્ષ્ય યયૌ પુનઃ ॥ ૨૮॥

તતસ્તૌ પાર્વતીશમ્ભૂ પલ્લીવનગૌ પ્રભૂ ।
બભૂવતુશ્ચ વિઘ્નેશં તપસા હૃદિ ચિન્તકૌ ॥ ૨૯॥

તતાપ તપ ઉગ્રં સ સસ્ત્રીકઃ શઙ્કરસ્તતઃ ।
ગતે વર્ષશતે પૂર્ણે તં ગજાનન આયયૌ ॥ ૩૦॥

ગણેશ ઉવાચ ।
વરં વૃણુ મહાદેવ યત્તે ચિત્તે પ્રવર્તતે ।
દાસ્યામિ તપસા તુષ્ટો વાઞ્છિતં પ્રાહ શઙ્કરમ્ ॥ ૩૧॥

તતસ્તં શઙ્કરો નત્વા સ્તુત્વા નાનાવિધૈઃ સ્તવૈઃ ।
પાર્વત્યા પૂજ્ય વિઘ્નેશં પ્રણમ્ય પ્રત્યુવાચ હ ॥ ૩૨॥

શિવ ઉવાચ ।
વરદોઽસિ ગણાધીશ તદા મે ત્વં સુતો ભવ ।
યાવજ્જીવનપર્યન્તં તિષ્ઠ નાથ નમોઽસ્તુ તે ॥ ૩૩॥

ત્વયા નાનાઽવતારાશ્ચ ધૃતા મદીયવેશ્મનિ ।
તે સર્વે સ્વલ્પકાંશસ્થા બભૂવુર્ગણનાયક ॥ ૩૪॥

તાદૃશં મા કુરુ સ્વામિન્ વસ નિત્યં ચ મે ગૃહે ।
તત્રાઽહં ત્વાં ભજિષ્યામિ પુત્રભાવેન વિઘ્નપ ॥ ૩૫॥

સંસારે પુત્રભાવેન મૂર્તૌ ત્વાં કુલદૈવતમ્ ।
હૃદયે યોગયુક્તોઽહં ભજિષ્યામિ ગજાનન ॥ ૩૬॥

તથેતિ ગણનાથસ્તં જગાદાન્તર્દધે પુનઃ ।
કૈલાસમાગતઃ શમ્ભુઃ શોકયુક્તો વિશેષતઃ ॥ ૩૭॥

તતઃ કિઞ્ચિદ્ગતે કાલે પાર્વતી સ્નાનમાચરત્ ।
નગ્ના તત્ર મહેશાનઃ સહસા સમુપાગતઃ ॥ ૩૮॥

લજ્જિતા તં નિરીક્ષ્યૈવ જગદમ્બા સ્વકેશતઃ ।
દેહં સઞ્છાદયામાસ શઙ્કરો ગૃહગોઽભવત્ ॥ ૩૯॥

તતઃ કદાચિત્સા દેવી સખીભ્યાં સંસ્થિતાઽભવત્ ।
ઉવાચ તાં સખી તત્ર જયા ચ વિજયા પરા ॥ ૪૦॥

જયાવિજયે ઊચતુઃ ।
ગણા નન્દિમુખાઃ સર્વેઽસ્મદીયા નાત્ર સંશયઃ ।

શિવં યદિ નિરુદ્ધ્યૈવ તિષ્ઠામશ્ચેચ્છિવાત્મકાઃ ॥ ૪૧॥

(Page ખં. ૪ અ. ૪૬ પાન ૧૧૫)
અતઃ કં ચ મહાદેવિ સ્વકીયં વશગં ગણમ્ ।
કુરુ ત્વં સા તતઃ શક્તિસ્તથેતિ પ્રત્યુવાચ તે ॥ ૪૨॥

સ્વાઙ્ગાન્ મલં સમાકૃષ્ય કૃત્વા તં પુરુષાકૃતિમ્ ।
પુનઃ સઞ્જીવયામાસ પાર્વતી તં જગાદ હ ॥ ૪૩॥

દ્વારે તિષ્ઠ મહાબાહો મદાજ્ઞાવશગઃ સદા ।
મદાજ્ઞયા વિના પુત્ર મા પ્રવેશ્યસ્ત્વયા નરઃ ॥ ૪૪॥

અહં સ્નાનાર્થમત્રૈવ સંસ્થિતા કાલપર્યયે ।
પતિર્મે તત્ર રે વત્સ ત્વાગતોઽપિ ભવેત્ સ્વયમ્ ॥ ૪૫॥

કેનાપિ કથિતં તત્રાઽતો મા કુરુ ચ તાદૃશમ્ ।
સ્વામિનં શઙ્કરં પુત્ર નિષેધસ્વ મદાજ્ઞયા ॥ ૪૬॥

તથેતિ તાં પ્રણમ્યાઽઽદૌ દ્વારસંસ્થો બભૂવ સઃ ।
પુરુષઃ સા સખીભ્યાં ચ મુદિતા સંસ્થિતાઽભવત્ ॥ ૪૭॥

એતસ્મિન્નન્તરે તત્ર ગણયુક્તઃ શિવો યયૌ ।
તં ન્યષેધત્ સ્વવેગેન બોધિતોઽપિ પ્રજાપતે ॥ ૪૮॥

તતોઽતિકોપસંયુક્તઃ શઙ્કરઃ પ્રબભૂવ હ ।
તજ્જ્ઞાત્વા સા સખીભ્યાં ચ મુદિતા સંસ્થિતાઽભવત્ ॥ ૪૯॥

તતોઽતિક્રોધસંયુક્તો ગણાન્નન્દિમુખાન્ શિવઃ ।
આજ્ઞાપયચ્ચ યુદ્ધાય હન્તવ્યોઽયં ન સંશયઃ ॥ ૫૦॥

તતસ્તે શસ્ત્રસઙ્ઘાતૈર્જઘ્નુસ્તં ક્રોધસંયુતાઃ ।
પાર્વત્યા તેજ ઉગ્રં યન્નિક્ષિપ્તં પુરુષે તદા ॥ ૫૧॥

તેજસા શસ્ત્રસઙ્ઘાતા મોઘા જાતા વિશેષતઃ ।
મુસલેન જઘાનાઽસૌ ગણાન્ સર્વાન્ મહાબલઃ ॥ ૫૨॥

તતઃ પલાયનં ચક્રુર્ગણાઃ સર્વે ભયાન્વિતાઃ ।
તતઃ સ્કન્દં શિવઃ ક્રુદ્ધઃ પ્રેષયામાસ દારુણમ્ ॥ ૫૩॥

કુણ્ઠિતાસ્ત્રો ભયોદ્વિગ્નઃ સેનાનીસ્તાડિતો ભૃશમ્ ।
પપાલ ચ તતઃ શમ્ભુઃ સસ્મારાઽમરમુખ્યકાન્ ॥ ૫૪॥

બ્રહ્મા વિષ્ણુશ્ચ દેવેન્દ્રો યમાદ્યાઃ સર્વ આગતાઃ ।
પ્રણિપત્ય મહેશાનં સંસ્થિતાશ્ચાઽભવન્ પુરઃ ॥ ૫૫॥

તાન્ શિવઃ કથયામાસ વૃત્તાન્તં તે તતો યયુઃ ।
ઇન્દ્રાદયઃ સગન્ધર્વા યુયુધુઃ પુરુષેણ ચ ॥ ૫૬॥

પલાયનં તેઽપિ ચક્રુઃ કુણ્ઠિતાસ્ત્રા ભયાતુરાઃ ।
તાડિતા મુસલેનૈવ શઙ્કરઃ ક્ષોભિતોઽભવત્ ॥ ૫૭॥

તતસ્તત્ર વિચારં તે ચક્રુઃ સર્વે સુરેન્દ્રકાઃ ।
વિષ્ણુમુખ્યાઃ શિવેનૈવ મુનિભિશ્ચ પ્રજાપતે ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શિવવિચારવર્ણનપ્રસઙ્ગો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૫

## ૪.૪૬ શક્તિમલમાહાત્મ્યવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વિચાર્ય દેવપૈઃ સર્વૈઃ પ્રેષયામાસ શઙ્કરઃ ।
બ્રહ્માણં બ્રાહ્મણૈઃ સાર્ધં સ્નેહાર્થં સોઽપિ તં યયૌ ॥ ૧॥

તં દૃષ્ટ્વા ગૃહ્ય પુરુષો મુસલં સોઽપિ દારુણમ્ ।
આયયૌ તં નિરીક્ષ્યૈવ પપાલ સ પિતામહઃ ॥ ૨॥

વયં સર્વે દ્વિજાઃ પુત્ર શસ્ત્રહીનાઃ સમાગતાઃ ।
શ ૃણુ વાક્યં વિચારજ્ઞ પલન્તસ્તે તમબ્રુવન્ ॥ ૩॥

તથાપિ ન બુબોધૈવ પુરુષસ્તં વિલોક્ય સઃ ।
બ્રહ્મા જગામ શમ્ભું તં વૃત્તાન્તમવદત્તતઃ ॥ ૪॥

તતો વિષ્ણુયુતઃ શમ્ભુઃ ક્રોધાનલવિલોચનઃ ।
સઙ્ગ્રામાય યયૌ તત્ર મુસલં સોઽપિ ચાદદે ॥ ૫॥

(Page ખં. ૪ અ. ૪૬ પાન ૧૧૬)
આગત્યૈવ ન્યહઞ્છમ્ભું હૃદયે યમસન્નિભઃ ।
શૂલં પપાત તદ્ધસ્તાચ્છિવશ્ચ વ્યાકુલોઽભવત્ ॥ ૬॥

તતસ્તં ગદયા વિષ્ણુર્યોધયામાસ દારુણમ્ ।
તતસ્ત્રિશૂલઘાતેન શિરશ્ચિચ્છેદ શઙ્કરઃ ॥ ૭॥

મમાર પુરુષસ્તત્ર શ્રુત્વા સા પાર્વતી પુનઃ ।
કોપયુક્તા ચ કોટીઃ સા શક્તીસ્તા નવ નિર્મમે ॥ ૮॥

તયાઽઽજ્ઞપ્તા મહાદેવ્યઃ સંહર્તું સકલં જગત્ ।
પ્રાપ્તા આલોક્ય દેવાસ્તે ભયભીતા બભૂવિરે ॥ ૯॥

શઙ્કરેણ દ્વિજાસ્તત્ર પ્રેષિતા નારદાદયઃ ।
અન્તરિક્ષચરાઃ સર્વે પ્રણેમુઃ પાર્વતીં તતઃ ॥ ૧૦॥

રક્ષ રક્ષ જગત્સર્વં જગદમ્બ ત્વદુદ્ભવમ્ ।
તુષ્ટુવુસ્તામથોવાચ મુનીન્ ક્રોધયુતા સતી ॥ ૧૧॥

પાર્વત્યુવાચ ।
મમ પુત્રઃ કિમર્થં તૈર્હતઃ સર્વૈઃ સુરેશ્વરૈઃ ।
સજીવં સંહરિષ્યામિ કુરુધ્વં ચેન્ન સંશયઃ ॥ ૧૨॥

તથેતિ પ્રતિપાદ્યૈવ ગતાસ્તે શઙ્કરં પુનઃ ।
શક્તયસ્તમ્ભિતાઃ સર્વાઃ શિવઃ સર્વૈઃ સમાયયૌ ॥ ૧૩॥

યુદ્ધે મૃતસ્ય બાલસ્ય મસ્તકં ત્વપ્સરોગણાઃ ।
જગૃહુસ્તત્ર તં દૃષ્ટ્વા શિરોહીનં સુદુઃખિતઃ ॥ ૧૪॥

શિવસ્તતો ગણાન્ પ્રાહ યઃ પૂર્વં દૃશ્યતે ત્વયા ।
તમાનયત હત્વા વૈ તસ્ય મસ્તકમત્ર યત્ ॥ ૧૫॥

તતો ગજાસુરઃ પ્રાપ્તઃ સહસા નારદેરિતઃ ।
હન્તું દેવગણાન્ સર્વાન્ મહાબલપરાક્રમઃ ॥ ૧૬॥

તતશ્ચ ક્ષોભિતાઃ સર્વે પલાયન્ત દિશો દશ ।
શૂલઘાતેન શમ્ભુસ્તં મારયામાસ તત્ક્ષણાત્ ॥ ૧૭॥

તસ્ય મસ્તકયોગેન પુરુષં તે દિવૌકસઃ ।
યોજયિત્વા પ્રજાનાથ સજીવં ચક્રિરે નરમ્ ॥ ૧૮॥

સર્વે હતોદ્યમા જાતાસ્તતો બ્રહ્મા સમાગતઃ ।
જીવયામાસ તં તત્ર સજીવો ન બભૂવ હ ॥ ૧૯॥

તતો વિષ્ણુઃ સ્વયં તત્ર જીવયામાસ વિદ્યયા ।

સજીવો ન બભૂવાઽપિ દુઃખિતોઽતિતતોઽભવત્ ॥ ૨૦॥

તતઃ શિવઃ સ્વયં તત્ર જીવયુક્તં ચકાર તમ્ ।
સજીવં ન દદર્શૈવ દુઃખિતોઽતિતરાં તદા ॥ ૨૧॥

તતો વિઘ્નેશ્વરં સર્વે તુષ્ટુવુઃ કાર્યસિદ્ધયે ।
અથર્વશિરસા દક્ષ શઙ્કરાદ્યાઃ સુરેશ્વરાઃ ॥ ૨૨॥

પ્રાર્થયામાસુરત્યન્તં નિર્વિઘ્નં કુરુ વિઘ્નપ ।
અધુના વિશ્વમેવેદમકાલે લયમેષ્યતિ ॥ ૨૩॥

ગણેશસ્મરણેન સ્મ બુદ્ધિઃપ્રાપ્તા દિવૌકસામ્ ।
વેદમન્ત્રેણ દેવાસ્તે તારમાવાહયન્તિ ચ ॥ ૨૪॥

ઓઙ્કારસ્તત્ર મન્ત્રેણાઽઽકર્ષિતઃ સહસાઽઽગતઃ ।
શવં પ્રવિશ્ય સન્તસ્થૌ તતઃ સોઽભવદુત્થિતઃ ॥ ૨૫॥

તતો જ્ઞાનયુતા દેવા જાતા વિઘ્નવિહીનકાઃ ।
તં દૃષ્ટ્વા ગજવક્ત્રં વૈ પ્રણવં પ્રણવાકૃતિમ્ ॥ ૨૬॥

તુષ્ટુવુર્દેવદેવેશં નાનાસ્તોત્રૈઃ પ્રજાપતે ।
પુપૂજુસ્તં ચ સાર્વાદૌ પૂજ્યં ચક્રુઃ સ્વમૂલકમ્ ॥ ૨૭॥

દક્ષ ઉવાચ ।
સાક્ષાદોઙ્કારરૂપશ્ચ ગણેશોઽયં ન સંશયઃ ।
સ કથં મલજઃ શક્તેર્દૈત્યમસ્તકધારકઃ ॥ ૨૮॥

એનં મે સંશયં બ્રહ્મઞ્છેત્તુમર્હસિ સામ્પ્રતમ્ ।
શ્રુત્વા કથાં મહારમ્યાં જ્ઞાનયુક્તો ભવામ્યહમ્ ॥ ૨૯॥

મુદ્ગલ ઉવાચ ।
સતી દક્ષગૃહે તાત દગ્ધા સા શૈલજાઽભવત્ ।
હિમાચલે સ્વયં શમ્ભુસ્તતાપ તપ ઉત્તમમ્ ॥ ૩૦॥

તત્ર સા પાર્વતી દેવી શુશ્રૂષાયાં પ્રજાપતે ।
(Page ખં. ૪ અ. ૪૭ પાન ૧૧૭)
નિરતા તાં નિરીક્ષ્યૈવ શમ્ભુઃ સસ્માર પૂર્વગામ્ ॥ ૩૧॥

મમાજ્ઞાવશગા દેવી નેયં દક્ષગૃહે ગતા ।
અતોઽહં ન વૃણોમ્યેતાં પુનઃ શૈલસુતાં કદા ॥ ૩૨॥

તારકાસુરભીતૈર્દેવૈઃ કામઃ પ્રાર્થિતસ્તતઃ ।
સ યયૌ શઙ્કરસ્થાનં મોહિતું મદસંયુતઃ ॥ ૩૩ ॥

તં પ્રજ્વાલ્ય મહેશાનસ્ત્યક્ત્વા હિમગિરિં યયૌ ।
અન્યત્ર સા તતો દેવી ખેદયુક્તા બભૂવ હ ॥ ૩૪ ॥

મનસિ જ્ઞાનમાર્ગેણ જ્ઞાત્વા શમ્ભુવિચેષ્ટિતમ્ ।
તપસા સંયુતા ભૂત્વા વનગા શિવમાર્ચયત્ ॥ ૩૫ ॥

ગતે વર્ષશતે શમ્ભુઃ પ્રસન્નો ન બભૂવ હ ।
તતઃ સા વિઘ્નરાજં ચ સસ્માર ધ્યાનસંયુતા ॥ ૩૬ ॥

વર્ષેણૈકેન હેરમ્બઃ પ્રસન્નશ્ચ બભૂવ હ ।
શિવબુદ્ધિપ્રભેદં સ ચકાર બુદ્ધિધારકઃ ॥ ૩૭ ॥

તતો દયાયુતઃ શમ્ભુસ્તાં યયૌ દ્વિજરૂપધૃક્ ।
શઙ્કરં નિન્દયામાસ નાનાવાક્યૈઃ સમીપગઃ ॥ ૩૮ ॥

તચ્છ્રુત્વા કમ્પિતા દેવી બોધયામાસ શામ્ભવૈઃ ।
ચેષ્ટિતૈસ્તં તતઃ સોઽપિ પુનર્નિન્દાં ચકાર હ ॥ ૩૯ ॥

સ્થાનં ત્યક્ત્વા તતો દેવી તં જગામ દ્વિજં પુનઃ ।
તિરસ્કૃત્ય શિવસ્તાં સ્વં દર્શયામાસ રૂપકમ્ ॥ ૪૦ ॥

તતઃ સા તં પ્રણમ્યૈવ તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ।
ગણેશં મનસા ધ્યાત્વા પ્રાર્થ્ય તં સિદ્ધિદો ભવ ॥ ૪૧ ॥

તતઃ પ્રસન્નભાવેન શઙ્કરઃ પ્રદદૌ વરમ્ ।
વિસ્મિતસ્તાં નિરીક્ષ્યૈવ તપસા કર્શિતાં પ્રભુઃ ॥ ૪૨ ॥

શિવ ઉવાચ ।
વૃણોમિ ત્વાં મહાદેવિ વશ્યોઽહં તે સદાઽનઘે ।
તપસા ભક્તિભાવેન ન વિયોગો ભવિષ્યતિ ॥ ૪૩ ॥

ધૂલિધૂસરિતં તેઽગં શિરોભૂય્ય જટાન્વિતમ્ ।
અતો મલસ્તવાઙ્ગસ્ય સર્વપૂજ્યો ભવિષ્યતિ ॥ ૪૪ ॥

ઇત્યુક્ત્વા શઙ્કરસ્તત્રાન્તર્ધાનં પ્રચકાર સઃ ।
પાર્વતી પ્રેમસંયુક્તા સ્વગૃહં વૈ જગામ હ ॥ ૪૫ ॥

સ્વભક્તસ્ય શિવસ્યૈવ રક્ષણાર્થં વચો મહત્ ।

ગૌરીમલાઙ્ગસમ્ભૂતો બભૂવ હ ગજાનનઃ ॥ ૪૬॥

ગણેશાન્ન પરઃ કોઽપિ સર્વપૂજ્યો મહામતે ।
ગણેશવરદાનેન સત્યવાક્યાઃ શિવાદયઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે શક્તિમલમાહાત્મ્યવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૬

## ૪.૪૭ ગણેશભક્તાધીનત્વવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ

શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અન્યચ્છૃણુ ચરિત્રં તુ ગજમસ્તકધારણે ।
મહેશ ઇતિ વિખ્યાતો રાજા ધર્મયુતોઽભવત્ ॥ ૧॥

તસ્ય ગેહે ગુરુઃ સાક્ષાજ્જગામ કીર્તિમોહિતઃ ।
રાજ્ઞા સમ્માનિતઃ સોઽપિ નૃપાય ચ દદૌ વરમ્ ॥ ૨॥

બૃહસ્પતિરુવાચ ।
પ્રણતસ્તે મહીપાલ મૂર્ધા મે પ્રભવિષ્યતિ ।
સર્વપૂજ્યો વિશેષેણ ગતોઽભૂત્ સ્વગૃહે ગુરુઃ ॥ ૩॥

તતઃ કદાચિદ્રાજર્ષિર્નારદં માર્ગસંસ્થિતમ્ ।
અવમત્ય યયૌ સોઽપિ તં શશાપ નૃપાધમમ્ ॥ ૪॥

નારદ ઉવાચ ।
મદેન રાજશાર્દૂલ મામનાદૃત્ય ગચ્છસિ ।
(Page ખં. ૪ અ. ૪૭ પાન ૧૧૮)
અતોઽસુરસ્ય યોનૌ ત્વં પતિષ્યસિ ન સંશયઃ ॥ ૫॥

કાલે સોઽપિ મમારાઽથ ગજયોનૌ બભૂવ હ ।
ગજાસુર ઇતિ ખ્યાતો નરકુઞ્જરવેષભૃત્ ॥ ૬॥

ગજાસુરેણ શમ્ભોસ્તપઃ કૃતં ચ વિશેષતઃ ।
મન્ત્રં જજાપ શૈવેનાતોષયન્નિયમે રતઃ ॥ ૭॥

સહસ્રેષુ ગતેષ્વેવ વર્ષેષુ વરદઃ શિવઃ ।
જગાદ વૃણુ દૈત્યેશ યત્તે મનસિ વર્તતે ॥ ૮॥

સ વવ્રે રાજ્યમુગ્રં મે દેહિ લોકત્રયસ્ય ચ ।
બલં સર્વાતિગં શમ્ભો આરોગ્યં સર્વપૂજ્યતામ્ ॥ ૯॥

અન્તે મોક્ષં ચ મે દેહિ તથેતિ શઙ્કરોઽબ્રવીત્ ।
મસ્તકઃ સર્વપૂજ્યસ્તે ભવિષ્યતિ ગજાસુર ॥ ૧૦॥

અતો ગજાસુરસ્યૈવ મસ્તકં ગણપેન તત્ ।
ધૃતં વચો રક્ષણાર્થં શઙ્કરસ્ય બૃહસ્પતેઃ ॥ ૧૧॥

અન્યચ્છૃણુ પ્રજાનાથ ઇતિહાસં પુરાતનમ્ ।
કદાચિચ્છઙ્કરેણૈવ પૂજિતો ગણનાયકઃ ॥ ૧૨॥

દદૌ શિવાય નિર્માલ્યં મૂર્તિસંસ્થશ્ચ વિઘ્નપઃ ।
સ્વપ્ને તસ્ય સ માહાત્મ્યં કથયામાસ વિસ્તરાત્ ॥ ૧૩॥

શ્રીગણેશ ઉવાચ ।
એકનિષ્ઠતયા શમ્ભો ભક્ત્યાઽહં પૂજિતસ્ત્વયા ।
પ્રસન્નોઽહં સ્વમૂર્તિસ્થઃ શ્ૃણુ મે વચનં હિતમ્ ॥ ૧૪॥

નિર્માલ્યં મે ગૃહાણ ત્વં સર્વસિદ્ધિપ્રદં શિવ ।
યેનેદં મસ્તકે પુષ્પં ધૃતં માન્યેન ભક્તિતઃ ॥ ૧૫॥

સર્વપૂજ્યઃ સ વૈ ભાવી સર્વાતિગયશોધરઃ ।
તતઃ સોંઽતર્દધે ઢુણ્ઢિઃ શિવો જાગરિતોઽભવત્ ॥ ૧૬॥

હસ્તે પુષ્પં સમાલોક્ય વિસ્મિતઃ શઙ્કરોઽભવત્ ।
વિચારં સ ચકારૈવ કિમિદં દેવભાષિતમ્ ॥ ૧૭॥

સર્વપૂજ્યો ગણાધીશો નાન્યો બ્રહ્માણ્ડમણ્ડલે ।
અતો મે ભક્તિમાહાત્મ્યં પરીક્ષાર્થં દદૌ પ્રભુઃ ॥ ૧૮॥

તતઃ શિવેન નિર્માલ્યં ન ધૃતં મસ્તકે સ્વકે ।
પૂજાયાં સ્થાપિતં દક્ષ મહાભક્તેન સર્વદમ્ ॥ ૧૯॥

તતોઽત્રિસમ્ભવસ્તત્ર દુર્વાસાઃ સહસાઽઽયયૌ ।
દર્શનાર્થં મહેશસ્ય શિવેન ભૃશમાનિતઃ ॥ ૨૦॥

શિવો વિચારમકરોદયં યોગી સયોગવિત્ ।
વર્ણાશ્રમવિહીનશ્ચ મતઃ સાક્ષાદ્વિનાયકઃ ॥ ૨૧॥

અતો નિર્માલ્યયોગ્યોયં દદૌ તસ્મૈ સદાશિવઃ ।

નિર્માલ્યં વિઘ્નરાજસ્ય કથયિત્વા યશો મહત્ ॥ ૨૨॥

તં પ્રણમ્ય મહાયોગી દુર્વાસાઃ પ્રયયો પ્રભુમ્ ।
યથેચ્છં વિચરન્ માર્ગે દદર્શ દેવનાયકમ્ ॥ ૨૩॥

વિચારં મનસા યોગી ચકાર સ્વહિતાવહમ્ ।
સર્વપૂજ્યો ગણેશાદ્રૈ નાન્યો ભવતિ નિશ્ચિતમ્ ॥ ૨૪॥

વયં ભક્તા ગણેશસ્ય ભજામોઽનન્યચેતસઃ ।
અતો નિર્માલ્યયોગ્યોઽહં નૈવ શઙ્કરવત્ કદા ॥ ૨૫॥

અયં દેવપતિઃ સાક્ષાદિન્દ્રઃ સત્ત્વગુણાન્વિતઃ ।
યોગ્યોઽયં નૈવ સન્દેહસ્તં યયૌ મુનિસત્તમઃ ॥ ૨૬॥

તં દૃષ્ટ્વા મઘવા નત્વા સ્થિત ઐરાવતે પ્રભુઃ ।
આજ્ઞાં કુરુ મહાભાગ મુને દાસોઽસ્મિ તે જગૌ ॥ ૨૭॥

તતઃ સોઽપિ પ્રસન્નાત્મા દદૌ તસ્મૈ મહામુનિઃ ।
નિર્માલ્યં ગણનાથસ્ય માહાત્મ્યં પ્રોચ્ય સાદરઃ ॥ ૨૮॥

ઇન્દ્રો રાજ્યશ્રિયા યુક્તો ગૃહીત્વા ગજમસ્તકે ।
નિર્માલ્યમિન્દ્રઃ સંસ્થાપ્ય યયૌ માર્ગમવસ્થિતઃ ॥ ૨૯॥

નિર્માલ્યસ્યાપમાનેન ભ્રષ્ટોઽભૂદ્દેવનાયકઃ ।
ગતા સત્ત્વમયી લક્ષ્મીર્ગજસ્તેજોયુતોઽભવત્ ॥ ૩૦॥

(Page ખં. ૪ અ. ૪૭ પાન ૧૧૯)
તિરસ્કૃત્ય મહેન્દ્રં તં ગજો હત્વા સુરાન્ પરાન્ ।
યયૌ વને પ્રજાનાથ સ્વચ્છન્દશ્ચ બભૂવ સઃ ॥ ૩૧॥

તતોઽતિતાપસંયુક્ત ઇન્દ્રો હીનઃ શ્રિયાઽભવત્ ।
દૈત્યરાજા બુભુજિરે સઙ્ગૃહ્ય સ્વર્ગમાગતાઃ ॥ ૩૨॥

તતો બહૌ ગતે કાલે ગુરુણા બોધિતઃ સુરઃ ।
દેવૈઃ સહ ગણેશાનં તોષયામાસ નિત્યદા ॥ ૩૩॥

ગતે વર્ષસહસ્રે તુ ગણેશસ્તં યયૌ તદા ।
પૂજિતઃ સંસ્તુતસ્તેન પ્રસન્નો વરદોઽભવત્ ॥ ૩૪॥

શ્રીગણેશ ઉવાચ ।
મા કુરુષ્વ મહેન્દ્ર ત્વં મમ નિર્માલ્યદૂષણમ્ ।

ભક્ત્યધીનઃ સ્વભાવેન પ્રસન્નોઽહં કૃતસ્ત્વયા ॥ ૩૫॥

સમુદ્રતનયા લક્ષ્મીર્ભવિષ્યતિ સુસિદ્ધિદા ।
તાં પ્રાપ્ય પૂર્વવદ્દેવાઃ શ્રિયા યુક્તા ભવિષ્યથ ॥ ૩૬॥

પૂજાકૃતફલં યચ્ચ નિર્માલ્યે સંસ્થિતં ભવેત્ ।
તસ્ય વન્દનમાત્રેણ સફલો જાયતે નરઃ ॥ ૩૭॥

ભાવેનાઽઽગૃહ્ય નિર્માલ્યં મસ્તકે ધારિતં યદિ ।
પુનસ્તચ્છુદ્ધભૂમૌ વૈ સ્થાપયેદ્વા જલે સુર ॥ ૩૮॥

ગર્તે યત્ર મનુષ્યસ્ય પાદસ્પર્શો ન વૈ ભવેત્ ।
તદા ફલયુતઃ સોઽપિ મદ્રૂપો જાયતે નરઃ ॥ ૩૯॥

સદા દુઃખયુતં ત્વાઽહં પુરા કર્તું સમુદ્યતઃ ।
ગુરુણા બોધિતં મત્વાઽપરાધં તે સહામ્યહમ્ ॥ ૪૦॥

મામેવ શરણં દેવમાગતં સંવિચિન્ત્ય વૈ ।
બહુકાલેન દેવેશ ક્રોધહીનોઽહમાગતઃ ॥ ૪૧॥

એવમુક્ત્વા ગણાધીશો ગતઃ સ્વાનન્દકે પુરે ।
ઇન્દ્રો રાજ્યશ્રિયા યુક્તો બભૂવે સ પ્રજાપતે ॥ ૪૨॥

સદા નિર્માલ્યભાવજ્ઞો ગણેશભજને રતઃ ।
નિર્વિઘ્નેન મહેન્દ્રશ્ચાઽઽમરણં રાજ્યમાકરોત્ ॥ ૪૩॥

અધુના શૃણુ વૃત્તાન્તમૈરાવતગજસ્ય ચ ।
ઇન્દ્રં ત્યક્ત્વા વને ગત્વા ચચાર સ્વેચ્છયેરિતઃ ॥ ૪૪॥

હસ્તિનીભિઃ સદા મોહયુક્તઃ પરમદુર્જયઃ ।
બુભુજે વિવિધાન્ ભોગાન્ મદેનૈવ સમન્વિતઃ ॥ ૪૫॥

તતઃ સ્વલ્પેન કાલેન ગણેશો જઠરે ગતઃ ।
પાર્વત્યા વરદાનેન તસ્ય દૈત્યઃ શિરોઽહરત્ ॥ ૪૬॥

મસ્તકેન વિહીનશ્ચ બભૂવ ગણનાયકઃ ।
તાદૃશોઽવાતરત્તત્ર વિષ્ણુઃ શોકપરોઽભવત્ ॥ ૪૭॥

જનાર્દનશ્ચેષ્ટિતં જ્ઞાત્વા ધ્યાનેન યયૌ વને ।
ઐરાવતશિરશ્છિત્વા યોજયામાસ તત્ક્ષણાત્ ॥ ૪૮॥

તત્રોઙ્કારં સમાવાહ્ય મન્ત્રેણ જીવસંયુતમ્ ।
ચકાર વિઘ્નરાજં સ દેવાસ્તે હર્ષિતા બભુઃ ॥ ૪૯॥

દૈત્યેન તચ્છિરસ્ત્યક્તં નર્મદાયાં પ્રજાપતે ।
તત્ર કુણ્ડં સમુત્પન્નં ગણેશમહિમાન્વિતમ્ ॥ ૫૦॥

તત્ર યા દૃષદો રક્તા નર્મદાયાં સમાસ્થિતાઃ ।
યત્ર તત્ર ગણેશાસ્તે બભૂવુઃ સર્વસિદ્ધિદાઃ ॥ ૫૧॥

દક્ષ ઉવાચ ।
કથં રેવાજલે સંસ્થા દૃષદો મુનિસત્તમ ।
ગણેશાસ્તન્મમાઽઽચક્ષ્વ ધન્યા સા સરિતાં વરા ॥ ૫૨॥

મુદ્ગલ ઉવાચ ।
બ્રહ્મકમણ્ડલૂત્પન્નાશ્ચતસ્રો નદ્ય એવ ચ ।
ગઙ્ગા ચ યમુના દક્ષ નર્મદા તુ સરસ્વતી ॥ ૫૩॥

ગઙ્ગાયા મહિમાનં તં સર્વત્રાતુલમુત્તમમ્ ।
જ્ઞાત્વા સા નર્મદા દેવી સન્તપ્તા ચેતસાઽભવત્ ॥ ૫૪॥

તતસ્તયા તપસ્તપ્તં શઙ્કરસ્ય મહાત્મનઃ ।
શતવર્ષે ગતે શમ્ભુઃ પ્રસન્નો વરદોઽભવત્ ॥ ૫૫॥

તયા સમ્પૂજિતઃ શમ્ભુઃ સ્તુતો જ્ઞાત્વા મનેપ્સિતમ્ ।
(Page ખં. ૪ અ. ૪૮ પાન ૧૨૦)
તસ્યા જલે શિવાઃ સર્વે દૃષદશ્ચ કૃતાસ્તદા ॥ ૫૬॥

તતો ગઙ્ગાસમં તેજો બભૂવ સરિતઃ પ્રભોઃ ।
નર્મદાયાસ્તથા સાપિ ન સન્તોષયુતાઽભવત્ ॥ ૫૭॥

પુનસ્તતાપ તીવ્રં સા તપો વિઘ્નેશ્વરે રતા ।
ગતેષુ વૈ સહસ્રેષુ વર્ષેષુ વરદોઽભવત્ ॥ ૫૮॥

સ્તુતઃ સમ્પૂજિતઃ સોઽપિ હૃદીપ્સિતવરં દદૌ ।
રક્તવર્ણા ગણેશાના દૃષદો જલગાઃ કૃતાઃ ॥ ૫૯॥

તતઃ સાઽતીવ માહાત્મ્યયુતા જાતા સરિદ્વરા ।
દર્શનેન જનાનાં વૈ ગઙ્ગાસ્નાનફલપ્રદા ॥ ૬૦॥

યસ્યાસ્તીરે જલે સંસ્થા દૃષદઃ શઙ્કરાત્મિકાઃ ।

રક્તા ગણેશરૂપાસ્તત્ સામ્યગા કા ભવેન્નદી ॥ ૬૧॥

મહિમાનં વર્ણયિતું રેવાયાઃ કઃ ક્ષમો ભવેત્ ।
ગણેશશિવસંયુક્તા યત્ર તત્ર મહાનદી ॥ ૬૨॥

એતત્તે કથિતં સર્વં વિસ્તરાદ્ગણપસ્ય વૈ ।
ચેષ્ટિતં સર્વપાપઘ્નં સર્વસંશયનાશનમ્ ॥ ૬૩॥

આદૌ દક્ષ ગણેશસ્ય દૈત્યમસ્તકધારણમ્ ।
ઐરાવતસ્ય તદ્વદ્વૈ ભક્તમાહાત્મ્યરક્ષણાત્ ॥ ૬૪॥

શિરશ્છેદાદિકં તસ્ય ચરિત્રં તદ્ બૃહસ્પતેઃ ।
નિર્માલ્યસ્ય ચ રક્ષાર્થં માહાત્મ્યં ગણપાશ્રિતમ્ ॥ ૬૫॥

ભક્તવચઃ સમાબદ્ધો ગણેશઃ કિં પ્રજાપતે ।
ન કરોતિ મહાભાગ ભક્તાધીનસ્તતઃ સ્મૃતઃ ॥ ૬૬॥

યેન સ્વશિરસશ્છેદઃ કૃતો ભક્તસ્ય કારણાત્ ।
મલજો ગજવક્ત્રશ્ચ બભૂવે ભક્તિમોહિતઃ ॥ ૬૭॥

એતત્તે કથિતં સર્વં ચેષ્ટિતં પરમાદ્ભુતમ્ ।
પ્રકૃતં શૃણુ દક્ષ ત્વં ગજાનનચરિત્રકમ્ ॥ ૬૮॥

પાર્વતી પ્રેમસંયુક્તા પૂજયામાસ તં સુતમ્ ।
દેવા હર્ષયુતાઃ સર્વે જગ્મુઃ સ્વં સ્વં નિવેશનમ્ ॥ ૬૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ગણેશભક્તાધીનત્વવર્ણનં નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૭

## ૪.૪૮ સિન્દૂરવધો નામાષ્ટચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એકદા નારદો યોગી સિન્દૂરાસુરમાગમત્ ।
પૂજિતસ્તેન તં વિપ્રો હર્ષયુક્તો જગાદ હ ॥ ૧॥

નારદ ઉવાચ ।
કૈલાસે શઙ્કરસ્યૈવ બભૂવે પુત્ર ઉત્તમઃ ।
ગણેશસ્તપસા તુષ્ટઃ સિદ્ધિબુદ્ધિપતિઃ સ્વયમ્ ॥ ૨॥

દેવૈઃ સમ્પ્રાર્થિતઃ સોઽપિ ત્વાં હનિષ્યતિ નિશ્ચિતમ્ ।
અતો યત્નપરો દૈત્ય ભવ ગચ્છામિ માનદ ॥ ૩॥

એવમુક્ત્વા મહાયોગી નારદઃ સ્વેચ્છયા ચરન્ ।
ગતઃ સોઽપિ ભયોદ્વિગ્નો બભૂવાસુરનાયકઃ ॥ ૪॥

એતસ્મિન્નન્તરે તત્ર પ્રધાનં સહસાઽઽગતમ્ ।
વિચાર્ય તેન દૈત્યેન્દ્રો યયૌ હન્તું સુરાન્ પુરા ॥ ૫॥

સમાગતં વિલોક્યૈવ પલાયન્તેન્દ્રમુખ્યકાઃ ।
બ્રહ્માણં શરણં સર્વે ભયભીતા દિવૌકસઃ ॥ ૬॥

સિન્દૂરઃ કોપસંયુક્ત આયયૌ તત્ર માનદ ।
બ્રહ્મા હંસં સમારુહ્ય દેવૈઃ પપાલ તત્ક્ષણાત્ ॥ ૭॥

વિકુણ્ઠે સ ગતો વિષ્ણું દૈત્યસ્તત્ર સમાગતઃ ।
(Page ખં. ૪ અ. ૪૮ પાન ૧૨૧)
તતો વિષ્ણુઃ શિવં દેવૈર્યયૌ સત્વર એવ ચ ॥ ૮॥

તત્રાઽપિ સ યયૌ દૈત્યઃ શમ્ભુર્દેવૈર્ગણેશ્વરમ્ ।
તુષ્ટાવ દૈત્યનાશાર્થં તતઃ સ વરદોઽભવત્ ॥ ૯॥

સિન્દૂરમાયયૌ તત્ર પ્રભુઃ પરશુધારકઃ ।
ગજાનનો મૂષકારૂઢકો ભૂત્વા પ્રતાપવાન્ ॥ ૧૦॥

તં દૃષ્ટ્વા યોદ્ધુમાયાન્તં સિન્દૂરઃ ક્રોધસંયુતઃ ।
જગાદ સ્વમદેનૈવ યુક્તઃ પરમદુર્જયઃ ॥ ૧૧॥

સિન્દૂર ઉવાચ ।
કિમર્થં રણભૂમૌ ત્વમાગતોઽસિ ગજાનન ।
બાલભાવેન માં મૂર્ખ ન જાનાસિ સુરેરિતઃ ॥ ૧૨॥

મચ્છ્વાસેન ચલન્તિ સ્મ મેરુમન્દરકાદયઃ ।
તલપ્રહારવેગેન બ્રહ્માણ્ડં શતધા ભવેત્ ॥ ૧૩॥

શિવાદયઃ સુરેશાશ્ચ ભયભીતાઃ સમાગતાઃ ।
તાન્ દૃષ્ટ્વાઽપિ ગણાધીશ યોદ્ધું કથમુપાગતઃ ॥ ૧૪॥

બાલભાવેન સંયાતં ન ત્વાં હન્મિ ગજાનન ।
ત્વત્પ્રેરકાન્ સુરાંશ્ચાહં હનિષ્યામિ ન સંશયઃ ॥ ૧૫॥

ક્રોધેનાહં ચ યં કઞ્ચિદાલિઙ્ગામિ ગજાનન ।
સ ભસ્મસાદ્ભવેન્નૂનં કિં કરિષ્યસિ માં વદ ॥ ૧૬॥

એવં શ્રુત્વા ગણાધીશો દૈત્યેશસ્ય વચો મહત્ ।
સ ઉવાચ પ્રહસ્યાઽથ સિન્દૂરં લોકપીડકમ્ ॥ ૧૭॥

શ્રીગજાનન ઉવાચ ।
દૈત્યાધમ મહાબાહો માં ન વેત્સિ પ્રભાવિણમ્ ।
સ્વાનન્દવાસિનં પૂર્ણં બ્રહ્મભૂતં વિશેષતઃ ॥ ૧૮॥

એવમુક્ત્વા વિરાડ્રૂપં દધાર સ ગજાનનઃ ।
હસ્તાભ્યાં મર્દયિત્વા તં મસ્તકે વિભુરાલિપત્ ॥ ૧૯॥

બ્રહ્મણો રક્ષણાર્થં સ વચઃ સિન્દૂરધારકઃ ।
ગજાનનો બભૂવાપિ ભક્તેશો ભક્તિભાવિતઃ ॥ ૨૦॥

સિન્દૂરં મર્દિતં દૃષ્ટ્વા દેવા હર્ષસમન્વિતાઃ ।
તુષ્ટુવુસ્તં પ્રપૂજ્યૈવ ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨૧॥

દેવા ઊચુઃ ।
ગજાનનાય પૂર્ણાય સાઙ્ખ્યરૂપમયાય તે ।
વિદેહેન ચ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૨૨॥

અમેયાય ચ હેરમ્બાય તે પરશુધારક ।
મૂષકવાહનાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૨૩॥

અનન્તવિભવાયૈવ પરેષાં પરરૂપિણે ।
ગુહાગ્રજાય દેવાય શિવપુત્રાય તે નમઃ ॥ ૨૪॥

પાર્વતીનન્દનાયૈવ દેવાનાં પાલકાય તે ।
સર્વેષાં પૂજ્યદેહાય ગણેશાય નમો નમઃ ॥ ૨૫॥

સ્વાનન્દવાસિને તુભ્યં શિવસ્ય કુલદૈવત ।
વિષ્ણ્વાદીનાં વિશેષેણ કુલદેવાય તે નમઃ ॥ ૨૬॥

યોગાકારાય સર્વેષાં યોગશાન્તિપ્રદાય ચ ।
બ્રહ્મેશાય નમસ્તુભ્યં બ્રહ્મભૂયપ્રદાય તે ॥ ૨૭॥

સિદ્ધિબુદ્ધિપતે નાથ સિદ્ધિબુદ્ધિપ્રદાયિને ।
માયિને માયિકેભ્યશ્ચ મોહદાય નમો નમઃ ॥ ૨૮॥

લમ્બોદરાય વૈ તુભ્યં સર્વોદરગતાય ચ ।
અમાયિને ચ માયાયા આધારાય નમો નમઃ ॥ ૨૯॥

ગજઃ સર્વસ્ય બીજં યત્તેન ચિહ્નેન વિઘ્નપ ।
યોગિનસ્ત્વાં પ્રજાનન્તિ તદાકારા ભવન્તિ તે ॥ ૩૦॥

તેન ત્વં ગજવક્ત્રશ્ચ કિં સ્તુમસ્ત્વાં ગજાનન ।
વેદાદયો વિકુણ્ઠાશ્ચ શઙ્કરાદ્યાશ્ચ દેવપાઃ ॥ ૩૧॥

શુકાદયશ્ચ શેષાદ્યાઃ સ્તોતું શક્તા ભવન્તિ ન ।
તથાપિ સંસ્તુતોઽસિ ત્વં સ્ફૂર્ત્યા ત્વદ્દર્શનાત્મના ॥ ૩૨॥

ગજાનનં પ્રણેમુસ્તમેવમુક્ત્વા શિવાદયઃ ।
સ તાનુવાચ પ્રીતાત્મા ભક્તિભાવેન તોષિતઃ ॥ ૩૩॥

(Page ખં. ૪ અ. ૪૯ પાન ૧૨૨)
શ્રીગજાનન ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મદીયં સર્વદં ભવેત્ ।
પઠતે શૃણ્વતે દેવા બ્રહ્મભૂયપ્રદાયકમ્ ॥ ૩૪॥

વરં વૃણુત દેવેશાસ્તુષ્ટિં સ્તોત્રેણ ચાગતઃ ।
દાસ્યામિ સકલાભીષ્ટં ભવતાં યચ્ચિકીર્ષિતમ્ ॥ ૩૫॥

શિવાદય ઊચુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા તિષ્ઠ ગૃહે શમ્ભોઃ સર્વદા વિઘ્નનાશનઃ ॥ ૩૬॥

ત્વાં દૃષ્ટ્વા વિઘ્નહીનાશ્ચ ભવિષ્યામો નિરન્તરમ્ ।
પ્રત્યક્ષં યોગરૂપં ચ પશ્યામસ્તેન સાર્થકાઃ ॥ ૩૭॥

મુદ્ગલ ઉવાચ ।
ગજાનનસ્તાનુવાચાઽથ તથેતિ સુરેશ્વરાન્ ।
સ્વલોકં કલ્પયામાસ તત્રૈવ શિવપાર્શ્વગમ્ ॥ ૩૮॥

દશયોજનસાહસ્રવિસ્તારસ્તસ્ય માનદ ।
ગણાઃ કુમુદમુખ્યાશ્ચ કલ્પિતા મોદકાદયઃ ॥ ૩૯॥

તિષ્ઠતિ સ્વર્ગલોકેષુ તદાદિ ગણનાયકઃ ।
ગણેશલોક એવાઽસૌ બભૂવે ભુક્તિમુક્તિદઃ ॥ ૪૦॥

સકામાસ્તં સમાગમ્ય પતન્તિ પૃથિવીતલે ।
નિષ્કામાસ્તસ્ય દેહે તે અન્તે લીના ભવન્તિ હિ ॥ ૪૧॥

એતત્તે કથિતં સારં ગજાનનચરિત્રકમ્ ।
શિવપુત્રત્વભાવેન બ્રહ્મેશોઽયં બભૂવ હ ॥ ૪૨॥

યઃ શ‍ૃણોતિ નરો ભક્ત્યા પઠેદ્વા તસ્ય સિદ્ધિદમ્ ।
ભવિષ્યતિ પ્રજાનાથ તથા નાનાસુખપ્રદમ્ ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે સિન્દૂરવધો નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૪.૪૮

## ૪.૪૯ ગણેશનિર્માલ્યમાહાત્મ્યવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
નિર્માલ્યસ્ય ચ માહાત્મ્યં શ્રુતં યત્ પરમાદ્ભુતમ્ ।
વિસ્તરેણ પુનઃ સ્વામિન્ વદ તસ્ય ચરિત્રકમ્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
પરાશરગૃહે દેવો બભૂવ હ ગજાનનઃ ।
પુત્રભાવેન તસ્યાપિ ચરિતં કથિતં પુરા ॥ ૨॥

પરાશરેણૈવ તત્ર સ્થાપિતા મૂર્તિરાદરાત્ ।
ગજાનનસ્ય ભો દક્ષ સર્વદાઽભૂત્ સુસેવિતા ॥ ૩॥

નિત્યં તત્રૈવ દેવેશા બ્રહ્મવિષ્ણુશિવાદયઃ ।
રાત્રૌ ગજાનનં તે સમ્પૂજયન્તિ સુસિદ્ધિદમ્ ॥ ૪॥

ગજાસુરવધાદ્દક્ષ પ્રારભ્ય ભક્તિસંયુતાઃ ।
સ્વર્ગપુષ્પોપહારાદ્યૈઃ સુપ્રસન્નાનનામ્બુજાઃ ॥ ૫॥

કદાચિત્ તત્ર રાજર્ષિર્મૃગયાસક્ત આયયૌ ।
સૈન્યેન સ્વપ્રધાનૈશ્ચ સંવૃતો વીરભદ્રકઃ ॥ ૬॥

સ આગત્ય ગણેશાનં પૂજયન્ ભક્તિસંયુતઃ ।
તત્રૈવ નિશિ સંસ્થોઽભૂદ્ગાણપત્યો મહાયશાઃ ॥ ૭॥

ઉષઃકાલે સમાગત્ય સ પુપૂજ ગજાનનમ્ ।

પુષ્પાણિ દૃષ્ટવાન્ સોઽભૂત્ તત્ર સ્વર્ગોદ્ભવાનિ ચ ॥ ૮॥

સુવાસબહુલાન્યેવ મન્દારાદ્યાનિ ભૂમિપઃ ।
વિસ્મિતો માનસે ભૂત્વાઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૯॥

દેવાલયં પિધાયાઽસૌ ભૂપઃસંસ્થાપ્ય રક્ષકાન્ ।
સૈન્યયુક્તો જજાગાર દેવદર્શનલાલસઃ ॥ ૧૦॥

(Page ખં. ૪ અ. ૪૯ પાન ૧૨૩)
તતો દેવેન્દ્રમુખ્યાશ્ચ રાત્રૌ દેવાઃ સમાયયુઃ ।
તદ્ દૃષ્ટ્વા ગુપ્તરૂપેણ પુપૂજુસ્તં ગજાનનમ્ ॥ ૧૧॥

પૂજયિત્વા ગતાઃ સર્વે રાજા તત્ર સમાગતઃ ।
પૂજાં દૃષ્ટ્વા મહાભાગો વિસ્મિતોઽભૂત્ પુનઃ પુનઃ ॥ ૧૨॥

તતઃ સ્વગુરવે ગત્વા પપ્રચ્છ વિનયાન્વિતઃ ।
દેવદર્શનકાઙ્ક્ષી કૃતાઞ્જલિઃ સ વિશેષતઃ ॥ ૧૩॥

વીરભદ્ર ઉવાચ ।
સ્વામિન્ દેવગણાઃ પૂજયિતું ચાત્ર ગજાનનમ્ ।
નિત્યમાયાન્તિ તાન્ દ્રષ્ટુમિચ્છામિ વદ કારણમ્ ॥ ૧૪॥

શિવશર્મોવાચ ।
નિર્માલ્યસમ્ભવાનિ ત્વં પુષ્પાણિ યત્ર તત્ર ચ ।
આચ્છાદય મહીપાલ તેષાં તે દર્શનં ભવેત્ ॥ ૧૫॥

તથેતિ વીરભદ્રેણ કૃતં દેવાલયે પુનઃ ।
દેવાઃ સમાગતા રાત્રાવજ્ઞાનેનાચરંસ્તતઃ ॥ ૧૬॥

નિર્માલ્યસ્પર્શમાત્રેણ પુણ્યહીના બભૂવિરે ।
પૂજાં કૃત્વા પુનર્ગન્તુમિચ્છાં ચક્રુઃ સુરેશ્વરાઃ ॥ ૧૭॥

તતોઽતિવેગહીનૈશ્ચ દેવૈર્દેવેન્દ્રસત્તમૈઃ ।
વિચારેણ સમાજ્ઞાતં કારણં ગતિખણ્ડને ॥ ૧૮॥

પાદસ્પર્શઃ કૃતોઽસ્માભિર્નિર્માલ્યે ગણપસ્ય ચ ।
અતો ગતિવિહીનૈશ્ચ કિં કર્તવ્યં વિશેષતઃ ॥ ૧૯॥

તતો રાજા સમાયાતઃ પૂજાર્થં દેવસન્નિધૌ ।
નિર્માલ્યમાર્જનં કૃત્વા દદર્શ દેવમુખ્યકાન્ ॥ ૨૦॥

તાન્ પ્રણમ્ય મહાભક્ત્યા તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ।
પ્રસન્નાસ્તે ચ રાજાનમૂચુઃ શમ્ભ્વાદયઃ સુરાઃ ॥ ૨૧॥

શિવાદય ઊચુઃ ।
રાજંસ્ત્વયા કૃતં કર્મ સ્વાર્થભાવેન દુઃખદમ્ ।
દેવાનાં તત્ર ચોપાયં કુરુ ગતિપ્રદાયકમ્ ॥ ૨૨॥

તતો રાજા ભયોદ્વિગ્નઃ સ્વગુરું પ્રણિપત્ય તમ્ ।
પપ્રચ્છ ચલને તેષામુપાયં પુણ્યદં પરમ્ ॥ ૨૩॥

ગુરુણા બોધિતો રાજા હૃદિ ધ્યાત્વા ગજાનનમ્ ।
ગણેશપૂજયા જાતં પુણ્યપુષ્પં દદૌ તદા ॥ ૨૪॥

અગાધપુણ્યયોગેન દેવા ગતિયુતાઃ કૃતાઃ ।
વિષ્ણ્વાદયો જગુસ્તં તે વરં વૃણુ મહીપતે ॥ ૨૫॥

અમોઘં દર્શનં પ્રોક્તમસ્માકં શાસ્ત્રસમ્મતમ્ ।
અતો મનેપ્સિતં ભૂપ દાસ્યામો નાત્ર સંશયઃ ॥ ૨૬॥

તતો રાજા ચ બ્રહ્માદ્યાનુવાચ સ કૃતાઞ્જલિઃ ।
ગણેશે દૃઢભક્તિર્મેઽસ્તુ ભવત્કૃપયા પરા ॥ ૨૭॥

તતસ્તે વિસ્મિતાઃ સર્વે પ્રાર્થયિત્વા ગજાનનમ્ ।
દદુર્ભક્તિં ગણેશાને બ્રહ્મભૂતપદપ્રદામ્ ॥ ૨૮॥

ગતાઃ સ્વર્ગેષુ દેવાસ્તે રાજા તત્ર સમાસ્થિતઃ ।
રાજ્યં પુત્રે વિનિક્ષિપ્ય બાલે પ્રધાનસંયુતે ॥ ૨૯॥

નિત્યં ગજાનનં ભક્ત્યાઽભજદનન્યચેતસા ।
અન્તે સ્વાનન્દગો ભૂત્વા ભજતે ગણનાયકમ્ ॥ ૩૦॥

એવં નિર્માલ્યમાહાત્મ્યં સઙ્ક્ષેપેણ નિરૂપિતમ્ ।
પઠનાચ્છ્રવણાન્નૃભ્યો ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૩૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ગણેશનિર્માલ્યમાહાત્મ્યવર્ણનં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૪.૪૯
(Page ખં. ૪ અ. ૫૦ પાન ૧૨૪)

## ૪.૫૦ વિઘ્નાસુરાશ્રમગમનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પાર્શ્વેણ મુનિના પૂર્વં દીપવત્સલયા સહ ।
પત્ન્યા પરમસત્યા વૈ તપસાઽઽરાધિતો વિભુઃ ॥ ૧॥

દશવર્ષસહસ્રેષુ ગણેશો વરદોઽભવત્ ।
સ્તુતઃ સમ્પૂજિતસ્તેન નાનાસ્તોત્રૈઃ પ્રજાપતે ॥ ૨॥

તાભ્યાં પુત્રો ભવ સ્વામિન્ વૃતસ્ત્વન્નૌ વરો મહાન્ ।
તથેતિ ગણરાજસ્તૌ કથયિત્વા યયૌ પુરમ્ ॥ ૩॥

તતઃ કદાચિદ્દેવર્ષિર્નારદસ્ત્વિન્દ્રમાયયો ।
પૂજિતઃ સુરનાથેન જગાદ વચનં હિતમ્ ॥ ૪॥

નારદ ઉવાચ ।
હિમવત્યાં હિમપ્રાન્તે રાજા મદસમન્વિતઃ ।
અભિનન્દન એવાઽસૌ યજ્ઞં કરોતિ દુર્મતિઃ ॥ ૫॥

બ્રાહ્મણાન્ સ સમાનીય પ્રોવાચ બલગર્વિતઃ ।
યજ્ઞમિન્દ્રેણ હીનં મે કુરુધ્વં યત્નસંયુતાઃ ॥ ૬॥

નો ચેત્ સર્વાન્ હનિષ્યામિ ક્રોધયુક્તો મહર્ષયઃ ।
તસ્ય તદ્વચનં શ્રુત્વા તથેતિ બ્રાહ્મણા જગુઃ ॥ ૭॥

અદ્ય શ્વો વા કરિષ્યન્તિ યજ્ઞં ભયસમન્વિતાઃ ।
બ્રાહ્મણા નાત્ર સન્દેહો યથેચ્છસિ તથા કુરુ ॥ ૮॥

એવમુક્ત્વા મહાયોગી નારદઃ પ્રયયૌ તતઃ ।
વિકુણ્ઠે સ મહાવિષ્ણું તતઃ સ્વચ્છન્દગોઽભવત્ ॥ ૯॥

ઇન્દ્રઃ ક્રોધસમાવિષ્ટઃ સસ્માર કાલરૂપિણમ્ ।
ભગવન્તં મહાકાયમિન્દ્રં સ પ્રયયૌ પ્રભુઃ ॥ ૧૦॥

તં પ્રણમ્ય પ્રતુષ્ટાવ કથયામાસ દુઃખદમ્ ।
વૃત્તાન્તં પ્રાર્થયામાસ યજ્ઞવિધ્વંસનાય તમ્ ॥ ૧૧॥

કાલસ્તથેતિ તં તુષ્ટઃ કથયિત્વા યયૌ ધરામ્ ।
ધારયામાસ મનસિ કાલઃ કલયતાં પ્રભુઃ ॥ ૧૨॥

કાલાધીનં જગત્ સર્વં સદા કાલેન ભુજ્યતે ।
કાલં યોગબલેનૈવ જયન્ત્યત્ર હિ યોગિનઃ ॥ ૧૩॥

તત્રાદૌ કર્મસંશુદ્ધા યોગનિષ્ઠા ભવન્તિ ચ ।
અતઃ કર્મવિનાશાર્થં યતિષ્યેઽહં વિશેષતઃ ॥ ૧૪॥

કર્મહીના નરાઃ સર્વે મલિનાઃ સમ્ભવન્તિ ચ ।
નેચ્છન્તિ યોગમાદ્યં તે ભવિષ્યન્તિ મદાત્મકાઃ ॥ ૧૫॥

જન્મમૃત્યુયુતાઃ સર્વે મદધીના ન સંશયઃ ।
ઇન્દ્રેણ પ્રેરિતસ્તત્ર ચ્છદ્મ નૈવ કરોમ્યહમ્ ॥ ૧૬॥

વિચાર્ય કાલ ઇતિ સ આસુરં રૂપમાદધે ।
વિઘ્નરૂપેણ તં ભૂપં યયૌ ક્રોધસમન્વિતઃ ॥ ૧૭॥

યજ્ઞાં બભઞ્જ વેગેન બ્રાહ્મણાંસ્તાડયન્ પુરા ।
તતો નાનાસ્થલે દુષ્ટો હ્યગમદ્વિઘ્નરૂપધૃક્ ॥ ૧૮॥

કર્મખણ્ડનભાવેન ચચાર બલમોહિતઃ ।
સર્વત્ર કર્મલોપાય વિઘ્નેનાપીડ્ય માનવાન્ ॥ ૧૯॥

તતઃ સોઽપિ મહાવેગો જનાન્ કાલેન મોહયન્ ।
ભ્રામયામાસ વિપ્રાન્ યોગિનો નાનાસ્વરૂપધૃક્ ॥ ૨૦॥

પ્રાતઃકાલં ચકારાઽસૌ નિશીથં સાયમાદરાત્ ।
મધ્યાહ્નં કારયામાસ નાનાભ્રમકરઃ સદા ॥ ૨૧॥

ચકાર રાત્રિરૂપં સ દિવસં કર્મખણ્ડકઃ ।
રાત્રિં દિવસરૂપાં તાં વક્તું નૈવ પ્રશક્યતે ॥ ૨૨॥

લોકાન્ ભ્રમયુતાન્ સર્વાન્ કર્મહીનાંશ્ચકાર સઃ ।
ચન્દ્રમાચ્છાદ્ય કાલસ્તુ સૂર્યં નક્ષત્રકાદિકાન્ ॥ ૨૩॥

તતોઽતિભયસંયુક્તા દેવા ભ્રાન્તા બભૂવિરે ।
કર્મહીનપ્રભાવેણ ચોપોષણપરાયણાઃ ॥ ૨૪॥

ન સમર્થા બભૂવુસ્તે કાલં ચલયિતું પ્રભુમ્ ।
કાલાધીનાઃ સુરાઃ સર્વે સૃષ્ટિસ્થિતિલયાત્મકાઃ ॥ ૨૫॥

તતો વસિષ્ઠમુખ્યાશ્ચ બ્રહ્માણં શરણં યયુઃ ।

(Page ખં. ૪ અ. ૫૦ પાન ૧૨૫)
તેન સાર્ધં ચ વૈકુણ્ઠં જગ્મુઃ કાલભયાન્વિતાઃ ॥ ૨૬॥

વિષ્ણુના શઙ્કરં જગ્મુર્બ્રાહ્મણા ભયસઙ્કુલાઃ ।
સ્તુત્વા નાનાવિધૈઃ સ્તોત્રૈઃ શશંસુઃ કાલચેષ્ટિતમ્ ॥ ૨૭॥

શિવેન સંયુતાઃ સર્વે વિઘ્નેશં તુષ્ટુવુઃ પ્રભુમ્ ।
તપસા ધ્યાનયુક્તેન તોષયામાસુરાદરાત્ ॥ ૨૮॥

ગતે વર્ષશતે કાલે પરમાત્મા ગજાનનઃ ।
વરદસ્તાન્ યયૌ દેવાન્ બોધયામાસ તાપસાન્ ॥ ૨૯॥

તતસ્તૈઃ સંસ્તુતો દેવઃ પ્રાર્થિતો વિઘ્નનાશને ।
તથેતિ પ્રતિપાદ્યૈવ પાર્શ્વપુત્રો બભૂવ સઃ ॥ ૩૦॥

દીપવત્સલયા યુક્તઃ પાર્શ્વઃ પરમયોગવિત્ ।
પુરા તતાપ ઘોરં સ તપો વિઘ્નેશ્વરં સ્મરન્ ॥ ૩૧॥

પ્રગતેષુ સ વર્ષેષુ સહસ્રે ગણનાયકઃ ।
પ્રસન્નસ્તં યયૌ તેન પૂજિતઃ સંસ્તુતોઽભવત્ ॥ ૩૨॥

સ વવ્રે મે ભવ સ્વામિન્ પુત્રઃ પરમતારકઃ ।
સંસારે પુત્રવાત્સલ્યાદ્ભજિષ્યામિ સહ સ્ત્રિયા ॥ ૩૩॥

મૂર્તૌ દેવસ્વભાવેન હૃદયે યોગમાર્ગતઃ ।
ભજિષ્યામિ ત્રિધા ઢુણ્ઢે ત્વાં સર્વત્ર વિશેષતઃ ॥ ૩૪॥

નાનાકર્મપરોઽહં વૈ તવ દેવ ગજાનન ।
પિતા જાતશ્ચ તેન ત્વં તારકો મે ભવિષ્યસિ ॥ ૩૫॥

તથેતિ વિઘ્નરાજસ્તમુવાચાંઽતર્દધે પ્રભુઃ ।
વિઘ્નાસુરવિનાશાય બભૂવે દેહધારકઃ ॥ ૩૬॥

દીપવત્સલિકાયાઃ સ જઠરે સઙ્ગતો વિભુઃ ।
સ્તનપાનાદિકં સર્વં સ ચકારાતિતોષિતઃ ॥ ૩૭॥

પઞ્ચવર્ષાત્મકો બાલો બભૂવ મુનિવેશ્મનિ ।
તદા દેવર્ષયઃ સર્વે તં યયુર્ભક્તિસંયુતાઃ ॥ ૩૮॥

શમ્ભ્વાદ્યાન્ સ સુરાન્ વીક્ષ્ય વસિષ્ઠાદિમુનીશ્વરાન્ ।
પાર્શ્વઃ સમ્ભ્રમસંયુક્તસ્તાન્ પુપૂજ યથાવિધિ ॥ ૩૯॥

ઉવાચ પ્રેમસંયુક્તો ધન્યં મે જન્મ કર્મ ચ ।
યેન દેવગણાઃ સર્વે મુનયો ગૃહમાગતાઃ ॥ ૪૦॥

આજ્ઞાં કુરુત દેવેશા દાસોઽહં ભવતાં દ્વિજાઃ ।
કરિષ્યામિ ન સન્દેહો ભવત્સ્મૃતિબલેન વૈ ॥ ૪૧॥

દેવર્ષય ઊચુઃ ।
તવ ભાગ્યબલેનૈવ સુતઃ સ્વાનન્દગોઽભવત્ ।
ગજાનનઃ સ્વયં સર્વે પ્રાર્થયામો હિતાય તમ્ ॥ ૪૨॥

વિઘ્નાસુરેણ દુષ્ટેન જગદ્ભ્રષ્ટં કૃતં મુને ।
તસ્ય નાશાર્થમેવં ત્વં કુરુ યત્નં મહામતે ॥ ૪૩॥

શ્રુત્વા તેષાં વચઃ ક્રૂરં મુનિઃ શોકયુતોઽભવત્ ।
એતસ્મિન્નન્તરે તત્ર સ ગજાનન આયયૌ ॥ ૪૪॥

તં દૃષ્ટ્વા સહસોત્થાય નેમુઃ સર્વે સુરેશ્વરાઃ ।
મુનયસ્તુષ્ટુવુર્દેવં પ્રાર્થયામાસુરાદરાત્ ॥ ૪૫॥

તેષાં હૃદિ સ્થિતં જ્ઞાત્વા શસ્ત્રહસ્તશ્ચતુર્ભુજઃ ।
મૂષકોપરિ સંસ્થો યો યયૌ હન્તું મહાસુરમ્ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે વિઘ્નાસુરાશ્રમગમનં નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૪.૫૦
(Page ખં. ૪ અ. ૫૧ પાન ૧૨૬)

## ૪.૫૧ વિઘ્નરાજાવતારવર્ણનં નામૈકપઞ્ચશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
કેનાઽપિ વિઘ્નદૈત્યસ્ય સ્થાનં ન જ્ઞાયતે સદા ।
કાલસ્ય ગણનાથસ્તુ યયૌ તસ્યાઽઽશ્રમં પ્રભુઃ ॥ ૧॥

ગુપ્તરૂપધરં વિઘ્નમઙ્કુશેન સમાનયત્ ।
તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં દેવાઃ સર્વે વિસિસ્મિરે ॥ ૨॥

તતસ્તં સ મહાકાલઃ પ્રાવમત્ય ગજાનનમ્ ।

અન્તર્ધાય સ્વમાત્માનમગ્નિરૂપો બભૂવ હ ॥ ૩॥

ત્રૈલોક્યસંસ્થિતં જ્ઞાત્વા તેજસ્તત્ત્વસમાશ્રિતમ્ ।
વિઘ્નં ગજાનનઃ ક્રુદ્ધો વાયુઃ સંહારકોઽભવત્ ॥ ૪॥

તતઃ કાલઃ સ્વયં દક્ષાઽભવદાકાશતત્ત્વગઃ ।
વાયુસ્થં ગણનાથં સ કર્ષયામાસ દારુણઃ ॥ ૫॥

આકાશસ્થં મહાકાલં જ્ઞાત્વાઽહઙ્કારધારકઃ ।
ગજાનનશ્ચ તં ક્રુદ્ધોઽકર્ષયત્ પ્રલયં પ્રભુઃ ॥ ૬॥

તતો વિઘ્નો મહત્તત્ત્વં સમાશ્રિત્ય ગજાનનમ્ ।
તાડયામાસ સઙ્ક્રુદ્ધઃ કાલઃ કલયતાં પ્રભુઃ ॥ ૭॥

તતો ગજાનનઃ ક્રુદ્ધઃ પ્રધાનરૂપધારકઃ ।
મહત્તત્ત્વસ્થમેવં તં કર્ષયામાસ દારુણમ્ ॥ ૮॥

તતોઽભવત્ સોઽપિ મહત્તત્ત્વં ત્યક્ત્વા ગુણેશગઃ ।
પ્રધાનં હન્તુમારેભે કાલઃ પરમદુર્જયઃ ॥ ૯॥

તતો ગજાનનઃ સાક્ષાદ્બિન્દુબ્રહ્મસ્થિતોઽભવત્ ।
ચતુષ્પાદમયીં શક્તિં હન્તું ચિક્ષેપ સોંઽતકમ્ ॥ ૧૦॥

ગુણેશાન્ન પરઃ કાલસ્તતઃ ખણ્ડિતવિક્રમઃ ।
કાલો માયાં ચતુષ્પાદાં નિરીક્ષ્ય ત્રાસિતોઽભવત્ ॥ ૧૧॥

શક્તિં દૃષ્ટ્વા મહાઘોરાં કાલગર્વહરાં પરામ્ ।
શરણં ગણરાજં સ યયૌ કાલઃ પ્રજાપતે ॥ ૧૨॥

સમાગતં મહાવિઘ્નં દેવા મુનિગણાસ્તતઃ ।
વિસ્મિતાશ્ચાઽભવન્ સર્વે જયેતિ ગણપં જગુઃ ॥ ૧૩॥

વિઘ્નાસુરઃ પ્રણમ્યાદૌ પુપૂજ હ ગજાનનમ્ ।
તદ્ દર્શનજબોધેન તુષ્ટાવ સ કૃતાઞ્જલિઃ ॥ ૧૪॥

વિઘ્નાસુર ઉવાચ ।
નમસ્તે ગણનાથાય ગજાનનસ્વરૂપિણે ।
યોગાય યોગનાથાય યોગિભ્યો યોગદાયિને ॥ ૧૫॥

અનાકારાય સાકારરૂપાય તે નમો નમઃ ।
નાનાભેદવિહીનાય ભેદાનાં પતયે નમઃ ॥ ૧૬॥

વિઘ્નેશાય પરેશાય કાલભીતિહરાય તે ।
હેરમ્બાય પરેષાં વૈ પરાત્પર નમો નમઃ ॥ ૧૭॥

અનાદયે હ્યનાથાય સર્વેષામાદિમૂર્તયે ।
ભક્તેશાય સદા ભક્તવાઞ્છિતપ્રદ તે નમઃ ॥ ૧૮॥

સ્વાનન્દવાસિને તુભ્યં મૂષકધ્વજિને નમઃ ।
મૂષકોપરિસંસ્થાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૧૯॥

આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ।
ગજવક્ત્રાય વૈ તુભ્યં સર્વપૂજ્યાય તે નમઃ ॥ ૨૦॥

સિદ્ધિબુદ્ધિસ્વરૂપાય સિદ્ધિબુદ્ધિપ્રદાય ચ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં મહોદર નમો નમઃ ॥ ૨૧॥

અમેયમાયાતિગમૂર્તયેઽપિ તે સદા સુશાન્તિપ્રદપૂર્ણમૂર્તયે ।
મનોવચોહીનમયાય તેજસે મનોવચોયુક્તકલાય તે નમઃ ॥ ૨૨॥

અજ્ઞાનદોષેણ કૃતોઽપરાધો હેરમ્બ તં ક્ષન્તુમિહાર્હસિ ત્વમ્ ।
રક્ષસ્વ માં ભક્તિયુતં દયાબ્ધે શ્રેષ્ઠં વરં દેહિ પરેશપાલ ॥ ૨૩॥

અધુના હિ મયા બુદ્ધં સ્વરૂપં તે ગજાનન ।
યોગાકારમયોઽસિ ત્વં તતોઽહં નિર્જિતસ્ત્વયા ॥ ૨૪॥

ત્વાં વિના કા સમર્થઃ સ્યાત્ કાલં કલયતાં પ્રભુમ્ ।
જેતું ધન્યઃ કૃતો નાથ પાદપદ્મસ્ય દર્શનાત્ ॥ ૨૫॥

(Page ખં. ૪ અ. ૫૧ પાન ૧૨૭)
એવં સ્તુત્વા મહાવિઘ્નઃ પ્રણનામ ગજાનનમ્ ।
તમુત્થાપ્ય જગાદેદં વચનં સર્વદઃ પરઃ ॥ ૨૬॥

શ્રીગજાનન ઉવાચ ।
ત્વયા કૃતં મદીયં વૈ સ્તોત્રં સર્વપ્રદં ભવેત્ ।
કાલસ્ય ન ભયં તેષાં પઠતાં શ‍ૃણ્વતાં સદા ॥ ૨૭॥

યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મહાયોગપ્રદં ચાસ્તુ સ્તોત્રં મત્પ્રીતિવર્ધનમ્ ॥ ૨૮॥

હન્તું ત્વાં ક્રોધસંયુક્ત આગતોઽહં ન સંશયઃ ।

વાઞ્છિતં વૃણુ નો હન્મિ અધુના શરણાર્થિનમ્ ॥ ૨૯॥

મહાકાલ ઉવાચ ।
ભક્તિં દેહિ ત્વદીયાં મે સુદૃઢાં તાં ગજાનન ।
દાસરૂપેણ માં નાથ રક્ષસ્વ ત્વત્સમીપગમ્ ॥ ૩૦॥

બ્રહ્મેશ કાર્યં કથય તત્ કરિષ્યામિ યન્ત્રિતઃ ।
સ્થાનં ભક્ષ્યયુતં દેહિ તત્ર તિષ્ઠામિ નિત્યશઃ ॥ ૩૧॥

મન્નામપૂર્વકં નામ કુરુ ત્વં તે ગજાનન ।
સર્વસિદ્ધિકરં નાથ પૂર્ણયોગપ્રદં પરમ્ ॥ ૩૨॥

જગાદ ગણરાજસ્તુ તતસ્તં ભક્તમુત્તમમ્ ।
નિર્વિકલ્પં મનસ્તસ્ય જ્ઞાત્વા ભક્તપ્રપાલકઃ ॥ ૩૩॥

શ્રીગજાનન ઉવાચ ।
મદીયા ભક્તિરચલા ભવિષ્યતિ તવાઽનઘ ।
યદ્યદિચ્છસિ તત્તત્તે સફલં ચાસ્તુ સર્વદા ॥ ૩૪॥

મત્ સમીપે ગણો ભૂત્વા તિષ્ઠ ત્વં બલસંયુતઃ ।
મહાવિઘ્નસ્વરૂપેણ નાનાવિઘ્નગણૈર્વૃતઃ ॥ ૩૫॥

વિઘ્નરાજેતિ મન્નામ ભવિષ્યતિ સુસિદ્ધિદમ્ ।
બ્રહ્મભૂયકરં પૂર્ણં વાઞ્છિતાર્થપ્રદાયકમ્ ॥ ૩૬॥

યત્ર મે સ્મરણં નાસ્તિ કર્માદૌ પૂજનં તથા ।
તત્ સર્વં ભુક્ષ્વ વિઘ્ન ત્વં ભ્રંશયિત્વા સુરેન્દ્રકાન્ ॥ ૩૭॥

શિવવિષ્ણુમુખા દેવા અન્યે મુનિમુખા નરાઃ ।
શેષાદ્યા નાગરાજાસ્તે નાનાજન્તવ એવ ચ ॥ ૩૮॥

અહઙ્કારેણ સંયુક્તા ભવન્તિ યદિ તેઽસુર ।
તદા તાન્ ભ્રંશયિત્વા ત્વં ભુઙ્ક્ષ્વ ભોગાન્ યથેપ્સિતાન્ ॥ ૩૯॥

મદ્ભક્તિકારિણઃ સર્વે ત્વયા પાલ્યા વિશેષતઃ ।
તેષાં નિર્વિઘ્નભાવેન પુરો ભાવપરો ભવ ॥ ૪૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગજાનનઃ પ્રતાપવાન્ ।
વિઘ્નો વિઘ્નૈઃ સમાયુક્તઃ શાન્તરૂપો બભૂવ હ ॥ ૪૧॥

દેવા મુનિમુખાઃ સર્વે સ્વસ્વસ્થાનં યયુસ્તતઃ ।

સપત્નીકસ્તત્ર પાર્શ્વો મૂર્ચ્છિતોઽભૂત્ પ્રજાપતે ॥ ૪૨॥

તયોર્હૃદિ ગણાધીશઃ પ્રકટોઽભૂદ્વચોઽબ્રવીત્ ।
માં ચિન્તામણિરૂપં તે પશ્ય તાત હૃદિ સ્થિતમ્ ॥ ૪૩॥

મૂર્તૌ પૂજનમાત્રેણ હૃદિ ધ્યાનેન માનદૌ ।
સન્તુષ્ટૌ જનકૌ નિત્યં સંશયો ન ભવિષ્યથઃ ॥ ૪૪॥

યદા મે સ્મરણં તાતૌ મહાકાર્યે કરિષ્યથઃ ।
દ્રક્ષ્યથો માં ન સન્દેહો યોગશાન્તૌ ભવિષ્યથઃ ॥ ૪૫॥

એવમુક્ત્વાંર્તદધે સોઽપિ ગણેશો હૃદિ રૂપધૃક્ ।
તૌ સ્વસ્થૌ મૂર્તિમાસ્થાપ્ય નિરન્તરમપૂજતામ્ ॥ ૪૬॥

ઇતિ તે ગણરાજસ્ય કથિતં ચરિતં મહત્ ।
અંશા ગજાનનસ્યૈતે અવતારા વિધે સ્મૃતાઃ ॥ ૪૭॥

વરેણ્યપુત્રભાવેન બભૂવ હ ગજાનનઃ ।
કસ્મિન્ કાલે વધાર્થાય સિન્દૂરસ્ય ન સંશયઃ ॥ ૪૮॥

કલ્પભેદાનુસારેણ નાનારૂપધરઃ પ્રભુઃ ।
ગજાનનો હ્યભૂદ્વર્ણયિતું વાપિ ન શક્યતે ॥ ૪૯॥

(Page ખં. ૪ અ. ૫૨ પાન ૧૨૮)
ઇત્યાદ્યા બહવો ભેદા ગજાનનસ્ય સિદ્ધિદાઃ ।
તાંશ્ચ જ્ઞાતું કોર્હતિ વર્ણયિતું વા પ્રજાપતે ॥ ૫૦॥

સઙ્ક્ષેપેણ મયા તુભ્યં કથિતં પાપનાશનમ્ ।
ચરિતં વિઘ્નરાજસ્ય ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે વિઘ્નરાજાવતારવર્ણનં નામૈકપઞ્ચશત્તમોઽધ્યાયઃ ॥ ૪.૫૧

## ૪.૫૨ ચરિત્રમાહાત્મ્યવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ગજાનનસ્ય ક્ષેત્રં મે વદ કુત્ર પ્રતિષ્ઠિતમ્ ।
માહાત્મ્યં તસ્ય વિપ્રેશ સઙ્ક્ષેપેણ સુસિદ્ધિદમ્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
દિશાન્તે નૈરૃતે કોણે દેવૈર્મુનિભિરાદરાત્ ।
સ્થાપિતો ગણનાથશ્ચ ગજવક્ત્રાવતારધૃક્ ॥ ૨॥

દ્વીપેષુ સ્વસ્વખણ્ડેષુ વિભુર્નૈરૃતકોણગઃ ।
પૂજ્યતે માનવૈઃ સર્વૈર્દેવૈશ્ચ મુનિભિસ્તથા ॥ ૩॥

ભાદ્રશુક્લચતુર્થ્યાં તૈઃ સ્થાપિતો ગણનાયકઃ ।
મધ્યાહ્નસમયે દક્ષ પુરા સોત્સવવર્ધિની ॥ ૪॥

તસ્યાં યાત્રાં પ્રકુર્વન્તિ જના ભક્તિપરાયણાઃ ।
ત્રિલોકસ્થા વિશેષેણ નાનાસિદ્ધિપ્રવૃદ્ધયે ॥ ૫॥

દશયોજનવિસ્તારો વિભુઃ ક્ષેત્રસ્ય મધ્યગઃ ।
મૂષકશ્ચતુરસ્રસ્ય પુરતસ્તિષ્ઠતિ પ્રભોઃ ॥ ૬॥

સિદ્ધિસ્તસ્યાઽપિ વામાઙ્ગે દક્ષિણાઙ્ગે ચ બુદ્ધિકા ॥

અષ્ટદિક્ષુ પ્રજાનાથ સિદ્ધયોઽષ્ટૌ વ્યવસ્થિતાઃ ॥ ૭॥

અષ્ટમાતૃગણઃ પશ્ચાત્તતોઽષ્ટૌ ભૈરવા મતાઃ ।
દશદિક્ષુ ચ દિક્પાલાઃ સશસ્ત્રાઃ સંસ્થિતાઃ પ્રભોઃ ॥ ૮॥

શિવવિષ્ણુમુખા દેવા વામાઙ્ગે સંસ્થિતા વિભોઃ ।
કાશ્યાદિમુખ્યક્ષેત્રાણિ ગઙ્ગાદ્યાશ્ચ તથોત્તરે ॥ ૯॥

મુનયઃ શેષકાદ્યાશ્ચ પૃષ્ઠભાગે વ્યવસ્થિતાઃ ।
ભક્તા મુદ્ગલમુખ્યાશ્ચ પુરતઃ સંસ્તુવન્તિ તમ્ ॥ ૧૦॥

ત્રિલોકેષુ ચ યે મુખ્યાસ્તે સર્વે તત્ર સંસ્થિતાઃ ।
અંશેન દેવસેવાર્થં સ્વાધિકારેષુ માનદ ॥ ૧૧॥

તીર્થેષુ સ્નાનકર્તારઃ સમુદ્રે ભક્તિસંયુતાઃ ।
સ્વસ્વનામ્નાઙ્કિતેષ્વેવ સ્વલ્પદેહધરા અપિ ॥ ૧૨॥

પરસ્પરં બોધયન્તો ગજાનનચરિત્રકમ્ ।
નૃત્યન્તિ તે હસન્ત્યેવ દેવચેષ્ટાપરાયણાઃ ॥ ૧૩॥

ગણેશતીર્થં વૈ તત્ર ગજાનનસુસિદ્ધિદમ્ ।
તત્ર સ્નાનં પ્રકુર્વન્તિ યે નરાસ્તે પ્રજાપતે ॥ ૧૪॥

કૃતકૃત્યા ન સન્દેહો મનેપ્સિતફલપ્રદે ।
તત્ર યાત્રાં પ્રકુર્વન્તિ ચતુર્વિધફલપ્રદામ્ ॥ ૧૫॥

ધન્યાસ્તે પુરુષા લોકે કૃતકૃત્યા ભવન્તિ વૈ ।
વસન્તિ યે યત્ર કુત્ર ગજાનનપરાયણાઃ ॥ ૧૬॥

બ્રહ્મભૂતાશ્ચ તે પ્રોક્તા દર્શનાત્ પાપનાશનાઃ ।
અન્યદેવસ્ય યે ભક્તા મૃતાઃ ક્ષેત્રે ભવન્તિ ચેત્ ॥ ૧૭॥

તે તસ્ય લોકમાસાદ્ય ભોગાન્ ભુઞ્જન્તિ શાશ્વતાન્ ।
તદન્તે ગણનાથં વૈ ગચ્છન્તિ બ્રહ્મસિદ્ધયે ॥ ૧૮॥

તત્ર સિદ્ધિં ગતા નાના નરા નાર્યશ્ચ ભો વિધે ।
તેષાં ચરિત્રકં પૂર્ણં મયા વક્તું ન શક્યતે ॥ ૧૯॥

(Page ખં. ૪ અ. ૫૨ પાન ૧૨૯)
યાત્રામાત્રેણ તત્રૈવ ચતુર્વિધફલં લભેત્ ।
મરણે બ્રહ્મભૂતશ્ચ નરો ભવતિ નિશ્ચિતમ્ ॥ ૨૦॥

સઙ્ક્ષેપેણ મયા તુભ્યં કથિતં ક્ષેત્રગં મહત્ ।
માહાત્મ્યં વિસ્તરેણૈવ કોઽપિ નાર્હતિ નિશ્ચિતમ્ ॥ ૨૧॥

ઇદં ગજાનનસ્યાપિ ચરિતં સર્વસિદ્ધિદમ્ ।
ભવિષ્યતિ મહાભાગ સર્વસૌખ્યકરં તથા ॥ ૨૨॥

નાનાખ્યાનસમાયુક્તં કથિતં તે પ્રજાપતે ।
યઃ શ‍ૃણોતિ નરો ભક્ત્યા પઠેદ્વા તસ્ય સિદ્ધિદમ્ ।
ભવિષ્યતિ મહાભાગ સર્વસૌખ્યકરં તથા ॥ ૨૩॥

નાનેન સદૃશં કિઞ્ચિત્ પાવનં બ્રહ્મદાયકમ્ ।
વિદ્યતે સર્વશાસ્ત્રેષુ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૨૪॥

સ્વર્ણભારસહસ્રાણિ નિત્યં યો વૈ દદાતિ ચેત્ ।
તદસ્ય શ્રવણાન્ મર્ત્યો લભતે નાત્ર સંશયઃ ॥ ૨૫॥

ગોદાનાનિ નરો યસ્તુ દદાતિ ભક્તિસંયુતઃ ।
નિત્યં સહસ્રશો દક્ષ ફલં પ્રાપ્નોતિ શાશ્વતમ્ ॥ ૨૬॥

નાનાદાનાનિ યો દદ્યાદ્બ્રાહ્મણેભ્યો યથાવિધિ ।
તેષાં પુણ્યફલં ભુક્ત્વા પતતિ માનવો ભુવિ ॥ ૨૭॥

અસ્ય શ્રવણમાત્રેણ ભુક્ત્વા ભોગાન્ મનેપ્સિતાન્ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૨૮॥

નાનાયજ્ઞાદિકં કર્મ કુરુતે માનવઃ સદા ।
નાસ્ય શ્રવણમાત્રેણ કલાંશમપિ તત્ ફલમ્ ॥ ૨૯॥

જન્મમૃત્યુપ્રદાન્યેવ કર્માણિ સકલાનિ ચ ।
ઇદં સર્વપ્રદં પ્રોક્તમન્તે બ્રહ્મપ્રદાયકમ્ ॥ ૩૦॥

સઙ્ક્ષેપેણ પ્રજાનાથ કથિતં સુખદં પરમ્ ।
ગજાનનસ્ય માહાત્મ્યં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૩૧॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
શ્રુત્વા દક્ષોઽપિ સંહૃષ્ટો બભૂવ મુનિસત્તમ ॥ ૩૨॥

મયાઽપિ કથિતં સર્વં માહાત્મ્યં પૂર્ણસિદ્ધિદમ્ ।
તુભ્યં વિપ્રર્ષિયુક્તાય યથા મુદ્ગલભાષિતમ્ ॥ ૩૩॥

ધન્યોઽહં કૃતકૃત્યોઽહં ભવતાં સઙ્ગમેન વૈ ।
ગણેશામૃતધારાયાં પ્રવૃત્તઃ સર્વભાવતઃ ॥ ૩૪॥

ગણેશાન્ન પરં કિઞ્ચિત્ સર્વાદૌ તેન સ સ્મૃતઃ ।
સર્વપૂજ્યશ્ચ વિપ્રર્ષે બ્રહ્મેશો બ્રહ્મદઃ પરઃ ॥ ૩૫॥

શ્રુતં ત્વયા મહાભાગ બ્રાહ્મણૈઃ શાસ્ત્રકોવિદૈઃ ।
અધુના કિં ચ તે વિપ્ર ઇચ્છા શ્રોતું વદસ્વ તામ્ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
ચતુર્થે ખણ્ડે ગજાનનચરિતે ચરિત્રમાહાત્મ્યવર્ણનં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૪.૫૨
॥ ઇતિ ચતુર્થઃ ખણ્ડઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે ચતુર્થઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 4 Gajananacharitam*

pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*